आत्मानं मन्यते वायुं वायुरुन्मंडलं भ्रमेत् ॥ आकाशं धारयमाणस्य व्योम सूक्ष्मं प्रवर्तते । पश्यते मंडलं सूक्ष्मं घोषश्चास्य प्रवर्तते ॥ तथा मनो धारयतो मनः सूक्ष्मं प्रवर्तते । मनसा सर्वभूतानां मनस्तु विशते हि सः । बुद्ध्या बुद्धिं यथा युंजेस्तदा विज्ञाय बुध्यते ॥ एतानि सप्त सूक्ष्माणि विदित्वा यस्तु योगवित् । परित्यजति मेधावी स बुद्ध्या परमं व्रजेत् ॥ यस्मिन्यस्मिंश्च संयुक्तो भूत ऐश्वर्यलक्षणे । तत्रैव संगं भजते तेनैव प्रविनश्यति ॥ तस्माद्विदित्वा सूक्ष्माणि संसक्तानि परस्परं । परित्यजति यो बुद्ध्या स परं प्राप्नुयाद्द्विजः ॥ दृश्यंते हि महात्मान ऋषयो दिव्यचक्षुषः । संसक्ताः सूक्ष्मभावेषु ते दोषास्तेषु संज्ञिताः ॥ तस्मान्न निश्चयः कार्यः सूक्ष्मेष्विह कदाचन । ऐश्वर्याज्जायते रागो विरागं ब्रह्म चोच्यते ॥ 13. Dominium (aiṣvarya)[1] nactus asceticus octo facultatibus divinis praeditus est: 1. *aṇiman*, subtilitas, qua potestate nemini cernendus omnia intrare potest[2]; 2. *laghiman*, levitas, qua maxima celeritate ubicunque pervenit; 3. *mahiman*, magnitudo; 4. *prápti*, omnia obtinendi facultas; 5. *prákámya*, voluntas libera, qua rebus omnibus frui potest, neque tamen iis detinetur; 6. *íṣitva*, imperium; 7. *vaṣitva*, omnia ipsius voluntati subjiciendi facultas; 8. *yatrakámávasáyitá*, omnia decernendi facultas. 14. Quo animae metempsychosis vitaeque humanae miseriae et vicissitudines[3] evitentur, summo numini cognoscendo opera navanda est. 15. Numen summum in corde commorans octo libamentis colendum est. 16, 17. De Ṣivae cultorum officiis. 18. De erroribus expiandis (práyaṣchitta). 19. De ominibus diris: अत ऊर्ध्वं प्रवक्ष्यामि अरिष्टानि निबोधत । येन ज्ञानविशेषेण मृत्युं पश्यति चात्मनः ॥१॥ अरुंधतीं ध्रुवं चैव सोमच्छायां महापथं । यो न पश्येत्स नो जीवेन्नरः संवत्सरात्परं ॥२॥ अरश्मिवंतमादित्यं रश्मिवंतं च पावकं । यः पश्येन्न वै जीवेत मासादेकादशात्परं ॥३॥ वमेन्मूत्रं पुरीषं वा सुवर्णं रजतं तथा । प्रत्यक्षमथवा स्वप्ने दश मासान्न जीवति ॥४॥ अग्रतः पृष्ठतो वापि खंडं यस्य पदं भवेत् । पांशुले कर्दमे वापि सप्त मासान्स जीवति ॥५॥ काकः कपोतो गृध्रो वा निलीयेद्यस्य मूर्धनि । क्रव्यादो वा खगः कश्चित्षण्मासान्नातिवर्तते ॥६॥ वध्येद्वायसपंक्तीभिः पांसुवर्षेण वा पुनः । छायां वा विकृतां पश्येच्चतुःपंच स जीवति ॥७॥ अनभ्रे

[1] Idque triplex esse dicitur: sávadya, niravadya, súkshma. तच्चापि त्रिविधं ज्ञेयमैश्वर्यं सार्वकामिकं । सावद्यं निरवद्यं च सूक्ष्मं चैव प्रवर्तते ॥ सावद्यं नाम यत्तत्त्वं पंचभूतात्मकं स्मृतं । निरवद्यं तथा नाम पंचभूतात्मकं स्मृतं ॥ इंद्रियाणि मनश्चैव अहंकारश्च वै स्मृतं । तत्र सूक्ष्मं प्रवृत्तं तु (सूक्ष्मप्रवृत्तंस्तु MS.) पंचभूतात्मकं पुनः ॥

[2] त्रैलोक्ये सर्वभूतेषु जीवो स्यानियतः (sic B. जीवाश्चानियतः A.) स्मृतः । अणिमा च यथाव्यक्तं सर्वं तत्र प्रतिष्ठितं ॥

[3] Quae in hoc capite de hominum origine et vita dicuntur, similiter in Márkaṇḍeyapuráṇa c. 11, Garuḍapuráṇa, Pretakalpa c. 22, et in Vṛihannáradíya c. 30. traduntur.

विद्युतं पश्येद्दक्षिणां दिशमाश्रितां । उदकेंद्रधनुर्वापि त्रयो द्वौ वा स जीवति ॥८॥ अप्सु वा यदिवादर्शे आत्मानं यो न पश्यति । अशिरस्कं तथात्मानं मासादूर्ध्वं न जीवति ॥९॥ शवगंधि भवेद्गात्रं वसागंधि ह्ययापि वा । मृत्युर्ह्युपस्थितस्तस्य अर्धमासं स जीवति ॥१०॥ यस्य वै स्नातमात्रस्य हृदयं चावशुष्यति । धूमो वा मस्तकान्पश्येद्दशाहं न स जीवति ॥११॥ संभिन्नो मारुतो यस्य मर्मस्थानानि कृंतति । अद्भिः स्पृष्टो न हृष्येच्च तस्य मृत्युरुपस्थितः ॥१२॥ ऋक्षवानरयुक्तेन रथेनाशां तु दक्षिणां । गायन्नथ (गायन्नप्य A. गायन्नस्य B.) व्रजेत्स्वप्ने विद्यान्मृत्युरुपस्थितः ॥१३॥ कृष्णांबरधरा श्यामा गायंती वायवांगना । यन्नयेद्दक्षिणामाशां स्वप्ने सोऽपि न जीवति ॥१४॥ छिद्रं वासश्च कृष्णं च स्वप्ने यो बिभृयान्नरः । नग्नं वा श्रवणं[4] दृष्ट्वा विद्यान्मृत्युरुपस्थितः ॥१५॥ आ मस्तकतलाद्यस्तु निमज्जेत्पंकसागरे । दृष्ट्वा तु तादृशं स्वप्नं सद्य एव न जीवति ॥१६॥ भस्मांगारांश्च केशांश्च नदीं शुष्कां भुजंगमान् । पश्येद्यो दशरात्रं तु न स जीवेत तादृशः ॥१७॥ कृष्णैश्च विकटैश्चैव पुरुषैरुद्यतायुधैः । पाषाणैस्ताड्यते स्वप्ने यः सद्यो न स जीवति ॥१८॥ सूर्योदये प्रत्युषसि प्रत्यक्षं यस्य वै शिवा । क्रोशंती संमुखाभ्येति स गतायुर्भवेन्नरः ॥१९॥ यस्य वै स्नातमात्रस्य हृदयं पीड्यते भृशं । जायते दंतहर्षश्च तं गतायुषमादिशेत् ॥२०॥ भूयो भूयस्त्रसेद्यस्तु रात्रौ वा यदिवा दिवा । दीपगंधं च नो वेत्ति विद्यान्मृत्युमुपस्थितं ॥२१॥ रात्रौ चेंद्रायुधं पश्येद्दिवा नक्षत्रमंडलं । परनेत्रेषु चात्मानं न पश्येन्न स जीवति ॥२२॥ नेत्रमेकं स्रवेद्यस्य कर्णौ स्थानाच्च भ्रश्यतः । नासा च वक्रा भवति स ज्ञेयो गतजीवितः ॥२३॥ यस्य कृष्णा खरा जिह्वा पद्माभासं च वै मुखं । गंडे चिपिटके (च पिटके B.) रक्ते तस्य मृत्युरुपस्थितः ॥२४॥ मुक्तकेशो हसंश्चैव गायन्नृत्यंश्च यो नरः । याम्याशाभिमुखो गच्छेत्तदंतं तस्य जीवितं ॥२५॥ यस्य स्वेदसमुद्भूताः श्वेतसर्षपसन्निभाः । स्वेदा भवंति ह्यसकृत्तस्य मृत्युरुपस्थितः ॥२६॥ उष्ट्रा वा रासभा वापि युक्ताः स्वप्ने रथे शुभाः । यस्य सोऽपि न जीवेत दक्षिणाभिमुखो गतः ॥२७॥ द्वे चात्र परमेरिष्टे एतद्धतं (etad rúpam B.) परं भवेत् । घोषं न शृणुयात्कर्णे ज्योतिर्नेत्रेण (l. नेत्रे न) पश्यति ॥२८॥ श्वभ्रे यो निपतेत्स्वप्ने द्वारं चास्य पिधीयते । न चोत्तिष्ठति यः श्वभ्रात्तदंतं तस्य जीवितं ॥२९॥ ऊर्ध्वा च दृष्टिर्न च सप्रतिष्ठा (संप्रतिष्ठा codd.) रक्ता पुनः संपरिवर्तमाना । मुखस्य चोष्मा शुषिरा च नाभिरत्युष्णमूत्रो विषमस्य एव ॥३०॥ दिवा वा यदिवा रात्रौ प्रत्यक्षं योऽभिहन्यते । तं पश्येदथ हंतारं स हतस्तु न जीवति ॥३१॥ अग्निप्रवेशं कुरुते स्वप्नांते यस्तु मानवः । स्मृतिं नोपलभेच्चापि तदंतं तस्य जीवितं ॥३२॥ यस्तु प्रावरणं शुक्लं स्वकं पश्यति मानवः । रक्तं कृष्णमपि स्वप्ने तस्य मृत्युरुपस्थितः ॥३३॥ अरिष्टसूचिते देहे तस्मिन्काल उपागते । त्यक्त्वा भयं विषादं च उद्यच्छेद्बुद्धिमान्नरः ॥३४॥ etc. 20. De Om syllabae significatione et sanctitate. 21 (fol. 45^{b} = B. 42^{a}). Kalparum mensura breviter definitur, deinde viginti octo kalpae enumerantur: Bhava, Bhuvas, Tapas, Bhava, Rambha, Ṛitu, Kratu, Vahni, Havyaváhana, Sávitra,

[4] श्रवमणं A. Hoc loco श्रमण, mendicus Buddhicus, intelligi videtur, quae vox etiam श्रवण scribitur.

Bhuvas, Uṣika, Kuṣika, Gandharva, Ṛishabha, Shaḍja[1], Márjálíya, Madhyama, Vairájaka, Nisháda, Panchama, Meghaváhana, Chintaka, Ákúti, Vijnáti, Manas, Bháva, Vṛihat. Kalpas, qui a Gandharva vocabulo incipiant et in Meghaváhana voce desinant, a modulis musicis denominatos esse, facile apparet. २२, २३. Ṣiva quatuor aevis (kalpa) se manifestavit, forma alba, rubra, nigra, omnigena (Viṣvarúpa). Aetate flava Maheṣvarí orta est. Ṣiva coram Brahmane de futuris kalpis, suis ipsius in singulis manifestationibus, sectae Ṣivaiticae conditoribus disserit: ततस्तस्मिंस्तदा कल्पे वाराहे सप्तमे प्रभोः। पुनर्विष्णुर्महातेजाः कालो लोकप्रकालनः। मनुर्वैवस्वतो नाम तव पुत्रो भविष्यति॥ तदा चतुर्युगावस्थे कल्पे तस्मिन्युगांतके। भविष्यामि शिखायुक्तः श्वेतो नाम महामुनिः॥ हिमवच्छिखरे रम्ये छागले पर्वतोत्तमे। चतुःशिष्याः शिवे युक्ता भविष्यंति तदा मम॥ श्वेतः श्वेतशिखश्चैव श्वेतास्यः श्वेतलोहितः। चत्वारस्ते महात्मानो ब्राह्मणा वेदपारगाः॥ ततस्ते ब्रह्मभूयिष्ठा दृष्ट्वा ब्रह्मगतिं परां। तत्समीपं गमिष्यंति पुनरावृत्तिदुर्लभं॥ पुनस्तु मम देवेश द्वितीये द्वापरे प्रभुः। प्रजापतिर्यदा व्यासः सत्यो नाम भविष्यति॥ तदा लोकहितार्थाय सुतारो नाम नामतः। भविष्यामि कलौ तस्मिन् लोकानुग्रहकारणात्॥ तत्रापि मम ते पुत्रा भविष्या नाम नामतः। दुंदुभिः शतरूपश्च ऋचीकः केतुमांस्तथा॥ प्राप्य योगं तथा ज्ञानं ब्रह्म चैव सनातनं। रुद्रलोकं गमिष्यंति पुनरावृत्तिदुर्लभं॥ तृतीये द्वापरे चैव यदा व्यासस्तु भार्गवः। तदा त्वहं भविष्यामि दमनस्तु युगांतके॥ तत्रापि च भविष्यंति चत्वारो मम पुत्रकाः। विशोकश्च विकेशश्च विशापः शापनाशनः॥ तेऽपि तेनैव मार्गेण योगोक्तेन महौजसः। रुद्रलोकं गमिष्यंति पुनरावृत्तिदुर्लभं॥ चतुर्थे द्वापरे चैव यदा व्यासोऽङ्गिराः स्मृतः। तदाप्यहं भविष्यामि सुहोत्रो नाम नामतः॥ तत्रापि मम सत्पुत्राश्चत्वारश्च तपोधनाः। भविष्यंति द्विजश्रेष्ठा योगात्मानो दृढव्रताः॥ सुमुखो दुर्मुखश्चैव दुर्दमो दुरतिक्रमः। प्राप्य योगगतिं सूक्ष्मां विमला दग्धकिल्बिषाः॥ तेऽपि तेनैव मार्गेण गमिष्यंति न संशयः। पंचमे द्वापरे चैव व्यासस्तु सविता यदा॥ तदा चापि भविष्यामि कंको नाम महातपाः। अनुग्रहार्थं लोकानां योगात्मानेककर्मकृत्॥ चत्वारस्तु महाभागा विरजाः शुद्धयोनयः। पुत्रा मम भविष्यंति योगात्मानो दृढव्रताः॥ सनः सनंदनश्चैव प्रभुर्यस्य सनातनः। क्रतुः सनत्कुमारश्च निर्ममा निरहंकृताः॥ मत्समीपं गमिष्यंति पुनरावृत्तिदुर्लभं। परिवर्ते पुनः षष्ठे मृत्युर्व्यासो यदा विभुः॥ तदाप्यहं भविष्यामि लोकाक्षिर्नाम नामतः। शिष्याश्च मम ते दिव्या योगात्मानो दृढव्रताः॥ भविष्यंति महाभागाश्चत्वारो लोकसंमताः। सुधामा विरजाश्चैव शंख आद्रव (?) एव च॥ योगात्मानो महात्मानस्ते सर्वे दग्धकिल्बिषाः। तेऽपि तेनैव मार्गेण गमिष्यंति न संशयः॥ सप्तमे परिवर्ते तु यदा व्यासः शतक्रतुः। विभुर्नाम महातेजाः पूर्वमासीच्छतक्रतुः॥ तदाप्यहं भविष्यामि कलौ तस्मिन्युगांतके। जैगीषव्येति विख्यातः सर्वेषां योगिनां वरः॥ तत्रापि मम ते पुत्रा भविष्यंति युगे तदा। सारस्वतः सुमेधाश्च वसुवाहः सुवाहनः॥ तेऽपि तेनैव मार्गेण ध्यानयुक्तिं समाश्रिताः। भविष्यंति महात्मानो रुद्रलोकपरायणाः॥ वसिष्ठश्चाष्टमे व्यासः परिवर्ते भविष्यति। कपिलश्चासुरिश्चैव तथा पंचशिखो मुनिः॥ वाग्बलिश्च महायोगी सर्वे एव महौजसः॥ प्राप्य माहेश्वरं योगं ध्यानिनो दग्धकल्मषाः। मत्समीपं गमिष्यंति पुनरावृत्तिदुर्लभं॥ परिवर्तेऽथ नवमे व्यासः सारस्वतो यदा। तदा चाहं भविष्यामि ऋषभो नाम नामतः॥ तत्रापि मम ते पुत्रा भविष्यंति महौजसः। पराशरश्च गार्ग्यश्च भार्गवो ह्यंगिरास्तथा॥ भविष्यंति महात्मानो ब्राह्मणा वेदपारगाः। सर्वे तपोबलोत्कृष्टाः शापानुग्रहकोविदाः॥ तेऽपि तेनैव मार्गेण योगोक्तेन तपस्विनः। ध्यानमार्गं समासाद्य गमिष्यंति तथैव च॥ दशमे द्वापरे व्यासस्त्रिधामा नाम नामतः। यदा भविष्यति विप्र[र्षि]स्तदाहं भविता पुनः॥ हिमवच्छिखरे रम्ये भृगुतुंगे नगोत्तमे। नाम्ना भृगोस्तु शिखरं तस्मात्तच्छिखरं भृगुः॥ तत्रैव मम ते पुत्रा भविष्यंति दृढव्रताः। बलबंधुर्निरामित्रः (वलवंधर्निरा° A. वलवंधनिरा° B.) केतुशृंगस्तपोधनः॥ योगात्मानो महात्मानो ध्यानयोगसमन्विताः। रुद्रलोकं गमिष्यंति तपसा दग्धकल्मषाः॥ एकादशे द्वापरे तु भृगुर्व्यासो (विवृ° B. Fortasse *Bhrigur.*) भविष्यति। तदाप्यहं भविष्यामि गंगाद्वारे कलेर्धुरि॥ उग्रा नाम महानादास्तत्रैव मम पुत्रकाः। भविष्यंति महौजस्काः सुवृत्ता लोकविश्रुताः॥ लंबोदरश्च लंबश्च लंबाक्षो लंबकेशकः। प्राप्य माहेश्वरं योगं रुद्रलोकाय संस्थिताः। तेऽपि तेनैव मार्गेण गमिष्यंति परां गतिं॥ द्वादशे परिवर्ते तु शततेजा महामुनिः। भविष्यति महासत्त्वो व्यासः कविवरोत्तमः॥ ततोऽप्यहं भविष्यामि अत्रिर्नाम युगांतके। हेमकं वनमासाद्य (हेमकंचन° B.) योगमास्थाय भूतले॥ तत्रापि मम ते पुत्रा भस्मस्नानानुलेपनाः। भविष्यंति महायोगा रुद्रलोकपरायणाः॥ सर्वज्ञः समबुद्धिश्च साध्यः सर्वस्तथैव च। रुद्रलोकं गमिष्यंति ध्यानयोगपरायणाः॥ त्रयोदशे पुनः प्राप्ते परिवर्ते क्रमेण तु। धर्मो नारायणो नाम व्यासस्तु भविता यदा॥ तदाप्यहं भविष्यामि वालिर्नाम महामुनिः। वालिखिल्याश्रमे पुण्ये पर्वते गंधमादने॥ तत्रापि मम ते पुत्रा भविष्यंति तपोधनाः। सुधामा काश्यपश्चैव वसिष्ठो विरजास्तथा॥ महायोगबलोपेता विमला ह्यूर्ध्वरेतसः। तेनैव योगमार्गेण गमिष्यंति न संशयः॥ यदा व्यासः सुरक्षस्तु पर्यायश्च चतुर्दशः। तत्रापि पुनरेवाहं भविष्यामि युगांतके॥ वंशे त्वंगिरसः श्रेष्ठो गौतमो नाम योगवित्। तस्माद्भविष्यते पुण्यं गौतमं नाम तद्वनं॥ तत्रापि मम ते पुत्रा भविष्यंति कलौ तथा। अत्रिरुग्रतपाश्चैव श्रावणो प्यविष्टकः (सावणोप्यसतिष्यका: B. Fortasse श्रावणोऽथ श्रविष्ठकः) ॥ योगात्मानो महात्मानो ध्यानयोगपरायणाः। तेऽपि तेनैव मार्गेण रुद्रलोकनिवासिनः॥ ततः प्राप्ते पंचदशे परिवर्ते क्रमागते। त्र्यारुणिस्तु यदा व्यासो द्वापरे भविता प्रभुः॥ तदाप्यहं भविष्यामि नाम्ना वेदशिरा द्विजः। तत्र वेदशिरो नाम अस्त्रं तत्पारमेश्वरं॥ भविष्यति महावीर्यं वेदशीर्षश्च पर्वतः। हिमवत्पृष्ठमाश्रित्य सरस्वत्या नगोत्तमे॥ तदापि मम ते पुत्रा भविष्यंति तपोधनाः। कुणिश्च कुणिबाहुश्च कुशरीरः कुनेत्रकः॥ योगात्मानो महात्मानो ब्रह्मिष्ठाश्चोर्ध्वरेतसः। तेऽपि तेनैव मार्गेण रुद्रलोकं गतास्तु वै॥ ततः षोडशमे चापि परिवर्ते क्रमागते। व्यासस्तु संजयो नाम भविष्यति यदा (तदा MSS.) प्रभुः॥ तदाप्यहं भविष्यामि गोकर्णो नाम

[1] षड्जना यत्र चर्षयः।

नामतः । तस्माद्भविष्यते पुण्यं गोकर्णं नाम तद्वनं ॥ तत्रापि मम ते पुत्रा भविष्यंति महौजसः । काश्यपो ह्युशनाश्चैव च्यवनोऽथ वृहस्पतिः ॥ तेऽपि तेनैव मार्गेण गमिष्यंति परं पदं । ततः सप्तदशे चैव परिवर्ते क्रमागते ॥ तदा भविष्यते व्यासो नाम्ना देवः कृतंजयः । तदाप्यहं भविष्यामि गुह्यवासीति (l. गुहावासीति) नामतः ॥ हिमवच्छिखरे चैव महातुंगे महालये । सिद्धक्षेत्रं महापुण्यं भविष्यति महालयं ॥ तत्रापि मम ते पुत्रा ब्रह्मज्ञा योगवादिनः । भविष्यंति महात्मानो निर्ममा निरहंकृताः ॥ उतथ्यो वामदेवश्च महाकालो महालयः । तेषां शतसहस्रं तु शिष्याणां ध्यानसाधनं ॥ भविष्यंति तदा कल्पे सर्वे ते ध्यानयुंजकाः । ते तु संनिहिता योगे हृदि (तुद्धृदि A.[1]) कृत्वा महेश्वरं । महालये पदं क्षिप्त्वा प्रविष्टाः शिवमव्ययं ॥ ये चान्येऽपि महात्मानः काले तस्मिन्युगांतके । ध्यानयुक्तेन मनसा विमलाः शुद्धबुद्धयः ॥ गत्वा महालयं पुण्यं दृष्ट्वा माहेश्वरं पदं । तूर्णं तारयते जंतुर्दश (जंतु A.) पूर्वान्दशावरान् ॥ आत्मानमेकविंशं च तारयित्वा महालये । मम प्रसादाद्यास्यंति रुद्रलोकं गतज्वराः ॥ ततोऽष्टादशमश्चैव परिवर्तो यदा भवेत् । तदा ऋतंजयो नाम व्यासस्तु भविता मुनिः ॥ तदाप्यहं भविष्यामि शिखंडी नाम नामतः । सिद्धक्षेत्रे महापुण्ये देवदानवपूजिते ॥ हिमवच्छिखरे पुण्ये शिखंडी यत्र पर्वतः । शिखंडिनो वनं चापि ऋषिसिद्धनिषेवितं ॥ तत्रापि मम ते पुत्रा भविष्यंति तपोधनाः । वाचश्रवा ऋचीकश्च श्यावाश्वश्च दृढव्रतः (शावाश्वस्य दृव्रतः A.) ॥ योगात्मानो महासत्त्वाः सर्वे ते वेदपारगाः । प्राप्य माहेश्वरं योगं रुद्रलोकं व्रजंति ते ॥ ततस्त्वेकोनविंशे तु परिवर्ते क्रमागते । व्यासस्तु भविता नाम्ना भारद्वाजो (भरद्वा° ?) महामुनिः ॥ तत्राप्यहं भविष्यामि जटामालीति नामतः । हिमवच्छिखरे रम्ये जटायुर्यत्र पर्वतः ॥ तत्रापि मम ते पुत्रा भविष्यंति महौजसः । हिरण्यनामा कौशल्यः काक्षीवः (कौशिल्यः काक्षिवः A.) कुथुमिस्तथा ॥ ईश्वरयोगधर्माणः सर्वे ते ह्यूर्ध्वरेतसः । प्राप्य माहेश्वरं योगं गमिष्यंति [न संशयः ॥ ततो विंशतिमे सर्गे परिवर्ते क्रमेण तु । वाचश्रवाः स्मृतो व्यासो भविष्यति] महामतिः ॥ तदाप्यहं भविष्यामि ह्यट्टहासेति नामतः । अट्टहासप्रियाश्चापि भविष्यंति तदा नराः ॥ तत्रैव हिमवत्पृष्ठे त्वट्टहासो [महागिरिः । भविष्यति] महातेजाः सिद्धचारणसेवितः ॥ तत्रापि मम ते पुत्रा भविष्यंति महौजसः । युक्तात्मानो महासत्त्वा ध्यानिनो नियतव्रताः ॥ सुमंतुर्वर्वरिर्विद्वान्सुबंधुः कुशिकंधरः । प्राप्य माहेश्वरं योगं रुद्रलोकाय ते गताः ॥ एकविंशे पुनः प्राप्ते परिवर्ते क्रमेण तु । वाचस्पतिः स्मृतो व्यासो यदा स ऋषिसत्तमः ॥ तदाप्यहं भविष्यामि दारुको नाम नामतः । तस्माद्भविष्यते पुण्यं देवदारुवनं महत् ॥ तत्रापि मम ते पुत्रा भविष्यंति महौजसः । प्लक्षो दाल्मायणिश्चैव केतुमाली नकस्तथा ॥ योगात्मानो महात्मानो नियता ह्यूर्ध्वरेतसः । परमं योगमास्थाय रुद्रं प्राप्तास्तथानघाः ॥ द्वाविंशे परिवर्ते तु व्यासः शुक्लायनो यदा । तदाप्यहं भविष्यामि वाराणस्यां महामुनिः ॥ नाम्ना वै लांगली भीमो यत्र देवाः सवासवाः । द्रक्ष्यंति मां कलौ तस्मिन्नवतीर्णं हलायुधं ॥ तत्रापि मम ते पुत्रा भविष्यंति सुधार्मिकाः । भल्वाचिर्मधुपिंगाक्षः श्वेतकेतुस्तथैव च (स्वेतकानु° A. In cod. B. totus versus deest.) ॥ तेऽपि माहेश्वरं योगं प्राप्य ध्यानपरायणाः । विरजा ब्रह्मभूयिष्ठा रुद्रलोकाय संस्थिताः ॥ परिवर्ते त्रयोविंशे तृणविंदुर्यदा मुनिः । व्यासो भविष्यति ब्रह्मा तदाहं भविता पुनः ॥ श्वेतो नाम महाकायो मुनिपुत्रः सुधार्मिकः । तत्र कालं जरिष्यामि तदा गिरिवरोत्तमे ॥ तेन कालंजरो नाम भविष्यति स पर्वतः । तत्रापि मम ते पुत्रा भविष्यंति महौजसः ॥ औशिजो वृहदुक्थिथश्च देवलः कविरेव च । प्राप्य माहेश्वरं योगं रुद्रलोकं गता हि ते ॥ परिवर्ते चतुर्विंशे ऋक्षो व्यासो भविष्यति । तत्राहं भविता ब्रह्मन् कलौ तस्मिन्युगांतके ॥ शूली नाम महायोगी नैमिषे योगिवंदिते । तत्रापि मम ते पुत्रा भविष्यंति तपस्विनः ॥ शालिहोत्रोऽग्निवेशश्च (ग्निवेश्यश्च A. B.) युवनाश्वः शरद्वसुः । तेऽपि योगबलोपेता रुद्रं यास्यंति सुव्रताः ॥ पंचविंशे पुनः प्राप्ते परिवर्ते यथाक्रमं । वासिष्ठस्तु यदा व्यासः शक्तिर्नाम भविष्यति ॥ तदाप्यहं भविष्यामि दंडिमुंडीश्वरः प्रभुः । कोटिवर्षं समासाद्य नगरं देवपूजितं ॥ तत्रापि मम ते पुत्रा भविष्यंति क्रमागताः । योगात्मानो महात्मानः सर्वे ते ह्यूर्ध्वरेतसः ॥ छगलः कुंभकर्णश्च कुंभश्चैव प्रबाहुकः । प्राप्य माहेश्वरं योगं गमिष्यंति तथैव ते ॥ षड्विंशे परिवर्ते तु यदा व्यासः पराशरः । तदाप्यहं भविष्यामि सहिष्णुर्नाम नामतः ॥ पुण्यं रुद्रवटं प्राप्य कलौ तस्मिन्युगांतके । तत्रापि मम ते पुत्रा भविष्यंति सुधार्मिकाः ॥ उलूको वैद्युतश्चैव शर्वको ह्याश्वलायनः । प्राप्य माहेश्वरं योगं गंतारस्ते तथैव हि ॥ सप्तविंशतिमे प्राप्ते परिवर्ते क्रमागते । जातूकर्ण्यो यदा व्यासो भविष्यति तपोधनः ॥ तदाप्यहं भविष्यामि सोमशर्मा द्विजोत्तमः । प्रभासतीर्थमासाद्य योगात्मा लोकविश्रुतः ॥ तत्रापि मम ते पुत्रा भविष्यंति सुधार्मिकाः । अक्षपादः कणादश्च उलूको वत्स एव च ॥ योगात्मानो महात्मानो विमलाः शुद्धबुद्धयः । प्राप्य माहेश्वरं योगं रुद्रलोकं ततो गताः ॥ अष्टाविंशे पुनः प्राप्ते परिवर्ते क्रमागते । पराशरसुतः श्रीमान्विष्णुर्लोकपितामहः ॥ यदा भविष्यति व्यासो नाम्ना द्वैपायनः प्रभुः । तदा षष्ठेन चांशेन कृष्णः पुरुषसत्तमः ॥ वसुदेवाद्यदुश्रेष्ठो वासुदेवो भविष्यति । तदा चाहं भविष्यामि योगात्मा योगमायया ॥ लोकविस्मयनार्थाय ब्रह्मचारी - - - : । श्मशाने मृतमुत्सृष्टं दृष्ट्वा लोकमनाथकं ॥ ब्राह्मणानां हितार्थाय प्रविष्टो योगमायया । दिव्यां मेरुगुहां पुण्यां त्वया सार्धं च विष्णुना ॥ भविष्यामि तदा ब्रह्मन् लकुली नाम नामतः । कायारोहणमित्येवं सिद्धक्षेत्रं च वै तदा ॥ भविष्यति तु विख्यातं यावद्भूमिर्धरिष्यति । तत्रापि मम ते पुत्रा भविष्यंति तपस्विनः ॥ कुशिकश्चैव गार्ग्यश्च मित्रको रुष्ट एव च । योगयुक्ता महात्मानो ब्राह्मणा वेदपारगाः ॥ प्राप्य माहेश्वरं योगं विमला ह्यूर्ध्वरेतसः । रुद्रलोकं गमिष्यंति पुनरावृत्तिदुर्लभं ॥ इत्येतद्वै मया प्रोक्तमवतारेषु लक्षणं । मन्वादिकृष्णपर्यंतमष्टाविंशं युगक्रमात् ॥ तत्र श्रुतिसमूहानां विभागो धर्मलक्षणं । भविष्यति तदा कल्पे कृष्णद्वैपायनो यदा ॥

24. De Brahmanis et Ṣivae origine. 25. De creatione. 26. De syllaba Om, e cujus elementis tres Vedae orti sunt. Quatuordecim vocalibus totidem Manues repraesentantur. 27. Octo Ṣivae nomina, locique in quibus singula colenda sunt: Rudra (सूर्यो मही जलं वह्निर्वायुराकाश एव च । दीक्षितो ब्राह्मणश्चंद्र इत्येते ब्रह्मधातवः ॥ तेषु पूज्यश्च वंद्यः स्याद्रुद्रस्तान्न हिनस्ति वै), Bhava = aqua, Ṣarva = terra,

[1] In cod. B. omnia inde a षोडशमे चापि परिवर्ते [क्रमा° usque ad महासत्त्वा] ध्यानिनो desiderantur.

Íṣána = ventus, Paṣupati = ignis, Bhíma, Ugra, Mahádeva. 28. De septem vatum divinorum prole. 29. De Agnis prole. Hoc caput a quinquagesimo Matsyapuráṇae capite non differt. 31 (fol. 72^b = B. 66^b). De manium generibus. Daksha Ṣivae imprecatione Práchínabarhishis filius, Prachetasis nepos nascitur. Dakshae sacrificium a Ṣiva dirimitur. Haec narratio iisdem verbis in Brahmapuráṇa (cod. 62, fol. 65^a) traditur. 31. De temporis divisione. 32. De quatuor mundi aetatibus. 33. De Manuis Sváyambhuvae prole, et de septem insularum terrestrium regibus. 34–53. Mundi descriptio. Magna pars in Matsyapuráṇa (capp. 102–115) iisdem verbis legitur. 54 (fol. 144^a = B. 125^b). De Nílakaṇṭhae, Ṣivae·epitheti, origine. 55. Ṣivae praestantia celebratur origine lingae, cujus magnitudinem neque Brahman neque Vishṇus emetiri potuerunt[1]. 56–58. Haec capita a Matsyapuráṇa (capp. 128–130) non differunt.

Codex, omnium quos equidem vidi sincerissimus, medio seculo quinto decimo videtur exaratus esse. Fol. 79. desideratur. Multa folia tam lacera sunt, ut librum, qui collaturi sunt, viri docti, ut summa cautione tractent, monendi sint. (Wilson 355.)

104.

Lit. Devan. Charta Ind. Foll. 270. Long. 14. Lat. 7. Linn. 13.

Váyupuráṇae pars utraque.

C. 59 (fol. 143^a). Hoc caput a Matsyapuráṇae c. 132. non differt. 60. De Vedarum divisione[2]: द्वापरे तु पुरावृत्ते मनोः स्वायंभुवेऽंतरे । ब्रह्मा मनुमुवाचेदं वेदं व्यस्य महामते ॥ परिवृत्तं युगं तात स्वल्पवीर्या द्विजातयः । संवृत्ता युगदोषेण सर्वं चैव यथाक्रमं ॥ भ्रष्टमानं युगवशादल्पशिष्टं हि दृश्यते । दशसाहस्रभागेन ह्यवशिष्टं कृतादिदं ॥ वीर्यं तेजो बलं चाल्पं सर्वं चैव प्रणश्यति । वेदे वेदा हि कार्याः स्युर्मा भूद्वेदविनाशनं ॥ वेदे नाशमनुप्राप्ते यज्ञो नाशं गमिष्यति । यज्ञे नष्टे देवनाशस्ततः सर्वं प्रणश्यति ॥ आद्यो वेदश्चतुष्पादः शतसाहस्रसंमितः । पुनर्दशगुणः कृत्स्नो यज्ञो वै सर्वकामधुक् ॥ एवमुक्तस्तथेत्युक्त्वा मनुर्लोकहिते रतः । वेदमेकं चतुष्पादं चतुर्धा व्यभजत्प्रभुः ॥ ब्रह्मणो वचनात्तात लोकानां हितकाम्यया । तदहं वर्तमानेन युष्माकं वेदकल्पनं ॥ [मन्वंतरेण वक्ष्यामि व्यतीतानां प्रकल्पनं ।][3] प्रत्यक्षेण परोक्षं वै तन्निबोधत सत्तमाः ॥ अस्मिन्युगे कृतो व्यासः पाराशर्यः परंतपः । द्वैपायन इति ख्यातो विष्णोरंशः प्रकीर्तितः ॥ ब्रह्मणा चोदितः सोऽस्मिन्वेदं व्यस्तुं प्रचक्रमे । अथ शिष्यान्स जग्राह चतुरो वेदकारणात् ॥ जैमिनिं च सुमंतुं च वैशंपायनमेव च । पैलं तेषां चतुर्थं तु पंचमं लोमहर्षणं ॥ ऋग्वेदश्रावकं पैलं जग्राह विधिवद्द्विजं । यजुर्वेदप्रवक्तारं वैशंपायनमेव च ॥ जैमिनिं सामवेदार्थश्रावकं सोऽन्वपद्यत । तथैवाथर्ववेदस्य सुमंतुमृषिसत्तमं ॥ इतिहासपुराणस्य वाक्योवाक्यस्य चैव हि । मां चैव प्रतिजग्राह भगवानीश्वरः प्रभुः ॥ एक आसीद्यजुर्वेदस्तं चतुर्धा व्यकल्पयत् । चातुर्होत्रमभूत्तस्मिंस्तेन यज्ञमकल्पयत् ॥ आध्वर्यवं यजुर्भिस्तु ऋग्भिर्होत्रं तथैव च । औद्गात्रं सामभिश्चक्रे ब्रह्मत्वं चाप्यथर्वभिः । ब्रह्मत्वमकरोद्यज्ञे वेदेनाथर्वणेन तु ॥[4] ततः स ऋच उद्धृत्य ऋग्वेदं समकल्पयत् । हौतृकं (होतृत्वं C.) कल्पयत्तेन यज्ञवाहं जगद्धितं ॥ सामभिः सामवेदं च तेनौद्गात्रमरोचयत् । राज्ञस्त्वथर्ववेदेन सर्वकर्माण्यकारयत् ॥ आख्यानैश्चाप्युपाख्यानैर्गाथाभिः कुलकुंकुभिः (कुल्य° C.) । पुराणसंहितां चक्रे पुराणार्थविशारदः ॥ यच्छिष्टं तु यजुर्वेदे तेन यज्ञमथायुजत् । युंजानः स यजुर्वेद इति शास्त्रविनिश्चयः ॥ पादानामुद्धृतत्वाच्च यजूंषि विषमाणि च । स तेनोद्धृतवीर्यैस्तु ऋत्विग्भिर्वेदपारगैः । प्रयुज्यते ह्यश्वमेधस्तेन (°धतेन C. aṣvamedhe?) वा युज्यते तु सः ॥ ऋचो गृहीत्वा पैलस्तु व्यभजत्तद्द्विधा पुनः । द्विः कृत्वा संयुगे चैव शिष्याभ्यामददात्प्रभुः ॥ इंद्रप्रमतये चैकां द्वितीयां बाष्कलाय च । चतस्रः संहिताः कृत्वा बाष्कलिर्द्विजसत्तमः ॥ शिष्यानध्यापयामास शुश्रूषाभिरतान्हितान् । बोध्यं तु प्रथमां शाखां द्वितीयामग्निमाठरं । पाराशरं तृतीयां तु याज्ञवल्क्यमथापरां ॥ इंद्रप्रमतिरेकां तु संहितां द्विजसत्तमः । अध्यापयन्महाभागं मार्कंडेयं यशस्विनं ॥ सत्यश्रवसमग्र्यं तु पुत्रं स तु महायशाः । सत्यश्रवाः सत्यहितं पुनरध्यापयद्द्विजं ॥ सोऽपि सत्पितरं (sic C. सच्छितरं B. सच्छितरं D.) पुत्रं पुनरध्यापयद्विभुः । सत्यश्रियं महात्मानं सत्यधर्मपरायणं ॥ अभवंस्तस्य शिष्या वै त्रयस्तु सुमहौजसः । सत्यश्रियस्तु विद्वांसः शास्त्रग्रहणतत्पराः ॥ शाकल्यः प्रथमस्तेषां तस्मादन्यो रथीतरः । बाष्कलिश्च भरद्वाज इति शाखाप्रवर्तकाः ॥ देवमित्रस्तु शाकल्यो ज्ञानाहंकारगर्वितः । जनकस्य स यज्ञे वै विनाशमगमद्द्विजाः ॥ Sequitur narratio de Devamitra Ṣákalya, qui a Yájnavalkya doctrinae certamine victus moritur. देवमित्रस्तु शाकल्यो महात्मा द्विजसत्तमः । चकार संहिताः पंच बुद्धिमान्पदवित्तमः ॥ तस्य शिष्या भवन्पंच मुद्गलो गोलकस्तथा । खालीयश्च (खालोपश्च B. खालोयश्च D.) तथा मत्स्यः शैशिरेयश्च पंचमः ॥[5] प्रोवाच संहितास्तिस्रः शाकपूणी रथीतरः (शाकपूणिरथीतरः C. शाकपूर्णरथंतरः B.) । निरुक्तं च पुनश्चक्रे चतुर्थं द्विजसत्तमाः ॥ तस्य शिष्यास्तु चत्वारः कैजयो वामनस्तथा । धर्मशर्मा देवशर्मा सर्वे व्रतधरा द्विजाः ॥ शाकल्ये च मृते सद्यो ब्रह्मघ्नास्ते बभूवतुः । ततश्चिंतां परां प्राप्य गतास्ते ब्रह्मणोऽंतिकं etc. 61. भारद्वाजो याज्ञवल्क्यो गालविः सालकिस्तथा । धीमान् शतबलाकश्च

---

[1] Occurrit ibi hoc Ṣivae dictum: अयं मे दक्षिणो बाहुर्ब्रह्मा लोकपितामहः । वामो बाहुश्च मे विष्णुर्नित्यं युद्धेषु निर्जितः ॥

[2] Cf. Vishṇupuráṇa III, 4.

[3] In hac parte codicibus E. I. H. 2102, 2103 (= C.) et 1310 (= D.) usus sum. Versus uncis inclusus in codd. B. D. desideratur.

[4] Hic versus subditivus est.

[5] मुद्गलो गोमुखश्चैव वात्स्यः शालीय एव च । शिशिरः पंचमश्चासीन्मैत्रेयस्तु महामुनिः ॥ Vishṇupuráṇa III, 4, 20. Pro Gomukha codices deterrimi गोखलु legunt.

नैगमश्च द्विजोत्तमाः ॥ बाष्कलिश्च भरद्वाजस्तिस्रः प्रोवाच संहिताः । रथीतरो निरुक्तं च पुनश्चक्रे चतुर्थकं ॥ त्रयस्तस्याभवन् शिष्या महात्मानो गुणान्विताः । धीमान्नंदायनीयश्च पन्नगानिश्च (पन्नगारिश्च B.D.) बुद्धिमान् ॥ तृतीयश्चार्जवस्ते च तपसा शंसितव्रताः । वीतरागा महातेजाः संहिताज्ञानपारगाः ॥ इत्येते बह्वृचां प्रोक्ता संहिता यैः प्रवर्तिताः । वैशंपायनगोत्रोऽसौ यजुर्वेदं व्यकल्पयत् ॥ षडशीतिस्तु येनोक्ता संहिता यजुषां शुभाः । शिष्येभ्यः प्रददौ ताश्च जगृहुस्ते विधानतः ॥ एकस्तत्र परित्यक्तो याज्ञवल्क्यो महातपाः । षडशीतिश्च तस्यापि संहितानां विकल्पकाः ॥ सर्वेषामेव तेषां वै त्रिधा भेदाः प्रकीर्तिताः । त्रिधा भेदास्तु ते प्रोक्ता भेदेऽस्मिन्नवमे शुभे ॥ उदीच्या मध्यदेशाश्च प्राच्याश्चैव पृथग्विधाः । श्यामायनिरुदीच्यानां प्रधानः संबभूव ह ॥ मध्यदेशप्रतिष्ठानामारुणिः प्रथमः स्मृतः । आलंबिरादिः प्राच्यानां त्रयोदश्यादयस्तु ते । इत्येते चरका प्रोक्ता संहितावादिनो द्विजाः ॥ ऋषयस्तद्वचः श्रुत्वा सूतं जिज्ञासवोऽब्रुवन् । चरकाध्वर्यवः केन कारणं ब्रूहि तत्त्वतः ॥ किं चीर्णं कस्य हेतोश्च चरकत्वं च भेजिरे । इत्युक्तः प्राह तेषां स चरकत्वमभूद्यथा ॥ सूत उवाच ॥ कार्यमासीदृषीणां च किंचिद्ब्राह्मणसत्तमाः । मेरुपृष्ठं समासाद्य तैस्तदास्त्विति मंत्रितं ॥ यो नोऽत्र सप्तरात्रेण नागच्छेद्द्विजसत्तमाः । स कुर्याद्ब्रह्मवध्यां वै समयो नः प्रकीर्तितः ॥ ततस्ते सगणाः सर्वे वैशंपायनवर्जिताः । प्रययुः सप्तरात्रेण यत्र संधिः कृतोऽभवत् ॥ ब्राह्मणानां तु वचनाद्ब्रह्मवध्यां चकार सः । शिष्यानथ समानीय स वैशंपायनोऽब्रवीत् ॥ ब्रह्मवध्यां चरध्वं वै मत्कृते द्विजसत्तमाः । सर्वे यूयं समागम्य ब्रूत मे तद्धितं वचः ॥ याज्ञवल्क्य उवाच ॥ अहमेव चरिष्यामि तिष्ठंतु मुनयस्त्विमे । बलं चोत्थापयिष्यामि तपसा स्वेन भावितः ॥ एवमुक्तस्ततः क्रुद्धो याज्ञवल्क्यमथाब्रवीत् । उवाच यत्त्वयाधीतं सर्वं प्रत्यर्पयस्व मे ॥ एवमुक्तः सरूपाणि यजूंषि प्रददौ गुरोः । रुधिरेण तथाक्तानि छर्दित्वा ब्रह्मवित्तमः ॥ ततः स ध्यानमास्थाय सूर्यमाराधयद्द्विजः । सूर्यं ब्रह्म यदुच्छिन्नं खं गत्वा प्रतितिष्ठति ॥ ततो यानि गतान्यूर्ध्वं यजूंष्यादित्यमंडलं । तानि तस्मै ददौ तुष्टः सूर्यो वै ब्रह्मरातये ॥ अश्वरूपश्च मार्तंडो याज्ञवल्क्याय धीमते । यजूंष्यधीयते यानि ब्रह्मणा (ब्राह्मणो B. D.) येन केनचित् ॥ अश्वरूपाणि दत्तानि ततस्ते वाजिनोऽभवन् । ब्रह्महत्या तु यैश्चीर्णा चरणाच्चरकाः स्मृताः ॥ वैशंपायनशिष्यास्ते चरकाः समुदाहृताः । इत्येते चरकाः प्रोक्ता वाजिनस्तु निबोधत ॥ याज्ञवल्क्यस्य शिष्यास्ते कण्ववैधेयशालिनः । मध्यंदिनश्च शापेयी विदग्धश्चाथ उद्दलः ॥ ताम्रायणश्च वात्स्यश्च तथा गालवशैषिरी (गोलवशैषिरी C. गालवशौपिरी B. गालवशैषिरी D.) । आटवी (आटवी C. अटव्या B. अटवी D.) च तथा पर्णी वीरणी सपरायणः ॥ इत्येते वाजिनः प्रोक्ता दश पंच च संमताः । शतमेकाधिकं कृत्स्नं यजुषां ये विकल्पकाः ॥ पुत्रमध्यापयामास सुमंतुमथ जैमिनिः । सुमंतुश्चापि सुन्वानं पुत्रमध्यापयत्प्रभुः ॥ स सहस्रमधीत्याशु सुकर्माप्यथ संहिताः । प्रोवाचाथ सहस्रस्य सुकर्मा सूर्यवर्चसः ॥ अनध्यायेष्वधीयानान् तान् जघान शतक्रतुः । प्रायोपवेशमकरोत्ततोऽसौ शिष्यकारणात् ॥ क्रुद्धं दृष्ट्वा ततः शक्रो वरमस्मै ददौ पुनः । भाविनौ ते महावीर्यौ शिष्यावनलवर्चसौ ॥ अधीयानौ महाप्राज्ञौ सहस्रसंहिता उभौ । एते सुरा महाभाग मा क्रुध्य द्विजसत्तम ॥ इत्युक्त्वा वासवः श्रीमान् सुकर्माणं यशस्विनं । शांतक्रोधं द्विजं दृष्ट्वा तत्रैवांतरधीयत ॥ तस्य शिष्योऽभवद्धीमान्पौष्पिंजिर्द्विजसत्तमाः । हिरण्यनाभः कौशिल्यो द्वितीयोऽभून्नराधिपः ॥ अध्यापयत्तु पौष्पिंजिः सहस्रार्धं तु संहिताः । ते नाम्नोदीच्यसामान्याः शिष्याः पौष्पिंजिनः शुभाः ॥ शतानि पंच कौशिल्यः संहितानां च वीर्यवान् । शिष्या हिरण्यनाभस्य स्मृतास्ते प्राच्यसामगाः ॥ लोकाक्षिः कुथुमिश्चैव कुशीतिर्लांगलिस्तथा । पौष्पिंजिशिष्याश्चत्वारस्तेषां भेदान्निबोधत ॥ राणायनीयः (रायाणनीयः C.) सहतंडिपुत्रस्तस्मादन्यो मूलवारी सुविद्वान् । सकैतिपुत्रः सहसान्यपुत्र एतान्भेदान्विद्ध लोकाक्षिणस्तु ॥ त्रयस्तु कुथुमेः पुत्रा औरसा सपराशराः (रसपासराः B. D.) । भागवित्तिश्च तेजस्वी त्रिविधाः कुथुमाः स्मृताः ॥ शैरिकः (शैरिद्युः C.) शृंगिपुत्रस्तु द्वावेतौ चरितव्रतौ । राणायनीयिः सौमित्रिः सामवेदविशारदौ ॥ प्रोवाच संहितास्तिस्रः शृंगिपुत्रो महातपाः । चैलः (चौल° C.) प्राचीनयोगश्च सुरालश्च (?) द्विजोत्तमाः ॥ प्रोवाच संहिताः षट् तु पाराशर्यस्तु कौथुमः । आसुरायणवैशाख्यौ वेदवृद्धपरायणौ ॥ प्राचीनयोगपुत्रश्च बुद्धिमांश्च पतंजलिः । कौथुमस्य तु भेदास्ते पाराशर्यस्य षट् स्मृताः ॥ लांगलिः शालिहोत्रस्तु (शालिगोत्रस्तु C.) स षट् प्रोवाच संहिताः । भालुकिः कामहानिश्च जैमिनिर्लोमगायिनिः (लोम° MSS.) ॥ कंदुश्च कोहलश्चैव षडेते लांगलाः स्मृताः । एते लांगलिनः शिष्याः संहिता यैः प्रसाधिताः ॥ ततो हिरण्यनाभस्य कृतिः शिष्यो (कृतशिष्यो MSS.) नृपात्मजः । सोऽकरोच्चतुर्विंशत्संहिता द्विपदां वरः ॥ प्रोवाच चैव शिष्येभ्यो येभ्यस्तान्वै निबोधत । राटुश्च (राडश्चन्मह° C.) महवीर्यश्च पंचमो वाहनस्तथा ॥ तालिकः (तालकाः B. तालकः D.) पांडकश्चैव कालिको राजिकस्तथा । गौतमश्चाजवस्तश्च सोमराजा यतकृतः (पतंजतः B. यतंततः D.) ॥ पृष्ठघ्नः परिकृष्टश्च उलूखलक एव च । यवीयसश्च वैशालो अंगुलीयश्च कौशिकः ॥ सालिमंजरिः सत्यश्च कापीयकानिकश्च यः । पाराशरश्च (परा° C.) धर्मात्मा इति क्रांतास्तु सामगाः ॥ सामगानां तु सर्वेषां श्रेष्ठौ द्वौ तु प्रकीर्तितौ । पौष्पिंजिश्च कृतिश्चैव संहितानां विकल्पकौ ॥ अथर्वाणं द्विधा कृत्वा सुमंतुरददाद्द्विजाः । कबंधाय गुरुः कृत्स्नं संचविद्या (sic C. सचविद्या B. D.) यथाक्रमं ॥ कबंधस्तु द्विधा कृत्वा पथ्यायैकं पुनर्ददौ । द्वितीयं वेदस्पर्शाय (वेददर्शाय Vishṇup.) स चतुर्धाकरोत्पुनः ॥ मोदो[1] ब्रह्मबलश्चैव पिप्पलादस्तथैव च । शौल्कायनिश्च (शौष्कायनिश्च C. शौका° B. शोक° D.) धर्मज्ञश्चतुर्थस्तु यंतः स्मृतः (चतुर्थः तपतः C.) ॥ वेदस्पर्शस्य चत्वारः शिष्यास्त्वेते दृढव्रताः । पुनश्च त्रिविधं विद्धि पथानां (पंथानां MSS.) भेदमुत्तमं ॥ जाजलिः कुमुदादिश्च तृतीयः शौनकः स्मृतः । शौनकस्तु द्विधा कृत्वा ददावेकं तु बभ्रवे ॥ द्वितीयां संहितां धीमान् सैंधवायनसंज्ञिते । सैंधवो मुंजकेशाय भिन्नां चास्य द्विधा पुनः ॥ नक्षत्रकल्पो वैतानस्तृतीयः संहिताविधिः । चतुर्थोऽंगिरसः कल्पः शांतिकल्पश्च पंचमः ॥ श्रेष्ठा ह्यथर्वणो ह्येते संहितानां विकल्पनाः । षट्शः कृत्वा मया प्रोक्तं पुराणमृषिसत्तमाः ॥ आत्रेयः सुमतिर्धीमान्काश्यपो ह्यकृतव्रणः । भारद्वाजोऽग्निवर्चाश्च वसिष्ठो मित्रयुश्च यः ॥ सावर्णिः सौमदत्तिस्तु सुशर्मा शांशपायनः । एते शिष्या मम ब्रह्मन्पुराणेषु दृढ-

---

[1] Pro मोदो Vishnupuránae codd. haec: मौंदो A. मैत्रो D. मौञ्जो B. C.

ब्रता: ॥ त्रिभिस्तिस्र: कृतास्तिस्र: संहिता: पुनरेव हि । काश्यप: संहिताकर्ता सावर्णि: शांशपायनि: ॥ सामिपा (सामिका D.) च चतुर्थी स्यात्सा चैषा पूर्वसंहिता । सर्वास्ता हि चतुष्पादा: सर्वाश्चैकार्थवाचिका: ॥ पाठांतरे पृथग्भूता वेदशाखा यथा तथा । चतु:साहस्रिका: सर्वा: शांशपायनिकामृते ॥ लोमहर्षणिका मूला तत: काश्यपिका परा । सावर्णिका तृतीयासामृजुवाक्यार्थपंडिता: । शांशपायनिका चांत्या नोदनार्थ(निदाना°?)विभूषिता ॥ सहस्राणि ऋचामष्टौ षट्शतानि तथैव च । एता: पंचदशान्याश्च दशान्या दशभिस्तथा ॥ वालिखिल्या: ससप्रैषा: ससावर्णा: प्रकीर्तिता: । अष्टौ सामसहस्राणि सामानि च चतुर्दश ॥ आरण्यकं सहोमं च एतद्गायंति सामगा: । द्वादशैव सहस्राणि छंद आध्वर्यवं स्मृतं ॥ यजुषां ब्राह्मणानां च तथा व्यासो व्यकल्पयत् । सग्राम्यारण्यकं तस्मात्समंत्रकरणं तथा ॥ अत: परं कथानां तु पूर्वा इति विशेषणं । ग्राम्यारण्यं समंत्रं च ऋग्ब्राह्मणयजु: स्मृतं ॥ तथा हारिद्रवीयाणां खिलान्युपखिलानि तु । तथैव तैत्तिरीयाणां परक्षुद्रा इति स्मृतं ॥ द्वे सहस्रे शतन्यूने वेदे वाजिसनेयके । ऋग्गण: परिसंख्यातो ब्राह्मणं च चतुर्गणं ॥ अष्टौ सहस्राणि शतानि चाष्टौ अशीतिरष्टाभ्यधिकश्च पाद: । एतत्प्रमाणं यजुषामृचां च सशुक्रियं साखिलयाज्ञवल्क्यं ॥ तथा चरणविद्यानां प्रमाणं संहितां शृणु । षट्सहस्रमृचामुक्तमृच: षड्विंशति: पुन: ॥ एतावदधिकं तेषां यजु: कामं विवक्षति । एकादशसहस्राणि दश चान्या दशोत्तरा: ॥ ऋचां दशसहस्राणि अशीतिं त्रिंशतानि च । सहस्रमेकं मंत्राणामृचामुक्तं प्रमाणत: ॥ एतावद्भृगुविस्तारमन्यच्चाथर्विकं बहु । ऋचामथर्वणां पंच सहस्राणीति निश्चय: ॥ सहस्रमन्यद्विज्ञेयमृषिभिर्विंशतिं विना । एतदंगिरसां प्रोक्तं तेषामारण्यकं पुन: ॥ इति संख्या प्रसंख्याता शाखाभेदास्तथैव च । कर्तारश्चैव शाखानां भेदहेतुस्तथैव च ॥ सर्वमन्वंतरेष्वेवं शाखाभेदा: समा: स्मृता: । प्राजापत्या श्रुतिर्नित्या तद्विकल्पास्त्विमे स्मृता: ॥ De vatum divinorum generibus, eorumque in singulis Manvantaris reditu. Desinit in hoc capite pars prior. 62 (fol. 155[b]). De Manvantaris et de creatione a Manubus singulis facta. De Prithuis Vainyae rebus gestis[1]. 63. De Prithuis prosapia. Dakshae origo. 64. Maríchae, Kaṣyapae filii, creatio. De Bhúr, Bhuvas, Svar mundis.

III. *Upodghátapáda.* 65 (fol. 164[b]). De Manuis Vaivasvatae creatione. De septem virorum sanctorum, creaturarum dominorum (Saptarshayas, Prajápatayas), origine, eorumque prosapia. 66. De Dharmae prole. Súta a viris sanctis interrogatus, quinam trium deorum praestantissimus esset, unum esse Deum respondit, eumque ad mundi creationem, conservationem, destructionem tres formas induisse (rájasí, sáttvikí, támasí tanús). Sicut enim adamas, quamvis unicolor, crystallo repercussus, varios colores exhiberet, ita Creatorem, in mundo se manifestantem, et unum esse et tergeminum. एकास्तन्व: स्मृता वेदे धर्मशास्त्रे पुरातने । सांख्ययोगपरैर्वीरै: पृथगेकार्थदर्शिभि: ॥ अभिजातप्रभावद्भिर्ऋषिभिस्तत्त्वदर्शिभि: । एकत्वं च पृथक्त्वं च तास्तु भिन्ना: प्रजा इह ॥ इदं परमिदं नेति ब्रुवते भिन्नदर्शना: । ब्रह्माणं कारणं केचित्केचित्प्राहु: प्रजापतिं ॥ केचिच्छिवं परत्वेन प्राहुर्विष्णुं तथापरे । अविज्ञानेन संसक्ता: शक्त्या रत्यादिचेतस: ॥ तत्त्वं कालं च देशं च कार्यं चावेक्ष्य तत्त्वत: । कारणं तु स्मृता ह्येते नानार्थे त्विह देवता: ॥ एकं प्रशंसमानस्तु सर्वानेव प्रशंसति । एकं निंदति यस्तेषां सर्वानेव स निंदति ॥ एकं यो वेत्ति पुरुषं तमाहुर्ब्रह्मवादिनं । अद्वेषस्तु सदा कार्यो देवतासु विजानता ॥ न शक्यमीश्वरं ज्ञातुमैश्वर्येण व्यवस्थितं । एकात्मा स त्रिधा भूत्वा संमोहयति य: प्रजा: ॥ Reliquos vero deos e tribus principalibus emanasse. 67. Duodecim dei, *Jaya* appellati, quum a Brahmane ad creationem propagandam geniti officium neglexissent, ea poena affecti sunt, ut usque ad finem Vaivasvata aevi renascerentur: ब्रह्मणो वै मुखात्सृष्टा जया देवा: प्रजेप्सया । सर्वे मंत्रशरीरास्ते स्मृता मन्वंतरेष्विह ॥ दर्शश्च पौर्णमासश्च बृहद्यच्च रथंतरं । आकूत: प्रथमस्तेषां तत: स्वाकूतिरुच्यते ॥ वित्तिश्चैव सुवित्तिश्च आकूति: कूतिरेव च । अधीतिश्च (अधीष्टश्च C. D.) ततो ज्ञेय आधीतिश्चैव (अधी° C. D.) तत्त्वत: । विज्ञातिश्चैव विज्ञातो मनवो ये च द्वादश ॥ Quare deinceps Ajita, Tushita, Satya, Hari, Vaikuṇṭha, Sádhya, Áditya nominibus oriuntur. De gigantum et Marutum origine. 68. De Danuis prosapia. 69. Minorum gentium dei, velut Gandharvae, Apsarae, Yakshae, et animalia enumerantur. 70. Regum institutio. Vatsárae (Vatsara B.) et Asitae, Kaṣyapae filiorum, proles. Reliquorum creationis dominorum filii. 71 (fol. 196[a])–82. De manium cultu praecepta, a Brihaspati cum Ṣamyu filio communicata. 83 (fol. 223[b])–95. Regum historia. Sed in codice nostro in folio 231[a]. l. 10. lacuna quam maxima exstat. Omnia enim desiderantur, quae in cod. C. fol. २६२–३०३. leguntur.

---

[1] In hoc capite Sútae et Mágadhae origo narratur. Atque de Súta eadem verba, quae in prooemio leguntur, de Mágadha vero haec: तस्मिन्नेव समुत्पन्ने पुनर्जज्ञे तु मागध: । सामगेषु तु गायत्सु सुग्भांडे वैश्वदेविके । समागते समुत्पन्नस्तस्मान्मागध उच्यते ॥ Uterque quomodo praecones instituti sint, ita refertur: पृथो: स्तवार्थं तौ तत्र समाहूतौ महर्षिभि: । तावूचुर्मुनय: सर्वे स्तूयतामेष पार्थिव: ॥ कर्मैतदनुरूपं च पात्रं चायं नराधिप: । तावूचतुस्तदा सर्वांस्तानृषीन्सूतमागधौ ॥ आवां देवानृषींश्चैव प्रीणयाव: स्वकर्मभि: । न चास्य कर्म वै विद्मो न तथालक्षणं यश: ॥ स्तोत्रं येनास्य कुर्याव राज्ञस्तेजस्विनो द्विजा: । ऋषिभिस्तु नियुक्तौ तु भविष्यै: स्तूयतामिति ॥ दानधर्मरतो नित्यं सत्यवाक्संजितेंद्रिय: । ज्ञानशीलो वदान्यस्तु संग्रामेष्वपराजित: ॥ यानि कर्माणि कृतवान्पृथुश्चापि महाबल: । तानि शीलेन बद्धानि स्तुवद्भि: सूतमागधै: ॥ तत: स्तवांते सुप्रीत: पृथु: प्रादात्प्रजेश्वर: । अनूपदेशं सूताय मगधान्मागधाय च ॥ तदा (ततो?) वै पृथिवीपाला: स्तूयंते सूतमागधै: । आशीर्वादै: प्रबोध्यंते सूतमागधवंदिभि: ॥ Cf. Vishṇupuráṇa I, 13. quod caput etiam in ceteris rebus cum nostro consentit.

. IV. *Upasanhára.* 96 (fol. 244[a]). De Manvantaris futuris. De mundi dissolutione et restitutione. De temporis computatione. 97. De septem mundis eorumque praesidibus. De locis inferis. Ṣivae coelum celebratur. 98, 99. De numinis summi cognitione.

Codex hujus seculi initio negligenter exaratus est. (WILSON 120.)

105.

Lit. Devan. Charta Ind. Foll. 403. Long. 11¼. Lat. 4¾. Linn. 10.

Váráhapuráṇam, a Vishṇu, verris formam gerente, cum Terra communicatum. (A.) Incipit: नमस्तस्मै वराहाय लीलयोद्धरते महीं । खुरमध्यगतो यस्य मेरुः खणखणायते ॥१॥ दंष्ट्राग्रेणोद्धृता गौरुदधिपरिवृत्ता (l. °वृता) पर्वतैर्निम्नगा[f]भ स्तोकं मृत्पिंडवत्प्राग्बृहदुरुवपुषानंतरूपेण (l. bṛihaduru) येन ॥२॥ सो यं कंसासुरारिर्मुरन[र]कदशास्यांतकृत्सर्वसंस्थः । कृष्णो विष्णुः सुरेशो नुदतु मम रिपूनादिदेवो वराहः ॥३॥ सूत उवाच ॥ यस्मिन्काले क्षितिः पूर्वं वराहवपुषा तु सा । उद्धृता विष्णुना शक्या (l. ṣaktyá) जगाद परमेश्वरं ॥४॥ धरण्युवाच ॥ कस्य कल्पे भवानेव मां समुद्धरते विभोः । न चाहं वेद ते मूर्तिं मादिसर्गं च केशव ॥५॥ वेदेषु चैव नष्टेषु मत्स्यो भूत्वा रसातलं । प्रविश्य तांस्तथोत्कृष्य ब्रह्मणे दत्तवानसि ॥ अन्यत्सुरासुरमयं त्वं समुद्रस्य मंथने । वृत्तवानसि (धृतवानसि B.) कौर्म्येण मंदरं मधुसूदन ॥७॥ पुनश्च गां जगन्नाथ निमज्जंति (l. nimajjantím) रसातलात् । उज्जहारैकदंष्ट्रेण भगवान्वै महार्णवान् (°t) ॥८॥ अन्यद्धिरण्यकशिपुर्वरदानेन दर्पितः । आबाधमानः पृथिवीं स त्वया विनिपातितः ॥९॥ (बलिस्तु बद्धो भगवंस्त्वया वामनरूपिणा ।)[1] पुनर्निःक्षत्रिया देव त्वया चापि पुरा कृता ॥१०॥ जामदग्न्येन रामेण त्वया भूत्वा सकृत्प्रभो(:) । पुनश्च रावणो रक्षः क्षपित[:] स्वातेजसा ॥११॥ बलिः प्रबद्धो भगवन्स्त्वया वामनरूपिणा । न च जानामहं (°námy aham) देव तव किंचिद्विचेष्टितं । उधृत्य मां कथं सृष्टिं सृजसे किं च कारणं ॥ संकृष्ट्ये च कृत्वा तं कारणं (सकृद्धियेत कृत्वा च पाल्यते चापि केन वा B.) । केन वा सुलभा देवा सृजन्ना सन्ना सन्नतं विभो ॥ कथं च सृष्टेरादि स्यादवशानं कथं भवेत् । कथं युगस्य गणना संख्या स्यातु चतुर्युगं ॥ के वावस्था महेश्वरः (को वा विशेषो तेष्वस्मिं का वा संस्था महेश्वरी B.) । तन्वानः (यज्वानः B.) के च राजानः केन सिद्धिं परां गताः ॥ एतत्सर्वं समासेन कथयास्व प्रसीद मे । इत्युक्त्वा क्रोधरूपेण (ity uktaḥ kroḍarúpeṇa) जहास परमेश्वरः ॥ हसतस्तस्य देवस्य वदने साक्षैक्षितौ वसवः (l. हसतस्तस्य कुक्षौ तु जगद्धात्री) ददर्श ह । रुद्रान्देवान्सहवसुसिद्धसंघोन्महर्षिभिः ॥ सचंद्रसूर्येग्र(?)हसप्तलोकानंत[:]स्थिताभाव उपातधर्म्मान् । इतिदर्शं (पत्नी) पश्यति सा समस्तं त्वतावत्क्षिति सर्वेपितत्सर्वगात्रा (यावत्क्षितिर्वेपितसर्वगात्रा B.) ॥ उन्मीलितास्यस्तु यदा महात्मा पृष्टो धरण्यामलसर्वगात्रा । तावत्स्वरूपेण चतुर्भुजेन महोदधौ सप्तमथान्वपश्यत् (suptam etc.) ॥ शेषपर्यंकशयने सुप्तं देवं जनार्दनं । दृष्ट्वा तंनाभिपंकोत्थमंतस्थं तं चतुर्भुजं । कृतांजलिपुटा देवी स्तुतिं धात्रि (dhátrí) जगाद ह ॥ धरण्युवाच ॥ नमः कमलपत्राक्ष नमस्ते पीतवाससे । नमः सुरारिविध्वंसकारिणे परमात्मने ॥ शेषपर्यंकशयने धृतवक्षस्थलाश्रये (dhṛitavakshaḥsthalaṣriye) । नमस्ते सर्वदेवेश नमस्ते मोक्षकारिणे ॥ नमः शार्ङ्गासिचक्राय जन्ममृत्युविवर्जिते (°jita) । नमो नाभ्योस्थित(l. नाभ्युत्थित)महाकमलासनजन्मने ॥ नमो विद्रुमरक्ताय पाणिपल्लवशोभिते (°ne) । शरणं त्वां प्रपन्नास्मि त्राहि तारिमनागसं (l. nárím) ॥ पूर्णो नीलांजनाकारं व[र]राहं ते जनार्दनं । दृष्ट्वा भीतास्मि भूयोपि जगत्वदिहगोचरं (जगत्त्वद्देहगोचरं) ॥ इदानीं कुरु मे नाथ दयां त्राहि महाभयात् । केशवः पातु मे पादौ जंघे नारायणो मम ॥ माधवो मे कटिं पातु गोविंदो गुह्यमेव च । नाभिं विष्णुस्तु मे पातु उदरं मधुसूदनः ॥ उ(द)रस्त्रिविक्रमः पातु हृदयं पातु वामनः । श्रीधरः पातु मे कंठं हृषीकेशो मुखं मम ॥ एवं न्यस्य हरेर्न्यासं नामानी (°ni) जगती तदा । नमस्ते भगवन् विष्णोरित्युक्त्वा वीरराम ह (भगवन्विष्णो इत्युक्त्वा वि°) ॥१॥

Cf. Wilson, Vishnupurána, p. XLIV. Cap. 1. Prooemium. 2. De creatione. Sávitrí dea Vedas tres complectitur. 3. Nárada coram Priyavrata, quae in vita priore sibi accidissent, enarrat. 4. De Náráyaṇae formis variis. Aṣvaṣiras rex a Kapila et Jaigíshavya, Vishṇum esse omniformem, edocetur. 5. Animae a metempsychosi liberatio ita obtinetur, si opera, numinis cognitione respecta, fiant. यत्किंचित्कुरुते कर्म पुरुषः साध्वसाधु वा । सर्वं नारायणे न्यस्य कुर्वन्नेव न लिप्यते ॥ et infra: एवं ज्ञानं भवेत्कर्म कुर्वतोऽपि स्वजातिकं भवेन्मुक्तिः etc. 6. Vasu, Káṣmíriae rex, Pushkarae Vishṇum, Puṇḍaríkákshae formam gerentem, celebrat, ibique quae a se in vita priore gesta essent certior fit. 7. Gayae sanctitas Raibhyae rebus gestis narratis celebratur. 8. Narratio de venatore quodam pio, cujus jam in cap. 6. mentio injecta est. 9. De creatione a Náráyaṇa aevo aureo facta. 10. De Durjayae, Supratíkae regis filii, rebus gestis. 11 (fol. 26[b] = B. 14[a])–12. Durjaya quum Gauramukhae anachoretae gemmam magicam eripere voluisset, Vishṇuis potentia coercetur. 13, 14. Gauramukhae cum Márkaṇḍeya de manium cultu colloquium, Prabhásae habitum. 15. Gauramukha Vishṇu celebrato cum numine conjungitur (layam jagáma). 16. Indra quum bobus sacrificaturus esset (gomedha), vaccae a Vidyut et Suvidyut Asuris abreptae sunt. Quas quum Saramá quaesivisset, lactis dono corrupta est, quum vero ab Indra vapularet, lac evomuit, et in Asurarum latebras confugit, et hoc modo vaccae ab Indra repertae sunt[2]. Quantum,

[1] Scribae errore hic versus ex iis, quae infra leguntur, repetitus est.

[2] Eadem ratione mythus in Bṛihaddevatá libro narratur. Cf. Kuhn, in Haupt Zeitschrift, VI, 121.

eheu, haec narratio a pulcherrimo illo Ṛigvedae (X, 108) carmine distat! 17–36. Prajápálae regis cum Mahátapase anachoreta de deorum origine colloquium. 17. A Vishṇu deos omnes esse creatos, narratione, Bṛihadáraṇyakae nimis simili, probatur: deos nimirum singulos quosque, quo suas esse in mundo partes summas demonstrarent, corpus priscum illud genitale (prájápatyam ṣaríram) reliquisse, idque tamen viguisse (na ṣíryate). 18, 19. Agnis origo. 20. Aṣvinum origo. 21 (fol. 48[a] = B. 26[a]). 22. Gauris deae origo. 23. Gaṇeṣae origo. 24. Serpentium origo. 25. Kárttikeyae origo. 26. Solis origo. 27. Ṣiva quum cum Andhaka pugnaret, matres mysticae eorumque proles ortae sunt. 28. Ad Vaitrásuram occidendum Máyá Durgae formam induit. 29. Regionum origo. 30. Kuverae origo. 31 (fol. 68[a] = B. 37[b]). Numen summum ipsum, quo creationem tueretur, Vishṇuis forma se manifestavit. 32. Dharmae origo. 33. Rudrae origo. 34. Manium origo. 35. Somae dei origo. 36. Tandem Prajápála rex, se aevo aureo Suprabha nomine regem fuisse certior factus, Vishṇu celebrato diem supremum obit. 37. Venator quidam, Áruṇis anachoretae majestate permotus, vita scelesta relicta Vishṇuis cultor evadit. 38. Idem a Durvásase libros sacros edocetur. Jam variae cerimoniae enumerantur. 39. Matsyadvádaṣívratam (Márgaṣire máse). 40. Kúrmadvádaṣívratam (Paushe). 41. Váráhadvádaṣívratam (Mághe, site paxe). 42. Narasinhadvádaṣívratam (Phálgune, s. p.). 43. Vámanadvádaṣívratam (Chaitre, s. p.). 44. Jámadagnyadvádaṣívratam (Vaiṣákhe). 45. Rámadvádaṣívratam (Jyeshṭhe). 46. Kṛishṇadvádaṣívratam (Áshádhe). 47. Buddhadvádaṣívratam (Ṣrávaṇe, s. p.). Kalkidvádaṣívratam (Bhádrapade, s. p.)[1]. 48 (fol. 79[a] = B. 50[b]). Padmanábhadvádaṣívratam (Áṣvayuje, s. p.). 49. Kárttikadvádaṣívratam. 50–68. Agastyae cum Bhadráṣva Ṣvetaváhana rege colloquium (Agastyagítás). 50–52. De Paṣupála rege narratio, παραβολικῶς explicanda. 53. Bhartṛipráptivratam (vasante ṣuklapakshe dvádaṣyám). 54. Ṣubhavratam (Kárttikadvádaṣyám). 55. Dhanyavratam (मार्गशीर्षे सिते पक्षे प्रतिपच्चा तिथिर्भवेत्). 56. Kántivratam (Kárttikasya dvitíyáyám site dine). 57. Saubhágyavratam (incipit Phálgunasya tṛitíyáyám ṣukle pakshe). 58. Avighnavratam (Phálgunasya chaturthyám). 59. Ṣántivratam (Kárttikasya panchamyám ṣ. p.). 60. Kámyavratam (Paushasya shashṭhyám ṣ. p.). 61 (fol. 92[a] = B. 58[a]). Árogyavratam. 62. Putrapráptivratam (Bhádrapadasyáshṭamyám kṛishṇe p.). 63. Ṣauryavratam (Áṣvayujasya navamyám). 64. Sárvabhaumavratam (Kárttikasyáshṭamyám ṣ. p.). 65. Huic capiti Náradapuráṇasúchanam titulus subscriptus est. Neque temere. Vishṇus enim Náradam, devotionis instrumenta percunctantem, his alloquitur: अलाभे वेदशास्त्राणां पंचरात्रोदितेन हि । मार्गेण मां यजंते ये ते मां प्राप्स्यंति नारद ॥ ब्राह्मणक्षत्रियविशां पंचरात्रं विधीयते । शूद्रादीनां तु (न?) तच्छ्रोत्रपदवीमुपयास्यति ॥ एवं मयोक्तं विप्रेंद्र पुराकल्पे पुरातनं । पंचरात्रसहस्राणां यदि कश्चिद्ग्रहिष्यति ॥ कर्मक्षयेच्च मां कश्चिद्यदि भक्तो भविष्यति । तस्य चेदं पंचरात्रं नित्यं हृदि वसिष्यति ॥ इतरे राजसैर्भावैस्तामसैश्च समावृताः । भविष्यंति द्विजश्रेष्ठ मच्छासनपराङ्मुखाः ॥ कृतं त्रेता द्वापरं च युगानि त्रीणि नारद । सत्त्वस्थानं गमिष्यंति कली रजस्तमोधिकः ॥ अन्यच्च ते वरं दद्मि शृणु नारद सांप्रतं । यदिदं पंचरात्रं मे शास्त्रं परमदुर्लभं ॥ तद्भवान्वेत्स्यते सर्वं मत्प्रसादान्न संशयः । वेदेन पंचरात्रेण भक्त्या यज्ञेन च द्विज । प्राप्योऽहं नान्यथा वत्स वर्षकोट्ययुतैरपि ॥ 66. Parabolae supra laudatae explicatio. 67. De ordinum commercio prohibito (agamyágamanam). 68. Agastya miraculum, quod ipsi olim evenit, refert. 69–88. Agastya colloquium repetit, quod Rudra olim secum habuisset (Rudragítás). 69. Vishṇuis majestas celebratur. 70. Rudra quum Creatorem unicum esse, at trifaria forma se manifestare declarasset[2], a viris sanctis interrogatus, cur igitur institutiones ipsi proprias revelasset, haec ait: Gautamam olim in Daṇḍaka silva fame exorta magnum anachoretarum numerum sustentasse. Cui infensus quum Ṣáṇḍilya vaccam veneficio factam in segetes immisisset, eam a Gautama occisam esse. Quo facto anachoretas omnes eremum reliquisse, non aliter scelus illud expiari posse declarantes, nisi vacca illa Gangis aqua in vitam revocaretur. Gautamam id quidem austera devotione effecisse, at, quum insidias sibi structas esse comperisset, anachoretas illos exsecratum esse, ut per omne aevum coma promissa, cinere cooperti, falsa pietatis specie degerent, librorumque sacrorum expertes essent. Horum in usum se postmodum novum institutionum codicem revelasse: भवितारो द्विजोत्तमाः ॥ कलौ त्वद्रूपिणः सर्वे जटामुकुटधारिणः । स्वेच्छया प्रेतवेषाश्च मिथ्या लिंगधराः प्रभो ॥ तेषामनुग्रहार्थाय किंचिच्छास्त्रं प्रदीयतां । ये चास्मद्वंशजाः सर्वे वर्तेयुः कलिपीडिताः ॥ एवमभ्यर्थितस्तैस्तु पुराहं द्विजसत्तमाः । वेदक्रियासमायुक्तां कृतवानस्मि संहितां ॥ निःश्वासाख्यां ततस्तस्यां लीना बाभ्रव्यशांडिलाः । अल्पापराधाच्छ्रुत्वैव गता वैट्टालिकाभवं (गतास्ते दांभिकं भवन् B.) ॥ मयैव मोहितास्ते तु भविष्यं जानता द्विजाः । लौल्यार्थिनः स्वशास्त्राणि करिष्यंति कलौ नराः ॥ निःश्वाससंहिता या (यां MSS.) हि लक्षमात्रं प्रमाणतः । सैव पाशुपती दीक्षा योगः पाशुपतस्तथा ॥ एतस्माद्वेदमार्गाद्धि यदन्यदिह जायते । तत्क्षुद्रकर्म विज्ञेयं रौद्रं शौचविवर्जितं ॥ ये रुद्रमुपजीवंति कलौ वैट्टा-

---

[1] Capita 39—47. in codice A. desiderantur.

[2] यज्ञेऽस्मिन्यद्धुतं हव्यं मामुद्दिश्य महर्षयः । ते त्रयोऽपि समं भागं गृह्णीमः सुरसत्तमाः ॥ नास्माकं विविधो भावो वर्तते मुनिसत्तमाः । सम्यग्दृशः प्रपश्यंति विपरीतेष्वनेकशः ॥

लिका नराः । उच्छुष्मरुद्रास्ते ज्ञेया नाहं तेषु व्यवस्थितः ॥ भैरवेण स्वरूपेण देवकार्ये यदा पुरा । नर्तितं तु मया सोऽयं संबंधः क्रूरकर्मणां ॥ क्षयं निनीषता दैत्यान्सोऽट्टहासो मया कृतः । यः पुरा तत्र ते मह्यं पतिता अश्रुविंदवः ॥ असंख्यातास्तु ते रौद्रा भवितारो महीतले । उच्छुष्मनिरता रौद्रा सुरामांसप्रियाः सदा । स्त्रीलोलाः पापकर्माणः संभूता भूतलेषु ते ॥ 71 (fol. 102^b = B. 66^a). De trinitate et unitate. 72. Rudra omnem potentiam Náráyaṇae se debere confitetur[1]. 73. De insulis septem mundanis eorumque dominis. 74–88. Mundi descriptio. 89–91. Ad Andhakae caedem trium deorum conjunctione *Trikalá* sive *Triṣakti* dea oritur, nimirum ea forma creationem repraesentans. 92 (fol. 124^a = B. 79^b)–94. Mahishae gigantis caedes. 95. Rurus gigas a Chámuṇḍa occiditur. 96. De Ṣiva Calvifero narratio, quae eodem fero modo atque in Vámanapuráṇa traditur. 97. Oratio ad venatorem illum pium (capp. 37, 38), Satyatapas appellatum, redit, et miraculum quoddam narratur. 98. Duodecimus Kárttikae mensis clarilunii dies prae ceteris Vishṇui sacer est. Incipit hoc loco Vasishṭhae cum Ṣveta rege de variarum largitionum piarum generibus colloquium. Tiladhenudánam. 99. Jaladhenuvidhis. 100. Rasadhenus. 101 (fol. 138^a = B. 88^b). Guḍadhenus. 102. Ṣarkarádhenus. 103. Madhudhenus. 104. Kshíradhenus. 105. Dadhidhenus. 106. Navanítadhenus. 107. Lavaṇadhenus. 108. Karpásadhenus. 109. Dhányadhenus. 110. Kapilámáhátmyam. Sub finem hujus capitis puráṇae enumerantur. इयं मया हि ते देवि कथिता सार्वकामिका । वराहाख्या वरारोहे सर्वपातकनाशनी ॥ सर्वज्ञा दुहिता चेयं ततो ब्रह्मा बुबोध ह । ब्रह्मापि स्वसुते प्रादात्पुलस्त्याय महात्मने ॥ सोऽपि रामाय च प्रादाद्भार्गवाय महात्मने । असावपि स्वशिष्याय प्रादाद्गर्गाय (प्रादादुग्रीय A. प्रादादुर्गाय B.) धारिणि ॥ गर्गोऽपि (दुग्रोंपि A.) मनवे प्रादात् दशवः (?) कीर्तितो मया । संबंधः पूर्वकालोक्तो द्वितीयं शृणु सांप्रतं ॥ सर्वज्ञो (सर्वज्ञा A. B.) लब्धवानस्मि त्वं च मत्तो धराधरे । त्वत्तश्च तपसा युक्ता वेत्स्यंति कपिलादयः ॥ क्रमेण यावद्व्यासेन ज्ञातमेतद्भविष्यति । तस्यापि शिष्यो भविता नाम्ना वै रोमहर्षणिः ॥ असौ शुनकपुत्रस्य कथयिष्यति नान्यथा । अष्टादश पुराणानि वेद द्वैपायनो गुरुः ॥ ब्राह्मं पाद्मं वैष्णवं च शैवं भागवतं तथा । तथान्यन्नारदीयं च मार्कंडेयं च सप्तमं ॥ आग्नेयमष्टमं प्रोक्तं भविष्यं नवमं तथा । दशमं ब्रह्मवैवर्तं लैंगमेकादशं स्मृतं ॥ वाराहं द्वादशं प्रोक्तं स्कांदं चापि त्रयोदशं । चतुर्दशं वामनं च कौर्मं पंचदशं तथा । मात्स्यं च गारुडं चैव ब्रह्मांडं च ततः परं ॥[2] 111 (fol. 150^a = B. 95^a). Vishṇuis laudes. 112. Vishṇus a terra interrogatus ordinum quatuor officia enarrare incipit. 113. De facinoribus et piis et scelestis. 114. Triginta duae res enumerantur, maximam partem ad cibum, vestimenta, munditiam pertinentes, quae a Vishṇuis cultore vitandae sunt. 115. Jam quibus adjumentis ii, quos delictorum suorum poeniteat, Vishṇum conciliare debeant, deinceps traditur. Atque primum preces commendantur. 116. De cibi generibus in jejunio vitandis. 117. Preces tribus solennibus diei temporibus (trisandhyá) adhibendae. 118. Facinora proba et honesta enumerantur, quibus peractis homines a metempsychosi liberantur. 119. Kokámukha (sive Koká) locus prae ceteris Vishṇui sacratus est. 120. Duodecimus Kárttikae mensis dies aliaque stata anni tempora Vishṇui sacra sunt. 121 (fol. 168^b = B. 108^a). Duodecimo Phálgunae mensis clarilunii die Vishṇus vernis floribus colendus est. 122. Quaecunque in mundo mira et intelligentiam humanam excedentia eveniunt, ea omnia Vishṇuis potestate mystica (máyá) fiunt. Eidemque, quae deis singulis in mundo gubernando tribuuntur provinciae, debentur: या एता देवताः सर्वा यज्ञभागेन तोषिताः । मायामेतामहं कृत्वा तोषयामि दिवौकसः ॥ लोकाः सर्वे विजानंति देवा नित्यं मखाशिनः । मायामेतामहं कृत्वा रक्षामि त्रिदशान्सदा ॥ सर्वोऽपि भजते लोको यष्टारं च वृहस्पतिं । मायामांगिरसीं कृत्वा याजयामि दिवौकसः ॥ सर्वे लोका विजानंति वरुणः पाति सागरं । मायां तु वारुणीं कृत्वा अहं पामि महोदधिं ॥ सर्वे लोका विजानंति कुवेरोऽयं धनेश्वरः । कुवेरमायामादाय अहं रक्षामि तद्धनं ॥ एवं लोका विजानंति वृत्रः शक्रेण सूदितः । शाक्रीं मायां समास्थाय मया वृत्रो निपातितः ॥ etc. Additur narratio satis absurda de Somaṣarmane sacerdote, qui quum a Vishṇu petivisset, ut potentiam magicam sibi manifestaret, in mulierem transformatus, varia fata subiit. 123. De Kubjámraka, loco sacro, ad Gangem sito, ejusque sacellis. Quo loco Raibhya, vir sanctissimus, Vishṇum coluisse dicitur. 124. De Bráhmaṇae initiatione (bráhmaṇadíkshásútram). 125. De reliquorum ordinum initiatione. Ne Ṣúdra quidem excluditur. 126. Ceremoniae et preces a viris Vishṇui devotis faciendae. 127. Jam quem ad modum triginta et duo delicta illa, quae cap. 114. enumerata sunt, lustrentur, exponitur. Rájánnapráyaṣchittam. Si sectae Bhágavatae socius a rege alimenta sumserit, piaculum esto. 128. Dantakáshṭha-abhakshaṇam. Qui ad Vishṇum venerandum accedunt, antea ligno quodam ad dentes purgandos uti debent. (दंतकाष्ठमखादित्वा यः कर्माणि करोति ते प्रायश्चित्तं च मे ब्रूहि etc.)[3] 129. गत्वा मैथुनं संयोगं यो नु मां स्पृशते नरः । स्पृष्ट्वा रजस्वलां नारीं etc. Neve cadavere tacto

[1] Quae in hoc capite leguntur, similiter in pluribus puráṇis recurrunt, e. g. in Váyupuráṇae cap. 24.

[2] Hoc loco prior libri pars desinere videtur.

[3] दंतकाष्ठ 'a bit of wood used by the natives of India to cleanse their teeth.' Carey. Idque lignum duodecim digitos longum fuisse, alio loco traditur. De eodem in cap. 206. haec: अमायां च विशालाक्षि दंतकाष्ठं न खादयेत् । etc.

युष्मत्पादरजःपातधौतनिःशेषकल्मषं ॥ 91.
अल्पं निर्मितमाकाशमनालोच्यैव वेधसा ।
इदमेवंविधं भावि भवत्याः स्तनजृंभणं ॥ 92.
पद्मान्यर्कांशुनिष्ठ्यूताः पीत्वा पावकविप्रुषः ।
भूयो वमंतीव मुखैरुद्गीर्णारुणरेणुभिः ॥ 97.
गुरुगर्भभराक्रांता नमंत्यो मेघपंक्तयः ।
अचलाधित्यकोत्संगसीमाः समधिशेरते ॥ 98.

Svabhávokti.

तुंडैराताम्रकुटिलैः पक्षैर्हरितकोमलैः ।
त्रिवर्णराजिभिः कंठैरेते मंजुगिरः शुकाः ॥ 2, 9.
कलक्वणितगर्भेण कंठेनाघूर्णितेक्षणः ।
पारावतः परिभ्रम्य रिरंसुश्चुंबति प्रियां ॥ 10.
बध्नन्नंगेषु रोमांचं कुर्वन्मनसि निर्वृतिं ।
नेत्रे निमीलयन्नेष प्रियास्पर्शः प्रवर्तते ॥ 11.
कंठे कालः कपालेन करस्थेनेंदुशेखरः ।
जटाभिः स्निग्धताम्राभिराविरासीद्वृषध्वजः ॥ 12.

Upamá.

त्वदाननमधीराक्षमाविर्दशनदीधिति ।
भ्रमद्भृंगमिवालक्ष्य केसरं भाति पंकजं ॥ 44.
नलिन्या इव तन्वंग्यास्तस्याः पद्ममिवाननं ।
मया मधुव्रतेनेव पायं पायमरम्यत ॥ 45.
नैकोपि त्वादृशोऽद्यापि जायमानेषु राजसु ।
ननु द्वितीयो नास्त्येव पारिजातस्य पादपः ॥ 47.
दिवो जागर्ति रक्षायै पुलोमारिर्भुवो भवान् ।
असुरास्तेन हन्यंते सावलेपा नृपास्त्वया ॥ 49.

[1] Ex hoc libro maxima pars eorum excerpta est, quae W. Yates in 'Essay on Sanscrit Alliteration,' As. Res. XX. p. 135 sqq., de ea re protulit.

Rúpaka.

ताम्रांगुलिदलश्रेणि नखदीधितिकेसरं ।
ध्रियते मूर्ध्नि भूपालैर्भवच्चरणपंकजं ॥ 68.
अकस्मादेव ते चंडि स्फुरिताधरपल्लवं ।
मुखं मुक्तारुचो धत्ते घर्माभःकणमंजरीः ॥ 70.
वल्गितभ्रु गलद्घर्मजलमालोहितेक्षणं ।
विवृणोति मदावस्थामिदं वदनपंकजं ॥ 72.
मदपाटलगंडेन रक्तनेत्रोत्पलेन ते ।
मुखेन मुग्धे कोऽप्येष जनो रागमयः कृतः ॥ 74.
मदरक्तकपोलेन मन्मथस्त्वन्मुखेंदुना ।
नर्तितभ्रूलतेनालं मर्दितुं भुवनत्रयं ॥ 79.
हरिपादः शिरोलग्नजह्नुकन्याजलांशुकः ।
जयत्यसुरनिःशंकसुरानंदोत्सवध्वजः ॥ 80.
न मीलयति पद्मानि न नभोऽप्यवगाहते ।
त्वन्मुखेंदुर्ममासूनां हरणायैव यस्यति ॥ 82.
गांभीर्येण समुद्रोऽसि गौरवेणासि पर्वतः ।
कामदत्वाच्च लोकानामसि त्वं कल्पपादपः ॥ 84.
अयमालोहितच्छायो मदेन मुखचंद्रमाः ।
संनद्धोदयरागस्य चंद्रस्य प्रतिगर्जति ॥ 88.
चंद्रमाः पीयते देवैर्मया त्वन्मुखचंद्रमाः ।
अस्तमलो(?)ऽप्ययं शश्वदयमापूर्णमंडलः ॥ 89.
नैतन्मुखमिदं पद्मं न नेत्रे भ्रमराविमौ ।
एतानि केसराण्येव नैता दंतार्चिषस्तव ॥ 93.

Dípaka.

पवनो दक्षिणः (दारुणः?) पर्णं जीर्णं हरति वीरुधां ।
स एवावनतांगीनां मानभंगाय कल्पते ॥ 97.
चरंति चतुरंभोधिवेलोद्यानेषु दंतिनः ।
चक्रवालाद्रिकुंजेषु कुंदभासो गुणाश्च ते ॥ 98.
श्यामलाः प्रावृषेण्याभिर्दिशो जीमूतपंक्तिभिः ।
भुवश्च सुकुमाराभिर्नवशाद्वलराजिभिः ॥ 99.
विष्णुना विक्रमस्थेन दानवानां विभूतयः ।
क्वापि नीताः कुतोऽप्यासन्नानीता देवतर्द्धयः ॥ 100.
नृत्यंति निचुलोत्संगे गायंति च कलापिनः ।
बध्नंति च पयोदेषु दृशो हर्षांबुगर्भिणीः ॥ 102.
मंदो गंधवहः क्षारो (?) वह्निरिंदुश्च जायते ।
चर्चाचंदनपातश्च शस्त्रघातः प्रवासिनां ॥ 103.
जलं जलधरोद्गीर्णं कुलं गृहशिखंडिनां ।
चंचलं तडितां दाम बलं कुसुमधन्विनः ॥ 104.
त्वया नीलोत्पलं कर्णे स्मरेणास्त्रं शरासने ।
मयापि मरणे चेतस्त्रयमेतत्समं कृतं ॥ 105.
अवलेपमनंगस्य वर्धयंति बलाहकाः ।
कर्षयंति तु घर्मस्य मारुतोद्धूतशीकराः ॥ 108.
हरत्याभोगमीशानां (?) गृह्णाति ज्योतिषां गणं ।
आदत्ते चाद्य मे प्राणानसौ जलधरावली ॥ 110.
हृद्यगंधवहास्तुंगास्तमालश्यामलत्विषः ।
दिवि भ्रमंति जीमूता भुवि चैते मतंगजाः ॥ 112.

Ávṛitti.

विकशंति कदंबानि स्फुरंति कुटजद्रुमाः ।
उन्मीलंति च कंदल्यो दलंति ककुभानि च ॥ 116.
उत्कंठयंति मेघानां माला वृंदं कलापिनां ।
यूनां चोत्कंठयत्यद्य मानसं मकरध्वजः ॥ 117.
जित्वा विश्वं भवानद्य विहरत्यवरोधनैः ।
विहरत्यप्सरोभिस्ते रिपुवर्गो दिवं गतः ॥ 118.

Ákshepa.

कुतः कुवलयं कर्णे करोषि कलभाषिणि ।
किमपांगमपर्याप्तमस्मिन्कर्मणि मन्यसे ॥ 122.
सत्यं ब्रवीमि न त्वं मां द्रष्टुं वल्लभ लप्स्यसे ।
अन्याचुंबनसंक्रांतलाक्षारक्तेन चक्षुषा ॥ 124.
तव तन्वंगि मिथ्यैव रूढमंगेषु मार्दवं ।
यदि सत्यं मृदून्येव किमकांडे रुजंति मां ॥ 126.
सुंदरी सा न वेत्येष विवेकः केन जायते ।
प्रभामात्रं हि तरलं दृश्यते तत्र नाश्रयः ॥ 129.
चक्षुषी तव रज्येते स्फुरत्यधरपल्लवः ।
भ्रुवौ च भुग्ने न तथाप्यदुष्टस्यास्ति मे भयं ॥ 131.
दूरे प्रियतमः सोऽयमागतो जलदागमः ।
दृष्टाश्च फुल्ला निचुला न मृता चास्मि किं त्विदं ॥ 134.
न चिरं मम तापाय तव यात्रा भविष्यति ।
यदि यास्यसि याहि त्वमलमाशंकयात्र ते ॥ 136.
धनं च बहु लभ्यं ते सुखं क्षेमं च वर्त्मनि ।
न च मे प्राणसंदेहस्तथापि प्रिय मा स्म गाः ॥ 137.
जीविताशा बलवती धनाशा दुर्बला मम ।
गच्छ वा तिष्ठ वा कांत स्वावस्था ते निवेदिता ॥ 140.
गच्छ गच्छसि चेत्कांत पंथानः संतु ते शिवाः ।
ममापि जन्म तत्रैव भूयाद्यत्र गतो भवान् ॥ 142.
यदि सत्यैव यात्रा ते काप्यन्या गृह्यतां त्वया ।
अहमद्यैव रुद्धास्मि रंध्रान्वेषणमृत्युना ॥ 144.
गंता चेद्गच्छ तूर्णं ते कर्णौ यांति पुरा रवाः ।
आर्तबंधुमुखोद्गीर्णाः प्रयाणपरिपंथिनः ॥ 146.
गच्छेति वक्तुमिच्छामि त्वत्प्रियं मत्प्रियैषिणी ।
निर्गच्छति मुखाद्वाणी मा गा इति करोमि किं ॥ 148.
क्षणदर्शनविघ्नाय पक्ष्मस्पंदाय कुप्यतः ।
प्रेम्णः प्रयाणं ते ब्रूहि मया तस्येष्टमिष्यते ॥ 150.
सहिष्ये विरहं नाथ देह्यदृश्यांजनं मम ।
यदक्तनेत्रां कंदर्पः प्रहर्तुं मां न पश्यति ॥ 152.
प्रवृत्तैव प्रयामीति वाणी वल्लभ ते मुखात् ।
आयातापि त्वयेदानीं मंदप्रेम्णा ममास्ति किं ॥ 154.

नाघ्रातं न कृतं कर्णे स्त्रीभिर्मधुनि नार्पितं ।
त्वद्विषां दीर्घिकास्वेव विशीर्णं नीलमुत्पलं ॥ 156.
अर्थो न संभृतः कश्चिन्न विद्या काचिदर्जिता ।
न तपः संचितं किंचिद्गतं च चतुरं वयः ॥ 158.
किमयं शरदंभोदः किं वा हंसकदंबकं ।
रुतं नूपुरसंवादि श्रूयते तन्न तोयदः ॥ 160.
अमृतात्मनि पद्मानां द्वेष्टरि स्निग्धतारके ।
मुखेंदौ तव सत्यस्मिन्नपरेण किमिंदुना ॥ 162.
चित्रमाक्रांतविश्वोऽपि विक्रमस्ते न शाम्यति ।
कदा वा दृश्यते तृप्तिरुदीर्णस्य हविर्भुजः ॥ 164.
न स्तूयसे नरेंद्र त्वं ददासीति कदाचन ।
स्वमेव मत्वा गृह्णंति यतस्त्वद्धनमर्थिनः ॥ 166.

Arthántaranyása.

भगवंतौ जगन्नेत्रे सूर्याचंद्रमसावपि ।
पश्य गच्छत एवास्तं नियतिः केन लंघ्यते ॥ 171.
पयोमुचः परीतापं हरंत्येते शरीरिणां ।
न त्वात्मलाभो महतां परदुःखोपशांतये ॥ 172.
उत्पादयति लोकस्य प्रीतिं मलयमारुतः ।
ननु दाक्षिण्यसंपन्नः सर्वस्य भवति प्रियः ॥ 173.
जगदाह्लादयत्येष मलिनोऽपि निशाकरः ।
अनुगृह्णाति हि परान्सदोषोऽपि द्विजेश्वरः ॥ 174.
मधुपानकलात्कंठान्निर्गतोऽप्यलिनां ध्वनिः ।
कटुर्भवति कर्णस्य कामिनां, प्राप्नमीदृशं ॥ 175.
अयं मम दहत्यंगमंभोजदलसंस्तरः ।
हुताशनप्रतिनिधेर्दाहात्मा ननु युज्यते ॥ 176.
क्षिणोतु कामं शीतांशुः किं वसंतो दुनोति मां ।
मलिनाचरितं कर्म सुरभेर्नन्वसांप्रतं ॥ 177.
कुमुदान्यपि दाहाय किमंग कमलाकरः ।
न हींदुगृह्येषूग्रेषु सूर्यगृह्यो मृदुर्भवेत् ॥ 178.

Vyatireka.

धैर्यमाहात्म्यलावण्यप्रमुखैस्त्वमुदन्वतः ।
गुणैस्तुल्योऽसि भेदस्तु वपुषैवेदृशेन ते ॥ 180.
अभिन्नवेलौ गंभीरावंबुराशिर्भवानपि ।
असावंजनसंकाशस्त्वं तु चामीकरच्छविः ॥ 182.
त्वं समुद्रश्च दुर्वारौ महासत्त्वौ सतेजसौ ।
इयांस्तु युवयोर्भेदः स जडात्मा पटुर्भवान् ॥ 184.
स्थितिमानपि धीरोऽपि रत्नानामाकरोऽपि सन् ।
तव कक्षां न यात्येव मलिनो मकरालयः ॥ 186.
वहन्नपि महीं कृत्स्नां सशैलवनसागरां ।
भर्तृभावाद्भुजंगानां शेषस्त्वत्तो निकृष्यते ॥ 187.
त्वन्मुखं कमलं चेति द्वयोरप्यनयोर्भिदा ।
कमलं जलसंरोहि त्वन्मुखं त्वदुपाश्रयं ॥ 189.
अभ्रूविलासमस्पृष्टमदरागं मृगेक्षणं ।
इदं तु नयनद्वंद्वं तव त्वद्गुणभूषितं ॥ 190.
त्वन्मुखं पुंडरीकं च फुल्ले सुरभिगंधिनी ।
भ्रमद्भ्रमरमंभोजं लोलदृष्टि मुखं तव ॥ 193.
चंद्रोऽयमंबरोत्तंसो हंसोऽयं तोयभूषणः ।
नभो नक्षत्रमालीदमिदमुत्कुमुदं पयः ॥ 194.
अरत्नालोकसंहार्यमवार्यं सूर्यरश्मिभिः ।
दृष्टिरोधकरं यूनां यौवनप्रभवं तमः ॥ 196, etc.

In marginibus perbrevis commentarius, *Kávyádarṣa-márjana* dictus, adscriptus est, a *Harinátha,* Viṣvadharae filio, Keṣavae et Bhánus fratre natu minore, compositus. Incipit: गिरीशहृतदेहार्द्धां गिरीशत्वसमृद्धये । etc. तातं विश्व[ध]रं नत्वा ज्यायांसङ्केशवं गुरुम् । भानोरवरजेनायं प्रक्रमः क्रियते मया ॥ Idem Kaṇṭhábharaṇam librum peniculo se abstersisse profitetur (Kaṇṭhábharaṇamárjana), quo negotio eum melius perfunctum esse spero, quam in commentario nostro, quo non multam Daṇḍinis verbis claritatem attulit. Praeter *Alankáraṣekharam,* Kávyaprakáṣam, Vámanam, etiam Bhámaham laudat, hujusque praecepta Daṇḍinem secutum esse ad I, 15. declarat (भामहादिमतमाह).

Codex anno 1647 non satis accurate exaratus est. (Wilson 336.)

486.

Lit. Devan. Charta Europ. Foll. 59. Long. 11½. Lat. 9. Linn. 19, 20.

Foll. 1–24. *Kávyádarṣas* liber. (B.)

I. Márgavibhávana, fol. 4[b]; II. Arthálankáravibhávana, fol. 17[a]; III. Dushkarádidarṣana, fol. 24[b].

Haec voluminis pars a Pítámbaraṣarman post annum 1815 parum accurate exarata est. (Wilson 333[a].)

487.

Foll. 25–59. *Kávyálankáravṛittis, Vámanae* de arte poetica aphorismi, cum commentario auctoris ipsius. Incipit:

प्रणम्य परमं ज्योतिर्वामनेन कविप्रिया ।
काव्यालंकारसूत्राणां स्वेषां वृत्तिर्विधीयते ॥

Kávyaṁ gráhyam alaṅkárát ॥ काव्यं खलु ग्राह्यमुपादेयं भवत्यलंकारात् ॥ काव्यशब्दो यं गुणालंकारसंस्कृतयोः शब्दार्थयोर्वर्त्तते भक्त्या तु शब्दार्थमात्रे ॥ को सावलंकार इत्यत आह ॥ *Saundaryam alaṅkáraḥ* ॥ etc.

Opus in capita quinque (*adhikaraṇa*) eaque in lectiones (adhyáya) divisa sunt.

I. 3 adhy. De poesis natura. Stylum (ríti) post-

quam poesis esse animam constituit[1], in species tres dividit: *Vaidarbhí, Gauḍí, Páncháli*[2], singulasque accuratius definit. Lectione tertia poesis auxilia exponit[3]. Tum poemata oratione aut soluta, aut metris devincta scribi posse affirmat (काव्यं गद्यं च पद्यं च). Orationis solutae tria genera definit: *vṛittagandhi, chúrṇam, utkalikáprâyam.* Denique inter omnia opera poetica decem dramatum genera excellere ait: संदर्भेषु दशरूपकं श्रेयः। तद्धि चित्रं। चित्रपटवद्विशेषसाकल्यात् ॥

II. 2 adhy. Hoc capite vitia exponit, quibus opera poetica contaminentur. Eaque perperam adhibitis aut in vocabulis, aut vocabulorum significatione, aut sententiis, aut sententiarum tenore reperiuntur: 1. दुष्टं पदमसाधु ॥ कष्टं ग्राम्यमप्रतीतमनर्थकं च ॥ 2. अन्यनेयगूढार्थाश्लीलक्लिष्टानि च ॥ 3. भिन्नवृत्तियतिभ्रष्टविसंधीनि वाक्यानि (scil. दुष्टानि) ॥ 4. व्यर्थैकार्थसंदिग्धायुक्तापक्रमलोकविद्याविरुद्धानि ॥

III. 3 adhy. De orationis poeticae coloribus (*guṇa*). Atque carminis pulchritudo sententiarum convenientia comparatur, non vero sermonis artibus externis. Quas, si solae usurpentur, poematis tantum non poeticis nitorem quendam afferre posse ait: काव्यशोभायाः कर्तारो धर्मगुणाः ॥ ते चौजःप्रसादादयो, न यमकोपमादयः, कैवल्येन तेषामकाव्यशोभाकरत्वात् ॥ Quae virtutes poesis pulchritudinem adaugeant, ea esse *ornamenta: tad-* (i. e. *kávyaṣobháyáḥ*) *atiṣayahetavas tv alankárá iti.* Jam poesis colores singulos definit, eosque aut in verbis conspici ait, aut in rebus ipsis: A. *Ṣabdaguṇáḥ:* ओजःप्रसादश्लेषसमतासमाधिमाधुर्यसौकुमार्योदारतार्थव्यक्तिकांतयो बंधगुणाः ॥ B. *Arthaguṇáḥ* = A: त एवार्थगुणाः ॥

IV. 3 adhy. De sermonis poetici ornamentis externis (*alankára*), quibus carminum venustas adaugetur, qualia artibus metricis, parabolis, tropis, similibus rebus constant. A. *Ṣabdálankára:* a. *yamaka;* b. *anuprása*, quibus vocabulis syllabarum consonarum repetitio quaedam artificiosa et regulis restricta significatur. B. *Arthálankára: upamá*[4]. Postquam lectione secunda parabolarum naturam definivit, tertia auctor earum species exponit (*upamáprapancha*).

V. 2 adhy. Hoc capite miscellanea praecepta quaedam tradit, partim metrica, partim syntactica, partim grammatica, eaque práyogika (πρακτικός) nomine comprehendit, quia ex usu communi hausta sunt, etiamsi quaedam theoriae repugnent: a. *kávyasamaya*, regulae e communi poetarum usu deductae; b. *ṣabdaṣuddhi*, de sermonis puritate. Hac parte Vámana de grammaticae partibus quibusdam disputat, quarum in usu poetae aequales a praeceptis grammaticorum antiquiorum discedebant.

His summa breviter enarrata est libri, subtilitate et perspicacitate, meo quidem judicio, inter omnia opera rhetorica praestantissimi. Exemplorum ad praecepta probanda adhibitorum partem ipse scripsit, partem ex aliis libris hausit, idque ipse in medio libro declarat: एभिर्निदर्शनैः स्वीयैः परकीयैश्च पुष्कलैः। etc. Atque Daṇḍinem in fontibus ejus fuisse, e versibus multis colligitur, qui e *Kávyádarṣa* excerpti sunt. Cf. II, 2:

स्वभावहेतवः केचिद्व्याक्रियंते मनोरमाः ॥ 2, 245.
अनभ्यासेन विद्यानामसंसर्गेण धीमतां।
अनिग्रहेण चाक्षाणां जायते व्यसनं नृणां ॥ 2, 246.
गतः कामकथोन्मादो गलितो यौवनज्वरः।
क्षतो मोहश्च्युता तृष्णा कृतं पुण्याश्रमे मनः ॥ 2, 247.
वनान्यमूनि न गृहाण्येता नद्यो न योषितः।
मृगा इमे न दायादास्तन्मे नंदति मानसं ॥ 2, 248.
अत्यंतमसदार्याणामनालोचितचेष्टितं।
अतस्तेषां विवर्धंते सततं सर्वसंपदः ॥ 2, 249.
उद्यानसहकाराणामनुद्भिन्ना न मंजरी।
देयः पथिकनारीणां सतिलः सलिलांजलिः ॥ 2, 250.

etc., quae disticha loco supra indicato in Kávyádarṣa leguntur, nisi forte uterque exempla e communi libro quodam excerpserunt. Nominatim auctores et libros hos laudat: *Námamálá* lexicon, I, 3; *Viṣákhila* (? I, 3. कला नृत्यगीतादिकाः। तासामभिधायकानि शास्त्राणि विशाखिलादिप्रणीतानि कलाशास्त्राणि); *Ṣúdraka*, III, 2. शूद्रकादि- sic प्रबंधेषु भूयान्यस्य [श्लेषस्य] प्रपंचः; *Hariprabodha*, IV, 1.

Haec voluminis pars post annum 1815 e codice Bengalensi parum accurate transscripta est. (Wilson 333[b].)

488.

Lit. Bengal. Charta Europ. Foll. 48. Long. 12½. Lat. 9. Linn. 24.

Vámanavṛittiṭíká, commentarius ad *Vámanae* Alankáravṛitti librum, a *Maheṣvara* scriptus. Incipit: प्रणम्य परमात्मानं जगज्जन्मादिकारणं। साधुवामनसूत्राणां व्याख्या प्राख्यायते मया ॥ तत्र निगमनिरूढार्थयथार्थज्ञानसंपन्नहृदयः परमकारुणिकः श्रीवामनाचार्य्यः सकलहृदयहृदयाह्लादकारणकाव्यालङ्कारसूत्राणि प्रथमतो विधाय तत्त्वबुभुत्सुझटितिबोधाय स्वयमेव तदर्थविवरणवृत्तिं चिकीर्षुः

---

[1] रीतिरात्मा काव्यस्य ॥ विशिष्टपदरचना रीतिः ॥ विशेषो गुणात्मा ॥

[2] विदर्भादिषु दृष्टत्वात्तत्समाख्या ॥ समग्रगुणा वैदर्भी ॥

[3] *Loko vidyá prakírṇaṁ cha kávyángáni* ॥ शब्दस्मृत्यभिधानकोषछंदोविचितिकलाकामशास्त्रदंडनीतिपूर्वा विद्याः। लक्ष्यज्ञत्वमभियोगो वृद्धसेवावेक्षणं प्रतिभानमवधानं च काव्यांगानि ॥ Alibi haec leguntur: 'Nulla vox, nulla sententia, nulla doctrina, nulla ars, quae non poeticae ministra; eheu gravissimum poetae officium.'

[4] उपमानोपमेययोर्गुणलेशतः साम्यमुपमा ॥

शिष्टाचार प्रमाणमिति व्यवस्थापयन् परमात्मप्रणामरूप मङ्गलं शिष्यशिक्षार्थं शास्त्रादौ निबध्नाह प्रणम्येत्यादिना ॥ Accuratam Vámanae expositionem in hoc libro frustra quaeras, tanto enim auctorem recentiorum systematum fuco Maheșvara obruit, ut illo saepe sit obscurior.

Cap. I. fol. 13[b]; II. fol. 22[a]; III. fol. 30[a]; IV. fol. 48[a]. Capitis quinti commentarius desideratur.

In folio 8[b]. haec subscriptio legitur: इति श्रीसुबुद्धिमिश्रमहेश्वरकृतौ साहित्यसर्वस्वे etc.

Codex post annum 1810 a Pítámbaraṣarman satis accurate exaratus est. (WILSON 345.)

489.

Lit. Devan. Charta Ind. Foll. 151. Long. 14. Lat. 5½. Linn. 11.

Sarasvatíkaṇṭhábharaṇam, liber *Bhojadevae* regi tributus. Incipit:

ध्वनिर्वर्णाः पदं वाक्यमित्यास्पदचतुष्टयम्
यस्याः सूक्ष्मादिभेदेन वाग्देवीं तामुपास्महे १
निर्दोषं गुणवत्काव्यमलंकारैरलंकृतम्
रसान्वितं कविः कुर्वन् कीर्तिं प्रीतिं च विंदति २
दोषाः पदानां वाक्यानां वाक्यार्थानां च षोडश
हेयाः काव्ये कवींद्रैर्ये तानेवादौ प्रचक्ष्महे ३

Liber in capita quinque divisus est.

I. *Doshaguṇavivechanam.* Foll. 1–19. 1. doshás (16) fol. 1[a]–7[a]. 2. ṣabdaguṇás (24) fol. 7[a]–9[b]. 3. vákyárthaguṇás (24) fol. 9[b]–11[b]. 4. padadoshánám adoshatvam fol. 11[b]–14[a]. 5. vákyadoshánám adoshatvam fol. 14[a]–16[b]. 6. vákyárthadoshánám adoshatvam fol. 16[b]–19[b].

II. *Ṣabdálankára.* Foll. 20–53. Incipit: शब्दार्थाभियसंज्ञाभिरलंकारान्कवीश्वराः वाह्यानाभ्यंतरान्वाह्याभ्यंतराँश्चानुशासति १ ये व्युत्पत्यादिना शब्दमलंकर्तुमिह क्षमाः शब्दालंकारसंज्ञास्ते ज्ञेया जात्यादयो वुधैः २. 1. játi inc. in fol. 20[a]. 2. gati fol. 21[b]. 3. ríti sive márga fol. 22[a] (वैदर्भी साथ पांचाली गौडीयावंतिका तथा । लाटीया मागधी चेति षोढा रीतिर्निगद्यते ॥ antiquiores vero tres tantum species enumerant). 4. vṛitti fol. 23[a] (कैशिक्यारभटी चैव सात्वती भारती तथा । मध्यमारभटी चैव तथा मध्यमकैशिकी)[1]. 5. chháyá fol. 23[b]. 6. mudrá fol. 23[b]. 7. ukti fol. 24[a]. 8. yukti fol. 24[b]. 9. bhaṇiti fol. 25[b]. 10. gumphaṇá fol. 26[a]. 11. ṣayyá fol. 26[b]. 12. paṭhiti fol. 27[b]. 13. yamaka fol. 29[a]. 14. ṣlesha fol. 32[b]. 15. anuprása fol. 34[a]. 16. chitra fol. 42[a]. 17. vákovákya fol. 48[a]. 18. prahelíká fol. 49[b]. 19. gúḍha fol. 50[a]. 20. praṣnottara fol. 50[b]. 21. adhyeya fol. 51[a]. 22. ṣravya fol. 51[b]. 23. prekshya fol. 52[a]. 24. abhineya fol. 52[a].

[1] Auctorem numeros 24, 16, 6, 4. adamasse facile percipitur.

III. *Arthálankára.* Foll. 54–72. Incipit: चलमर्थमलंकर्तुं ये व्युत्पत्यादिवर्त्मना ज्ञेया जात्यादयः प्राज्ञैस्ते र्थालंकारसंज्ञया. 1. játi fol. 54[a]. 2. vibhávaná fol. 55[b]. 3. hetu fol. 56[a]. 4. ahetu fol. 58[a]. 5. súkshma fol. 58[b]. 6. uttara fol. 59[a]. 7. virodha fol. 59[b]. 8. sambhava fol. 60[a]. 9. anyonya fol. 61[a]. 10. parivṛitti fol. 61[b]. 11. nidarṣana fol. 62[a]. 12. bheda fol. 62[b]. 13. samáhita fol. 64[a]. 14. bhránti fol. 64[b]. 15. vitarka fol. 65[b]. 16. mílita fol. 66[a]. 17. smṛiti fol. 67[a]. 18. bháva fol. 67[a]. 19. pratyaksha fol. 68[a]. 20. anumána fol. 68[b]. 21. ágama fol. 69[a]. 22. upamána fol. 69[b]. 23. arthápatti fol. 70[b]. 24. abháva fol. 71[b] (प्रत्यक्षपूर्वाणि प्रमाणानि जैमिनेः).

IV. *Ubhayálankriyá.* Foll. 73–107. Incipit: शब्देभ्यो यस्त्विवादिभ्य उपमादिः प्रतीयते विशिष्टोऽर्थः कवीनां ता उभयालंक्रियाः प्रियाः. 1. upamá fol. 73[b]. 2. rúpaka fol. 77[a]. 3. sámya fol. 80[b]. 4. saṁṣaya fol. 84[a]. 5. apahnuti fol. 84[b]. 6. samádhi fol. 85[b]. 7. samásokti fol. 86[b]. 8. utprekshá fol. 88[a]. 9. aprastutastuti fol. 89[b]. 10. tulyayogitá fol. 90[a]. 11. leṣa fol. 90[b]. 12. sahokti fol. 91[b]. 13. samuchchaya fol. 92[b]. 14. sákshepa fol. 94[b]. 15. arthántaranyása fol. 96[a]. 16. viṣeshokti fol. 96[b]. 17. parikara (sive *parishkṛiti*) fol. 97[b]. 18. dípaka fol. 100[b]. 19. krama fol. 102[a]. 20. paryáya fol. 103[a]. 21. atiṣaya fol. 104[a]. 22. ṣlesha fol. 104[b]. 23. bhávika fol. 105[b]. 24. saṁsṛishṭi fol. 106[b].

V. *Rasavivechana.* Foll. 108–151. Incipit: रसो भिमानोऽहंकारः शृंगार इति गीयते यो र्थस्तस्यान्वयात्काव्यं कमनीयत्वमश्नुते. Hoc capite auctor de his rebus disputavit: भावो जन्मानुबंधोऽथैनिष्पत्तिः पुष्टिसंकरौ । ह्रासाभासौ शमः शेषो विशेषः परिशेषवान् ॥ विप्रलंभोऽथ संभोगस्तच्चेष्टास्तत्परीष्टयः । निरुक्तयः प्रकीर्णानि प्रेमाणः प्रेमपुष्टयः । नायिकानायकगुणाः पाकाद्याः प्रेमभक्तयः ॥ नानालंकारसंसृष्टेः प्रकाराश्च रसोक्तयः । चतुर्विंशतिरित्युक्ता रसान्वयविभूतयः ॥ Neque tamen, velut in libris reliquis, partes singulas accurate distinxit.

Omnia praecepta variorum poetarum versibus probata sunt. Atque fontes suos auctor ipse non indicavit, nominatim enim praeter *Váṇam,* Harshadevae tantum *Ratnávalím, Chhalitarámam* comoediam, Náráyaṇae Veṇísaṁháram, Mághae Ṣiṣupálam laudavit. Quum vero singula disticha accuratius inspexissem, horum poetarum operibus eum usum esse comperi[2]: 1. *Adbhutapunya* (यायाते दयिते मरुस्थलभुवां = Ṣárngadhara 111, 3). 2. *Amarúka.* 3. *Kálidása* (Urvaṣí, Kumára, Megha, Raghu, Ṣákuntala)[3]. 4. *Kríḍáchandra* (च्युतामिंदोर्लेखां = Ṣ. 4, 10). 5. Chhinnama (कल्याते शमितत्रिविक्रम = Ṣ. 4, 12).

[2] Major vero distichorum pars unde desumta sit, hucusque me latet.

[3] *Málávikágnimitrae* ne unum quidem distichon citat.

6. *Daṇḍin*, e cujus Kávyádarṣa non modo regulas plurimas, sed etiam omnia fere exempla excerpsit. 7. *Dhárákadamba* (बाले मालेयमुच्चैर् = Ṣ. 134, 6). 8. *Náráyaṇa* (Veṇísaṁhára). 9. *Nidrádaridra* (जाने कोपपराङ्मुखी = Ṣ. 106, 7). 10. *Padárthadharmasangraha* (hujus libelli distichon primum laudatur). 11. *Bhaṭṭi* (Bhk.). 12. *Bhadantajnánavarman* (किं जातोऽसि चतुष्पथे = Ṣ. 58, 1). 13. *Bhartṛimeṇṭha* (मधुरविकसितोत्पला = Ṣ. 139, 5). 14. *Bhartṛihari*. 15. *Bhavabhúti* (Uttara, Mahávíra, Málatí). 16. *Bháravi* (Kiráta). 17. *Mahánáṭaka*. 18. *Mágha* (Ṣiṣupála). 19. *Rájaṣekhara* (Karpúramanjarí, Prachaṇḍapáṇḍava, Viddhaṣálabhanjiká). 20. *Lakshmídhara* (कंपंते कपयो भृशं = Ṣ. 137, 3). 21. *Váṇa*. 22. *Vijjáká* (उन्नमय्य सकचग्रहं = Ṣ. 32. 17. दृष्टिं हे प्रतिवेशिनि = Ṣ. 132, 9. विलासमसृणोल्लसन् = Ṣ. 36, 14). 23. *Vihlaṇa*. 24. E versibus in Ṣárngadharapaddhati *Bhojarájae* tributis duos in hoc libro reperi: कियन्मात्रं जलं et यदेतच्चंद्रांतर्[1]. *Munja* capitis primi disticho celebratur:

सौजन्यांबुनिधे बुधप्रिय गुणप्राकार धर्मद्रुम-
प्ररोह प्रतिपन्नवत्सल महात्यागिन्विवेकाश्रय ।
लक्ष्म्यावास मनस्विनीमनसिजव्यापारदीक्षागुरो
श्रीमन्मुंज किमित्यमुं जनमुपस्पृष्टं दृशा नार्हसि ॥

His igitur librum post decimum seculum compositum esse manifestum est.

Codex anno 1821 satis accurate exaratus est. (Wilson 246.)

490.

Lit. Devan. Charta Ind. Foll. 106. Long. 14. Lat. $5\frac{1}{2}$. Linn. 11.

Ratnadarpaṇas, commentarius ad *Sarasvatíkaṇṭhábharaṇam*, a *Ratneṣvara* (Rámasinhadeva?) scriptus. Incipit:

एकेन यस्य यमिनः प्रमदेव देह-
मर्धेन राजति पुमानिव चापरेण
तत्वक्रमादथ च न प्रमदा पुमान्वा
श्रेयांसि वर्धयतु स स्मरशासनो वः १
श्रीरामसिंहदेवेन दोर्दंडदलितद्विषा
क्रियते [ऽ]वंतिभूपालकंठाभरणदर्पणः २

Codice nostro tria tantum capita prima continentur. I. fol. 45[b]; II. fol. 89[a]; III. fol. 106[a]. Auctor ipse commentarium ad Kávyaprakáṣam se scripsisse profitetur, fol. 25[a].

Codex anno 1822 exaratus est. (Wilson 164.)

[1] Distichon लिंपतीव तमोऽंगानि, quod in Mṛichchhakaṭiká legitur, a Ṣárngadhara Meṇṭhae et Vikramádityae tribuitur.

491.

Opuscula tria. Lit. Devan. Charta Ind. Foll. 75. Long. foll. 1–17. $13\frac{1}{2}$. reliquorum 12. Lat. 5.

Foll. 1–17. Linn. 11. *Ṣringáratilakam*, quo libello *Rudrabhaṭṭa* (Rudraṭa) τὸ πάθος ἐρωτικόν tractavit et exemplis suis illustravit. Incipit: शृंगारी गिरिजानने सकरुणो रत्यां प्रवीरः स्मरे etc.

Capite primo (distt. 166.) Rudra de *náyaka* et *náyiká*, secundo (distt. 114.) de amantium variis animi affectionibus, tertio (distt. 84.) de πάθεσι in universum exponit.

Auctor non modo a Mammaṭa et Viṣvanátha, sed etiam a Ṣárngadhara laudatur. In cujus anthologia quum novem disticha auctori nostro tributa sint, quinque in hoc libello reperi: Ṣ. 102, 12 = R. 1, 95; 115, 2 = 1, 35; 123, 2 = 2, 106; 123, 7 = 1, 51; 131, 5 = 1, 29.

Ejusdem opusculi apographon, anno 1584 non accurate exaratum, in codice E. I. H. 290. exstat.

Haec voluminis pars anno 1821 negligenter exarata est. (Wilson 243[a].)

492.

Foll. 117–126. Linn. 9. Continetur his foliis initium libri rhetorici cujusdam, nisi fallor, *Alankárakaustubhae*, a *Karṇapúra* scripti, cum commentario auctoris anonymi. Textus incipit: ग्रंथारंभे स्वाभीष्टदेवतानामगुणकीर्तनात्मकं मंगलमंगीकुर्वाण ग्रंथकारो ग्रंथस्य निर्विघ्नं परिसमाप्तिमाशास्ते। स्वानन्दरसतृष्णः कृष्णचैतन्यविग्रहो जयति आपामरमपि कृपया सुधया स्नपयांबभूव भूमौ यः ॥१॥ स जयति येन प्रभवति सुदृशां etc. Commentarius incipit: अद्वैतप्रकटीकृतो नरहरिप्रेष्ठः स्वरूपप्रियो नित्यानन्दसखः सनातनगतिः श्रीरूपकृत्केतनः लक्ष्मीप्राणपतिर्गदाधररसोल्लासी जगन्नाथभूः सांगोपांगसपार्षदः स दयतां देवः शचीनन्दनः ॥ अथ सोऽयं कविमुकुटमणिः *Karṇapúraṇo* (l. °ṇa) स्वामी सकृतश्लोकानां (sva°) स्वयमेव टीकामाह ग्रंथारंभ इत्यादिः.

Haec folia exeunte seculo superiore nitide exarata sunt. (Wilson 332[c].)

493.

Lit. Devan. Charta Ind. Foll. 184. Long. 13. Lat. $6\frac{1}{2}$. Linn. 8–17.

Alankárakaustubhas, a *Karṇapúra* compositus, cum commentario. Liber in decem capita (*kiraṇa*) divisus est. Folia १–१३, quibus liber primus et initium secundi continebantur, interciderunt.

II. Ṣabdárthavṛittinirúpaṇa, fol. 26[a]; III. Dhvaninirṇaya, fol. 55[a]; IV. Guṇíbhútavyangyanirṇaya, fol. 61[a]; V. Rasabhávatadbhedanirúpaṇa, fol. 116[a]; VI. Guṇavivechana, fol. 121[a]; VII. Ṣabdálankáranirṇaya, fol. 132[b];

VIII. Arthálankáranirúpaṇa, fol. 164ᵃ; IX. Rítinirúpaṇa, fol. 166ᵇ; X. Doshapradarṣana, fol. 184ᵃ.

Liber Sáhityadarpaṇa recentior est. Rájendralálamittra auctore (Chaitanyachandrodaya introd. p. VI) Karṇapúra anno 1524 natus est. Quae disticha exempli causa addita sunt, eorum longe plurimis Krishṇae et Rádhae amores celebrantur. Auctoris nomen hoc tantum disticho traditur, quod in fine libri legitur: श्रीमकविकर्णपूरस्य चरणावनिशं भजे निर्मितः कृष्णकंठाहों मेनालङ्कारकौस्तुभः ॥ Commentarium ab auctore ipso scriptum esse conjicio.

Codex hoc seculo ineunte exaratus est. (WILSON 61.)

494.

Lit. Devan. Charta Europ. Foll. 183. Long. 12. Lat. 9½. Linn. 9–27.

Alankárakaustubhas.

Hic codex e superiore post annum 1814 transscriptus est. (WILSON 411.)

495.

Lit. Devan. Charta Ind. Foll. 147. Long. 12. Lat. 4. Linn. 10.

A. Foll. 1–43. *Alankárasarvasvam.* Incipit:

नमस्कृत्य परां वाचं देवीं त्रिविधविग्रहाम्
निजालंकारसूत्राणां वृत्त्या तात्पर्यमुच्यते ॥

Auctor, cujus nomen codice nostro non proditur, rhetorices partem *ornamenta*[1] tractantem centum circiter aphorismis adumbravit, et commentario prolixo et abstruso necnon exemplis illustravit. Auctores et libros rhetoricos hosce laudat: Alankáramanjarí, Udbhaṭa, Dhvanikára, Bhaṭṭa, Bhaṭṭanáyaka, Bhámaha, Rudraṭa, Vakroktijívitakára, Vámana, Vyaktivivekakára. Se ipsum *Ṣríkaṇṭhastavae* (Ṣríkaṇṭhae *regionis* laudes), quod *Harshacharitae* carminis caput fuisse conjicio, et *Sáhityamímánsae* auctorem profitetur. Quos locos Mallinátha ex Alankárasarvasva excerpsit, eos omnes in hoc libro reperi.

In fine haec leguntur: संपूर्णमिदमलंकारसर्वस्वमिति श्रेयः कृतिस्तत्रभवद्राजानरुय्यकस्येति शिवं ॥ Numerum ११. scriba errore praetermisit, sed nihil deest.

B. Foll. 44–147. *Alankáravimarshiṇí*, commentarius ad librum superiorem a Jayaratha (?), Ṣringárae filio, scriptus. Incipit: निजेति परकीयाणां हि सूत्राणां तात्पर्यकथनेऽनवबोधो पि स्यादिति भावः तथा न कैश्चिदपि परैरीदृंशि सूत्राणि कृतानीत्यपि ध्वनितं तात्पर्यमिति संक्षिप्तार्थप्रकाशनमित्यर्थः etc.

Codex hoc seculo ineunte exaratus est. (WILSON 406.)

496.

Lit. Devan. Charta Europ. Foll. 97. Long. 13. Lat. 9. Linn. 27.

A. Foll. 1–30. *Alankárasarvasvam.*

B. Foll. 31–97. *Alankáravimarshiṇí.*

Hoc apographon e codice superiore post annum 1815 transscriptum est. (WILSON 227.)

497.

Opera quinque. Lit. Devan. Charta Ind. Foll. 160. Long. 11. Lat. 5.

Foll. 1–61. Linn. 14. *Kávyakalpalatávṛitti-parimalae* fragmentum. Incipit: श्रीशारदां हृदि ध्यात्वा विख्यातं परिमलाख्यया । काव्यकल्पलतावृत्तेः किंचिद्वच्मि विवेचनं ॥१ वृत्तिकारः काव्यकल्पलतासूत्रे वृत्तिं कर्तुकामो वाङ्मयज्योतिर्विमर्शनपूर्वमभिधेयमाह ॥

Scholiasta, cujus nomen fragmento nostro non traditur, commentarium, quem *Amarachandra* Jaina, Jinadattae discipulus, ad Kávyakalpalatae libri aphorismos composuit, satis copiose explanavit. Atque Amarachandra (cod. E. I. H. 848. Samvat 1475) ab his distichis incipit:

विमृश्य वाङ्मयं ज्योतिरमरेण यतींदुना ।
काव्यकल्पलताख्येयं कविशिक्षा प्रतन्यते ॥१॥
सारस्वतामृतमहार्णवपूर्णिमेंदो-
र्नैत्वारिसिंहसुकवेः कवितारहस्यं ।
किंचिच्च तद्रचितमात्मकृतं च किंचि-
द्व्याख्यास्यते त्वरितकाव्यकृतेऽत्र सूत्रं ॥२॥

Aphorismorum vero auctor, sive ille *Arisinha*, sive Amarachandra ipse fuit, ab his verbis incipit:

वाचं नत्वा महानंदकरसत्काव्यसंपदे ।
कविशिक्षामिमां वच्मि काव्यकल्पलताह्वयां ॥

Totum opus ab Amarachandra in quatuor libros (pratána) divisum est: I. *chhandaḥsiddhi;* II. *ṣabdasiddhi;* III. *ṣleshasiddhi;* IV. *arthasiddhi.* Libri singuli in fasciculos distributi sunt: I, 1. anushṭupṣásana; 2. chhandobhyása; 3. sámányaṣabda; 4. váda; 5. varṇyasthiti. II, 1. rúḍhanámamálá; 2. yaugikanámamálá; 3. misranámamálá; 4. anuprása; 5. lákshaṇikaṣabdasvarúpa. III, 1. ṣleshavyutpádana; 2. sarvavarṇana; 3. uddishṭavarṇana; 4. adbhutavidhi; 5.

---

[1] शब्दार्थोभयालंकाराः । तत्र शब्दालंकारा यमकादयः । अर्थालंकारा उपमादयः । उभयालंकारा लाटानुप्रासादयः ॥

chitraprapancha. IV, 1. alankára; 2. varṇa; 3. ákára; 4. kriyá; 5. prakírṇaka; 6. sankhyá; 7. samasyá. Quo argumento solo non poeticae principia, sed versuum faciendorum ἐγχειρίδιον hoc libro contineri, manifestum est.

In volumine nostro commentarius ad librum primum continetur, quem scholiasta in sedecim paragraphos (prastara) divisit. Praeter libros notissimos, *Máṇikyasúrim* Jainam, Haima-chhandaṣchúḍámaṇim librum, Hemachandrae Triṣalákápurushacharitam laudat.

Folia ३६–५३, quibus prastarae septimi finis et undecimi initium continebantur, deperdita sunt.

Haec voluminis pars seculi septimi decimi ineuntis literatura nitidissime exarata est. (Walker 161ª.)

498.

Lit. Bengal. Charta Ind. Foll. 69. Long. $16\frac{1}{2}$. Lat. $3\frac{1}{2}$.

Foll. 1–54. Linn. 6. *Kavikalpalatá*, versificationis compendium a *Devendra* (Deveṣvara) scriptum. *Vágbhaṭṭa*, auctoris pater, Málavae regis cujusdam a consiliis fuit. Incipit:

गङ्गावारिभिरुक्षिता[:] फणिफणैरुत्पल्लवास्तच्छिखा-
रत्नैः कोरकिताः शितांशुकलया स्मि(sme)रैकपुष्पश्रियः ।
आनन्दाश्रुपरिस्रुताक्षिहुतभुग्धूमैर्मिलद्दोहदा
नाल्पं कल्पलता(:)फलं दधतु (dadatu) वोऽभीष्टं जटा धूर्जटेः ।
मालवेन्द्रमहामात्यश्रीमद्वाभटनन्दनः ।
देवेश्वरः प्रतनुते कविकल्पलतामिमां । [२]
प्रतिभाभावितात्मानः कवित्वं के न कुर्वते ।
अन्यत्र कविताधानकुशला विरलाः पुनः । [३]
यदन्यै(ny)र्वर्त्म न(:) क्षुण्णं तत्रं सञ्चरतो मम ।
पदे पदे प्रस्खलतः सन्तः सन्तु विचारकाः । [४]
कविशीक्षाशतं वीक्ष्य कवीन्द्रानुपजीव्य च ।
निबद्धेयं मया धीरास्त्वरितश्लोकसिद्धये । [५]
सुवृत्तरम्यस्तवका सदालिपरिशीलिता ।
कविकल्पलताख्येयममला परिशील्यतां । [६]
शब्दश्लेषम(ka)र्थाख्याश्चत्वार स्तवका इह ।
ते चतुःपञ्चषट्सप्तकुसुमैरन्विताः क्रमात् । [७]
तत्राद्ये(tatrádye)स्तवके छन्दोभ्यासः सामान्यशब्दकः ।
वर्ण्यस्थितिरनुप्रासः कुसुमानि यथाक्रमात् । [८]

Liber in fasciculos et flores divisus est.

I, 1. Generalia versuum faciendorum praecepta. 2. Adjectivorum, in poematis usurpandorum, spęcimina proponuntur. Deinde vocabula, quae in lingua Prákritica mutationem non subeunt, enumerantur. 3. Incipit: अथ वर्ण्यानि कथ्यन्ते तानि यानि कवीश्वरैः। महाकाव्यप्रभृतिषु प्रबंधेषु ववन्धिरे ॥ De rebus, quae carmine celebrandae sunt. 4. De artificiosa syllabarum in versibus repetitione, *anuprása* dicta. Fol. 11ᵇ. II. Ad formandas paronomasias (ṣlesha) varia artificia traduntur. Incipit: उद्दिष्टवर्णनं वर्णः प्रकीर्णं संख्यया सह । रूढादिश्लेति पञ्चाह (pancheha) कुसुमानि यथाक्रमं ॥[1] Fol. 22ᵇ. III. Hoc capite orationis artificiosae specimina sex continentur: Rájadarṣanam, Gangástutis, Bhagavatpádábháshaṇam, Bráhmaṇábháshaṇam, Taḍágádivarṇanam, Váditarjanam. Fol. 32ᵇ. IV. Incipit: अर्थोत्पादोऽद्भुतं चित्रं सादृश्यं रूपकादिकं । समस्यापूरणोपायः समस्या च यथाक्रमं ॥ Hoc capite varia sermonis artificia traduntur, quale illud est, ut voces quaedam non connexae in sententia conjungantur (arthotpáda), ad versus partem partes desideratae suppleantur (samasyápúraṇa) etc.

Kávyakalpalatae imitatione hunc librum scriptum esse, mihi quidem persuasum est.

In fine octavi floris, qui invito auctore prosiluisse videtur, haec leguntur: इति श्रीमाघचैतन्यविरचितकविकल्पलतायामष्टमं कुसुमं ॥

Haec voluminis pars post annum 1810 exarata est. Numeri ३७. et ३८. a scriba omissi sunt, sed nihil deest. (Wilson 173ª.)

499.

A. Foll. 34–77. Lit. Bengal. Linn. 6. *Kávyachandriká*, artis rhetoricae compendium, a *Kavichandra* compositum. Incipit: कृष्णाङ्घ्रिपङ्कजमपङ्कजनस्य वन्द्यं वन्देऽद्भुतेन्दुनखवृन्दकृताभिनन्दं। आनन्दकन्ददममन्दमतेर्महेन्द्रमौनीन्द्रनीलमणिसान्द्रविभाविभाव्यं ॥ उल्लसन्तिमिरपुञ्जभञ्जिका व्यञ्जिकार्थनिचयस्य रञ्जिका। काव्यगीष्पतिरुचिप्रचारिका रोचतेऽत्र कविचन्द्रचन्द्रिका ॥ सन्तो भवन्तः सततं भवन्तु कृतौ ममास्यां कृपया सहायाः । क्षुद्रः सपक्षो लभते हि पक्षी गतोऽन्तरीक्षं फलमुच्चवृक्षात् ॥

In codice nostro capita (prakáṣa) octo prima supersunt: I. Kávyalakshaṇa, fol. 36ª; II. Ṣabdaṣakti, fol. 43ᵇ; III. Rasanirúpaṇa, fol. 45ᵇ; IV. Bhávás, fol. 54ᵇ; V. Rasasya bhedás, fol. 60ª; VI. Rasábhása, fol. 62ª; VII. Kávyabhedás, fol. 69ᵇ; VIII. Pramáṇanirúpaṇa, fol. 77ᵇ.

Auctores et libros rhetoricos Kavichandra hos laudat: Kavikalpalatá, Kávyaprakáṣa, Daṇḍin, [Sáhitya-] darpaṇakára, *Dhananjaya* fol. 45ª, Dhvanikára, Purushottama, Bharata, Rudraṭa, Vámana, Ṣárngadeva fol. 47ª (शारङ्गदेव MS.), Sarasvatíkaṇṭhábharaṇa. Sed excepto capite octavo omnem libri materiam e Viṣvanáthae opere desumsit. Se ipsum horum carminum auctorem profitetur: *Ratnávalí* fol. 60ᵇ, *Rámachandrachampú* fol. 58ª. 66ᵇ, *Ṣántichandriká*

---

[1] In eorum vocabulorum numero, quibus *tres* significantur, etiam *Kálidása* reperitur.

fol. 59ª, *Stavávali* fol. 60ᵇ. Idem *Sáralaharím* et *Dhátuchandrikám* libros grammaticos suos citat. Filios *Kavivallabham* et *Kavibhúshaṇam* habuit, qui et ipsi versus confecerunt.

Opus totum capitibus quindecim sedecimve constabat. Namque in codice Colebr. (E. I. H. 413.) post caput primum brevis de metris dissertatio inseritur. Ex eodem codice subscriptionem, quae in fine libri legitur, subjunxi:

विद्याविशारदसुतः *Kavikarṇapúrasutas*
तस्यात्मजेन भिषजा कविचंद्रनाम्ना ।
कौशल्यया कलितदेहविनिर्मितेन
ग्रंथः कृते मितमतेर्निरमायि यत्नैः ॥

इति दीर्घाकग्रामनिवासिदत्तकुलोद्भववैद्यश्रीकविचंद्रविरचितायां काव्यचंद्रिकायां षोडशः प्रकाशः ॥

B. Foll. 78–82. *Kávyachandrikae* a *Nyáyavágíṣa* compositae caput unum. Incipit:

सगुणा सालङ्कारा रसभावा दोषपरिहारा ।
जगदनुरञ्जनशीला कविकृतलीला सरस्वती जयतु ।
विद्यानिधितनूजेन न्यायवागीषधीमता ।
गुणालङ्कारा दोषाख्या क्रियते काव्यचन्द्रिका ।
गुणालङ्कारसंयुक्तौ शब्दार्थौ रसभावत ।
नित्यदोषविनिर्मुक्तौ काव्यमित्यभिधीयते ।

De codice Havniensi cf. Westergaard, p. 13.

Haec voluminis pars post annum 1810 exarata est. (WILSON 349ᵇ.)

500.

Lit. Devan. Charta Ind. Foll. 89. Long. 9½. Lat. 4.

Foll. 1–75. Linn. 11, 12. His foliis *Kávyaprakáṣas* continetur, liber rhetoricus a *Mammaṭa* compositus. In prooemio auctor poetarum horum mentionem facit: Kálidása; *Dhávaka*, quem Harsha rege usum esse patrono innuit; *Áditya; Mayúraṣarman.* In medio vero libro hos auctores laudat: Abhinavagupta, Udbhaṭa, Dhvanikṛit, Bhaṭṭanáyaka, Rudrabhaṭṭa, Lollaṭa, Vámana, Ṣankuka.

Ullása I. fol. 3ª; II. fol. 7ª; III. fol. 8ª; IV. fol. 19ᵇ; V. fol. 25ᵇ; VI. fol. 26ª; VII. fol. 45ª; VIII. fol. 48ª; IX. fol. 52ª; X. fol. 75ª.

De codice Berolinensi cf. Weber, p. 227. Liber Calcuttae anno 1829 impressus est.

Haec voluminis pars anno 1770 satis accurate exarata est. (WILSON 512ª.)

501.

Foll. 111–116. Linn. 10. *Kávyaprakáṣíyakárikávalí*, regulae metricae 142, quae in Kávyaprakáṣa libro traduntur, e majore opere excerptae. Incipit: दुर्धीदूषणनागेन्द्रमृगेन्द्रस्य गुरोः पदं । नत्वा व्यातन्यते वृत्तिर्मिमटेन विपश्चिता ॥१॥

Haec folia anno 1770 (शाके भूपतिनन्दनेत्रनिकरैर्युक्ते) Gangádhárapurae a Kaládhara exarata sunt. (WILSON 332ᵇ.)

502.

Foll. 25–168. Linn. 12–16. *Kávyapradípas*, commentarius ad *Kávyaprakáṣam* a Govinda, Keṣavae filio, Ruchikarae poetae fratre ὁμοπατρίῳ, compositus. (A.)

Incipit:

सोनोदेव्याः प्रथमतनयः केशवस्यात्मजन्मा
श्रीगोविंदो रुचिरकवेः प्रेमपात्रं कनीयान् ।
श्रीमन्नारायणचरणयोः सम्यगाधाय भक्तिं (चित्तं marg.)
नत्वा सारस्वतमपि महः काव्यतत्वं व्यनक्ति ॥

Ullása I. fol. 30ª; II. fol. 40ª; III. fol. 44ᵇ; IV. fol. 56ᵇ; V. fol. 69ᵇ; VI. fol. 70ᵇ; VII. fol. 113ª; VIII. fol. 119ᵇ; IX. fol. 129ª; X. fol. 168ª.

Mammaṭae verba magnam partem in commentario repetita sunt, locorum Prákriticorum interpretatio desideratur.

Folia 25–40. et 59–168. anno 1673 (प्रमादीसंवत्सरे) a Trivikramabhaṭṭa Sáṭha exarata, reliqua seculo superiore addita sunt. (WALKER 222ᵇ.)

503.

Lit. Devan. Charta Ind. Foll. 102. Long. 16. Lat. 5. Linn. 10.

Kávyapradípae pars, libros I–VI. et libri septimi fragmentum continens. (B.)

Ullása I. fol. 8ᵇ; II. fol. 24ª; III. fol. 27ª; IV. fol. 54ª; V. fol. 71ª; VI. fol. 72ª.

Desinit in verbis: एवं तुरगादिशास्त्रविरोधो प्यूहनीयः अभिमतप्रतीतिविरहो दूषकताबीजं ॥ ॥ अनवीकृतः अंग्यंतरेण च Kávyaprakáṣa, p. 95 = A. fol. 99ª.

Codex seculo superiore exeunte exaratus est. (WILSON 7.)

504.

Lit. Devan. Charta Europ. Foll. 75. Long. 11. Lat. 9. Linn. 23, 24.

Kávyapradípaṭíká, auctoris anonymi ad *Kávyapradípam* commentarius. Incipit: प्रारिप्सितत्वेनेति केचित् प्रकाशे ग्रंथारंभे इति अस्य करिष्यमाणे इति शेषः पूर्वकालो त्व सम्बन्ध्यर्थः विवाहे नांदीमुखं क्रियते इत्यादौ तथैव प्रतीतेः ।.

Ullása VI. fol. 36^a; VII. fol. 54^b; VIII. fol. 58^b; IX. fol. 63^a; X. fol. 75^b.

Codex post annum 1815 parum accurate exaratus est. (WILSON 226.)

505.

Opuscula tria. Lit. Devan. Charta Ind. Foll. 126. Long. 13. Lat. 5.

Foll. 1–110. Linn. 9. *Kuvalayánandas*, liber ab *Apyadíkshita*, *Venkaṭae*, Vijayanagarae regis, jussu, nisi fallor, exeunte seculo sexto decimo, compositus. Incipit: अमरीकवरीभारभ्रमरीमुखरीकृतं दूरीकरोतु दुरितं गौरीचरणपंकजं १ परस्परतपःसंपत्फलायितपरस्परौ प्रपंचमातापितरौ प्रांचौ जायापती स्तुमः २ etc. अलंकारेषु बालानामवगाहनसिद्धये ललितः क्रियते तेषां लक्ष्यलक्षणसंग्रहः ॥४॥

In conscribendo libro auctor antiquiore *Jayadevae* opere, *Chandráloka* appellato, usus est, quod et quinto prooemii disticho,

येषां चंद्रालोके दृश्यंते लक्ष्यलक्षणश्लोकाः ।
प्रायस्त एव तेषामितरेषां त्वभिनवा विरच्यंते ॥

et epilogo declarat:

अमुं कुवलयानन्दमकरोदप्पदीक्षितः ।
नियोगाद्वेंकटपतेर्निरुपाधिकृपानिधेः ॥१॥
चंद्रालोके विजयते शारदागमसंभवः ।
हृद्यः कुवलयानंदो यत्प्रसादादभूदयं ॥२॥

In fine haec subscriptio legitur: Iti ṣrímadadvaitavidyácháryaṣrí-Bharadvája-kuladhikaustubha-*Ṣríranga-rájá*-dhvaríndra-*Varadasúnor* Apyadíkshitasya kritiḥ Kuvalayándaḥ samáptaḥ.

Liber anno 1842 Poonae editus est.

Haec voluminis pars anno 1796 exarata est. (WILSON 332^a.)

506.

Foll. 49–74. Linn. 20, 21. *Rasataranginí*, quo libro, capita octo (taranga) continente, *Bhánudattas*, Gaṇapatis (Gaṇeṣvara) filius, Vidarbhensis, de *πάθεσι ποιητικοῖς* accurate et dilucide exposuit. Incipit:

लक्ष्मीमालोक्य etc.

भारत्याः शास्त्रकांतारश्रांतायाः शैत्यकारिणी
क्रियते भानुना भूरिरसा रसतरंगिणी २
वाणीकमलिनी भानोरेषा रसतरंगिणी
हंसाः कृतधियस्तत्र युक्तमत्र प्रतीयतां ३

I. Stháyibhávanirúpaṇam, fol. 51^a; II. Vibhávanirúpaṇam, fol. 52^b; III. Anubhávanirúpaṇam, fol. 54^b; IV. Sáttvikabhávanirúpaṇam, fol. 56^a; V. Vyabhichárabhávanirúpaṇam, fol. 63^a; VI. Ṣringáranirúpaṇam, fol. 67^b; VII. De reliquis affectibus, fol. 71^a; VIII. Qui affectus alios affectus producant, quinam concordent, quive alii discordent, definitur.

Disticha, quae exempli causa proponuntur, plurima auctor ipse composuit. Praeter Bharatae aphorismos, quos frequentissime citat, Kádambarím semel, semelque *Rasaratnadípiká* librum (cap. I.) laudat, Gaṇapatis patris strophas nonnullas profert, ad *Rasamanjarím* lectores in cap. V. relegat.

Haec voluminis pars post annum 1810 satis accurate exarata est. (WILSON 340^b.)

507.

Opuscula varia. Lit. Devan. Charta Ind. Foll. 179. Long. 10. Lat. 4.

Foll. 1–16. Linn. 10. Continetur his foliis *Rasamanjarí* (saporis poetici surculus), libellus a *Bhánudatta* scriptus. Incipit: आत्मीयं चरणं दधाति पुरतो निम्नोन्नतायां भुवि etc. विद्वत्कुलमनोभृंगरसव्यासंगहेतवे । एषा प्रकाश्यते श्रीमद्भानुना रसमंजरी ॥२॥ तत्र रसेषु शृंगारस्याऽभ्यर्हितत्वेन तदालंबनविभावत्वेन नायिका तावन्निरूप्यते ॥

Hujus libelli parte majore auctor mulierum (fol. 1–12^a.), reliqua virorum, qui in *τῷ ἐρωτικῷ πάθει* primas partes agunt (náyiká, náyaka), species varias eorundemque animi motus et indicia definivit, et versibus suis illustravit. Cf. Sáhityadarpaṇa ९६–१२२. In fine haec leguntur:

तातो यस्य गणेश्वरः कविकुलालंकारचूडामणि-
देशो यस्य विदर्भभूः सुरसरित्कल्लोलकिर्मीरिता ।
पद्येन स्वकृतेन तेन कविना श्रीभानुना योजिता
वाग्देवीश्रुतिपारिजातकुसुमस्पर्धाकरी मंजरी ॥

De codicibus Berolinensibus cf. Weber Catal. p. 174.

Haec voluminis pars hoc seculo ineunte exarata est. Folia ७–१०. interciderunt. (WILSON 493^a.)

508.

Foll. 17–68. Linn. 8. *Rasamanjaríprakáṣas*, commentarius ad Rasamanjarím a *Nágeṣa*, Ṣivabhaṭṭae filio, scriptus. Incipit:

सामिनीलोत्पलश्यामं वपुर्यस्य विभाति सः ॥
यामिनीदयितद्योतमानः सो स्तु शिवाय नः ॥१॥
नागेशभट्टनामा शिवभट्टसुधीसुतो मुदे विदुषां ·
रसमञ्जरीप्रकाशं रचयामि मितैर्वचोभिरर्थघनैः ॥२॥

Haec folia anno 1819 exarata sunt. (WILSON 493^b.)

509.

Foll. 202–211. Linn. 15. *Vágbhaṭálankáras,* libellus rhetoricus a *Vágbhaṭa* compositus. Incipit: श्रियं दिशतु वो देवः । *ṣrí-Nábheyajinaḥ* सदा । मोक्षमार्गं सदा ब्रूते । यदागमपदावली ॥१॥ साधुशब्दार्थसंदर्भं । गुणालंकारभूषितं । स्फुटरीतिरसोपेतं । काव्यं कुर्वीत कीर्त्तये ॥२॥ प्रतिभा कारणं तस्य व्युत्पत्तिश्च विभूषणं । भृशोत्पत्तिकृदभ्यास । इत्याद्यकविसंकथा ॥३॥ प्रसन्नपदनव्यार्थे । युत्क्युद्बोधविधायिनी(:) । स्फुरंती सत्कवेर्बुद्धि[:] । प्रतिभा सर्व्वतोमुखी ॥४॥ शब्दधर्म्मार्थकामादि।शास्त्रेष्वाम्नायपूर्विका । प्रतिपत्तिरसामान्या । व्युत्पत्तिरभिधीयते ॥५॥ अनारतं गुरूपांते । यः काव्ये रचनादरः । तमभ्यासं विदुस्तस्य । क्रमः को प्युपदिश्यते ॥६॥

Paricheda I. distt. 25. Caput hodegeticum. II. Incipit: संस्कृतं प्राकृतं तस्या।पभ्रंशो भूतभाषितं । इति भाषाश्चतस्रो पि । यांति काव्यस्य कायतां ॥१॥ Distt. 29. De vitiis poeticis. III. Incipit: अदोषावपि शब्दार्थौ । प्रशस्येते न यैर्विना । तानिदानीं यथायुक्ति । ब्रूमोऽभिव्यक्तये गुणान् ॥१॥ औदार्यं समता कांति । रर्थव्यक्तिः प्रसन्नता । समाधि[:] श्लेष ओजो च माधुर्यं सुकुमारता ॥२॥ Distt. 17. De dicendi stylis. IV. Incipit: दोषैर्मुक्तं गुणैर्युक्तमपि येनोज्झितं वचः । स्त्रीरूपमिव नो भाति तं ब्रुवे लंक्रियोच्चयं ॥१॥ Distt. 153. De sermonis poetici ornamentis. V. Incipit: साधुपाके प्यनास्वाद्यं भोज्यं निर्लवणं यथा । तथैव नीरसं काव्यमिति ब्रूमो रसानिह ॥१॥ Distt. 32. De novem animi affectibus, sive πάθεσι, quibus poemata *sapore* quodam peculiari imbuuntur.

Quibus distichis auctor ad praecepta illustranda utitur, eorum magno numero numina Jainica celebrantur. Sub rege *Jayasinha* quodam eum vixisse, his versibus apparet.

IV, 45. जगदात्मकीर्त्तिशुभ्रं जनय˘दुद्दामधामदोःपरिघः ।
जयति प्रतापपूषा जयसिंहः क्ष्माभृदधिनाथः ॥
IV, 85. अस्त्वस्तु पौरुषगुणाज्जयसिंहदेव-
पृथ्वीपतेर्मृगपतेश्च समानभावः ।
किंत्वेकतः प्रतिभटाः समरं विहाय
सद्यो विशंति वनमन्यमशंकमानाः ॥

Etiam hoc distichon subjungendum putavi, IV, 81:

इंद्रः स एव यदि किं न सहस्रमक्ष्णां
लक्ष्मीपतिर्यदि कथं न चतुर्भुजोऽसौ ।
आस्यंदनध्वजधृतोद्धुरतासचूडः
*ṣrí-Karṇadeva*nṛipasúnur ayaṁ raṇágre ॥

Haec folia seculo septimo decimo medio exarata sunt. (Walker 205[h].)

510.

Lit. Bengal. Charta Ind. Foll. 97. Long. 16. Lat. 5½. Linn. 10.

Continetur hoc codice *Sáhityadarpaṇam*, a *Viṣvanátha-kavirája* scriptum. Auctoris pater *Chandraṣekhara* fuit, qui, Náráyaṇae pronepos, Bhánudevae regis a consiliis videtur fuisse. Libri ejus *Pushpamálá* et *Bhásharṇava* (भाषालक्षणानि मम तातपादानां भाषार्णवे) laudantur. Opera a se composita Viṣvanátha haec citat: Kuvalayáṣvacharita (cf. p. 208. ed. Roer) Rághavavilása, Praṣastiratnávalí (shoḍaṣabhráshámayí) carmina, comoedias vero: Chandrakalá et Prabhávatípariṇaya. Chaṇḍídása, cognatus et aequalis ejus, commentarium ad Kávyaprakáṣam scripsit.

Editiones exstant princeps Calcuttae anno 1828, et altera ibidem a Roer anno 1856 edita. Versionis Anglicae praestantissimae partem Jacobo Ballantyne debemus.

Codex hoc seculo ineunte nitide exaratus est. (Wilson 6.)

511.

Lit. Bengal. Charta Ind. Foll. 212. Long. 16½. Lat. 3½. Linn. foll. 1–62. 7. reliquorum 6.

Rámacharaṇae (Rámacharaṇatarkavágíṣabhaṭṭácharya) ad Sáhityadarpaṇam commentarius. Incipit: वागीश्वरीसरसगीतगुणप्रवाहं etc. ॥ श्रीविश्वनाथकविराजकति(कृति)प्रणीतं साहित्यदर्पणमतिस्थगितप्रमेयं । श्रीमद्विधाय चरणं शरणं गुरूणां यत्नेन रामचरणो विवृणोति विप्रः ॥

Lib. I. fol. 11[b]; II. fol. 27[b]; III. fol. 58[a]; IV. fol. 78[a]; V. fol. 87[b]; VI. fol. 110[a]; VII. fol. 141[b]; VIII. fol. 148[b]; IX. fol. 150[b].

Exempla ad praecepta demonstranda scholiasta passim affert, nonnulla e *Rámavilása* carmine suo hausta esse professus.

Codex post annum 1810 exaratus est. Folia tria quatuorve ultima desiderantur. Procedit textus usque ad kárikám 750. (Wilson 5.)

512.

Lit. Bengal. Charta Ind. Foll. 41. Long. 19. Lat. 3½. Linn. 8.

Insunt ejusdem commentarii libri I–III.

Lib. I. fol. 7[a]; II. fol. 18[b]; III. fol. 41[b].

Codex hoc seculo ineunte exaratus est. (Wilson 48.)

513.

Foll. 55–69. Lit. Bengal. Linn. 8.

Rámacharaṇae commentarius ad Sáhityadarpaṇae librum sextum, quo artis dramaticae praecepta traduntur.

Haec folia post annum 1810 exarata sunt. (Wilson 173[b].)

514.

Foll. 75–86. Lit. Devan. Linn. 11. *Vidagdhamukhamaṇḍanam* (sollertium hominum oris ornamentum), opusculum a *Dharmadása* scriptum. (A.) Incipit:

सिद्धौषधानि भवदुःखमहागदानां ।
पुण्यात्मनां परमकर्णरसायनानि ।
प्रक्षालनैकसलिलानि मनोमलानां
सौद्धोदनेः प्रवचनानि चिरं जयंति ॥१॥

Libellus, in quatuor sectiones (parichheda) divisus, varii generis aenigmata et griphos, eorumque definitiones et nomina proponit. Editus est in Haeberlini Anthologia, p. 269. sqq. Auctor, quum ab Ujjvaladatta laudetur, ante seculum quartum decimum vixit.

Haec voluminis pars post annum 1810 exarata est. (WILSON 303[d].)

515.

Opuscula tria. Lit. Devan. Charta Europ. Foll. 33. Long. 13. Lat. 9. Linn. 27.

Foll. 1–10. *Vidagdhamukhamaṇḍanam.* (C.)

Haec pars e codice A. circiter annum 1820 transscripta est. (WILSON 301[a].)

516.

Foll. 132–150. Lit. Bengal. *Vidagdhamukhamaṇḍanam.* (B.)

Haec folia post annum 1810 exarata sunt. (WILSON 39[c].)

517.

Lit. Devan. Charta Ind. Foll. 227. Long. $13\frac{1}{2}$. Lat. 5. Linn. 9.

Foll. 1–190. *Bháskara-Nṛisinhae*, Sarveṣvarae discipuli, ad *Vátsyáyanae Kámasútra* commentarius, *Vrajalálae* reguli jussu anno 1788 Váráṇasiae scriptus. Incipit: ढुंढिः प्रोद्दंडगंडस्थलयुगविगलद्भूरिदानांबुधारामाधुर्यास्वादमत्तभ्रमर etc. ॥

श्रीसर्वेश्वरशास्त्रिसद्गुरुमहाकारुण्यसाहाय्यतः
श्रीराजव्रजलालविद्वदधिराट्संप्रेरणादीक्षणात्
श्रीकाश्यां नरसिंहशास्त्रिकविना कंदर्पचूडामणेः
श्रीवात्स्यायनसूत्रवृत्तिरखिला प्रौढप्रिया लिख्यते ७

Vátsyáyanae libri, quo ars amandi non leviter neque ambigue traditur, sed ut virum sapientem Indicum vel in rebus foedissimis et spurcissimis decet, ad leges et normam revocatur, initium, e cod. E. I. H. 396. collato commentario nostro, infra subjunxi. Quo non modo argumentum et stylus operis adumbrabitur, sed etiam nomina virorum sanctorum quorundam, qui in eodem studio elaboraverunt, ab oblivione vindicabuntur. Hae igitur tres primae illius paragraphi:

नमो धर्मार्थकामेभ्यस्तत्कामेभ्यो नमो नमः ।
त्रिर्नमो मुक्तिकामेभ्योऽकामेभ्यस्त्वमितं नमः ॥

प्रजापतिर्हि प्रजाः सृष्ट्वा तासां स्थितिनिबंधनं त्रिवर्गस्य शासनमध्यायानां शतसहस्रेणाग्रे प्रोवाच । तस्यैकदेशं स्वायंभुवो मनुर्धर्माधिकारिकं पृथक् चकार । बृहस्पतिरर्थाधिकारिकं । महादेवानुचरश्च नंदी सहस्रेणाध्यायानां पृथक्कामसूत्रं प्रोवाच । तदेव तु पंचभिरध्यायशतैर् Auddálakiḥ Ṣvetaketuḥ संचिक्षेप । तदेव पुनरध्यर्धेनाध्यायशतेन साधारणसांप्रयोगिककन्यासंप्रयुक्तकभार्याधिकारिकपारदारिकवैशिकौपनिषदिकैः सप्तभिरधिकरणैर् Bábhravyaḥ Pánchálaḥ संचिक्षेप । तस्यैकदेशं षष्ठं वैशिकमधिकरणं *Páṭaliputrikáṇáṁ gaṇikánáṁ niyogád* Dattakaḥ पृथक् चकार । तत्प्रसंगाच् Cháráyaṇaḥ साधारणमधिकरणं पृथक् प्रोवाच । Suvarṇanábhaḥ सांप्रयोगिकं । Ghoṭakamukhaḥ कन्यासंप्रयुक्तकं । Gonardíyo भार्याधिकारिकं । Goṇikáputraḥ पारदारिकं । Kuchumára औपनिषदिकं । एवं बहुभिराचार्यैस्तच्छास्त्रं खंडशः प्रणीतमुत्सन्नकल्पमभवत् । तत्र दत्तकादिभिः प्रणीतानां शास्त्रावयवानामेकदेशत्वान्महदिति च बाभ्रवीयस्य दुरध्येयत्वात्संक्षिप्य सर्वमल्पेन ग्रंथेन कामसूत्रमिदं प्रणीतं । तस्यायं प्रथमाधिकरणसमुद्देशः ।

शास्त्रसंग्रहः ।१। त्रिवर्गप्रतिपत्तिः ।२। विद्यासमुद्देशः ।३। नागरिकवृत्तं ।४। नायकसहायदूतीकर्मविमर्शः ।५॥ इति साधारणं प्रथममधिकरणं ॥१॥ अध्यायाः पंच । प्रकरणानि पंच ॥१॥

प्रमाणकालभावेभ्यो रतावस्थापनं ।१। प्रीतिविशेषाः ।२॥१॥ आलिंगनविचाराः ।३॥२॥ चुंबनविकल्पाः ॥४॥३॥ नखरदशनजातयः ।५॥४॥ दशनच्छेद्यविधयः ।६। देश्या उपचाराः ।७॥५॥ संवेशनप्रकाराः ।८। चित्ररतानि ।९॥६॥ प्रहणनयोगाः ।१०। तद्युक्ताश्च सीत्कृतोपक्रमाः ।११॥७॥ पुरुषायितं ।१२। पुरुषोपसृप्तानि ।१३॥८॥ औपरिष्टकं ।१४॥९॥ रतारंभावसानिकं ।१५। रतविशेषाः ।१६। प्रणयकलहः ।१७॥१०॥ इति सांप्रयोगिकं द्वितीयमधिकरणं । अध्याया दश । प्रकरणानि सप्तदश ॥२॥

वरणविधानं ।१। संबंधनिर्णयः ।२॥१॥ कन्याविश्रंभणं ।३॥२॥ बालाया उपक्रमाः ।४। इंगिताकारसूचनं ।५॥३॥ एकपुरुषाभियोगः ।६। प्रयोज्यस्योपावर्तनं ।७। अभियोगतश्च कन्याप्रतिपत्तिः ।८॥४॥ विवाहयोगः ।९॥५॥ इति कन्यासंप्रयुक्तकं तृतीयमधिकरणं । अध्यायाः पंच । प्रकरणानि नव ॥३॥

एकचारिणीवृत्तं ।१। प्रवासचर्या ।२॥१॥ सपत्नीषु ज्येष्ठावृत्तं ।३। कनिष्ठावृत्तं ।४। पुनर्भूवृत्तं ।५। दुर्भगावृत्तं ।६। आंतःपुरिकं ।७। पुरुषस्य बह्वीषु प्रतिपत्तिः ।८॥२॥ इति भार्याधिकारिकं चतुर्थमधिकरणं । अध्यायौ द्वौ । प्रकरणान्यष्टौ ॥४॥

स्त्रीपुरुषशीलावस्थापनं ।१। व्यावर्तनकारणानि ।२। स्त्रीषु सिद्धाः पुरुषाः ।३। अयत्नसाध्या योषितः ।४॥१॥ परिचयकारणानि ।५।

अभियोगाः ।६॥२॥ भावपरीक्षा ।७॥३॥ दूतीकर्माणि ।८॥४॥ ईश्वरकामितं ।९॥५॥ आंतःपुरिकं दाररक्षितकं ।१०॥६॥ इति पारदारिकं पंचमनधिकरणं । अध्यायाः षट् । प्रकरणानि दश ॥५॥

गम्यचिंता ।१। गमनकारणानि ।२। उपावर्तनविधिः ।३॥१॥ कांतानुवृत्तं ।४॥२॥ अर्थागमोपायाः ।५। विरक्तलिंगानि ।६। विरक्तप्रतिपत्तिः ।७। निष्कासनक्रमाः ।८॥३॥ विशीर्णप्रतिसंधानं ।९॥४॥ लाभविशेषः ।१०॥५॥ अर्थानर्थानुवंधसंशयविचारः ।११। वेश्याविशेषाश्च ।१२॥६॥ इति वैशिकं षष्ठमधिकरणं । अध्यायाः षट् । प्रकरणानि द्वादश ॥६॥

सुभगंकरणं ।१। वशीकरणं ।२। वृष्याश्च योगाः ।३॥१॥ नष्टरागप्रत्यानयनं ।४। वृद्धिविधयः ।५। चित्राश्च योगाः ।६॥२॥ इत्यौपनिषदिकं सप्तममधिकरणं । अध्यायौ द्वौ । प्रकरणानि षट् ॥७॥

एवं षट्त्रिंशदध्यायाः । चतुःषष्टिः प्रकरणानि । अधिकरणानि सप्त । सपादं श्लोकसाहस्रमिति शास्त्रस्य संग्रहः ।

संक्षेपमिममुक्त्वास्य विस्तरोऽतः प्रवक्ष्यते ।
इष्टं हि विदुषां लोके समासव्यासभाषणं ॥

इति वात्स्यायनीये कामसूत्रे साधारणे प्रथमेऽधिकरणे शास्त्रसंग्रहः प्रथमोऽध्यायः ॥१॥

धनुर्धरः ॥ तं दृष्ट्वा देवभावेन प्रणम्य शिरसा भृशं । आगतोऽस्मि. 37. *Varáhamatanibarhaṇam.* De Verris cultoribus. 38. *Lokamatanibarhaṇam.* De quatuordecim mundorum cultoribus. 39. *Guṇamatanibarhaṇam.* एवमेतन्मते परिहृते पुनरन्ये गुणोपसकाः प्रत्यवतिष्ठंतः किल स्वामिनमिदमाहुः । स्वामिन् गुणाः किल लोककर्तारो ब्रह्मादिदेवकारणं किल । अतो वयं गुणोपासनमात्रेण कृतार्थाः । सर्वस्यापि प्रपंचस्य गुणमयत्वात्सर्वैलोकपूज्यत्वं गुणोपासकानामस्माकमस्ति । तस्माद्भवंतोऽपि गुणोपासनं कुर्वंतो मुक्ता भविष्यंतीति प्राप्ते दुष्टमतशिक्षाया आचार्यैरिदमुच्यते । किमुक्तं भवद्भिर्मूढतमैर्गुणोपासनं कर्तव्यमिति । तदनुपपन्नं तेषां जन्यत्वात् । अशाश्वतगुणोपासनेन किं शाश्वतफलरूपो मोक्षोऽस्ति । तस्मान्मूढबुद्धिं परित्यज्य शुद्धाद्वैतविद्यामाश्रित्य सत्याख्यशीला विगतावेशभावा भवतेति प्रोक्तास्ते[1] --- कृतविलासयतिविलासाः शिष्या बभूवुः ॥ 40 (fol. 78b). *Sánkhyamatanibarhaṇam.* 41. *Yogamatanibarhaṇam.* 42. *Pílumatanibarhaṇam.* Incipit: ततः पीलूनां वादिनो (i. e. Atomici) धीरशिवभट्टशिवगंगानाथादयः परमगुरुं नत्वेदमूचुः । स्वामिन् मदीयमतं शृणु सांख्ययोगनिराकरणमिव सुलभं (?) । Eaque sententia haec: Libris logicis qui creator dominus statuitur dominus supremus, is propalam creator est. Hic terrae et reliquorum elementorum quae atomi sunt, earum conjunctionem creatione, dissolutione separationem facit, quum atomi sempiternae sint. Hoc modo quum terrae, ignis, aëris materia orta esset, ex his Atala et Vitala mundos creavit, et animalia, quae mundos varios inhabitarent, fecit, dum ipse omnium rerum testis, omnia videns perstat, omnia sic complens ut spatium: न्यायशास्त्रैः कर्तेश्वरः प्रसिद्धः परमेश्वरः साक्षात्कर्ता । स एव सृष्टौ भूम्याद्यणुसंयोगं लये वियोगं च करोति भूम्याद्यणूनां नित्यत्वात् । एवं भूम्यग्निवायुप्रपंचे जाते तैरेवातलवितललोकसृष्टिं विधाय तत्तल्लोकवासयोग्यान्प्राणिनः सृष्ट्वा स्वयं सर्वसाक्षी सर्वं संपश्यन्नास्ते सर्वपरिपूर्ण आकाशवत् । 43. *Karmamatanibarhaṇam.* Inde Ṣankara Káṣím proficiscitur. Sectae ritibus observandis salutem summam quaerentis principes Kanakagiri et Turanganátha nominantur. 44. *Chandramatanibarhaṇam.* 45. *Bhaumádigrahapanchakasyárthád Ráhumatasya nibarhaṇam.* 46. *Kshapaṇakamatanibarhaṇam.* Kshapaṇaka ille, cui Ṣankara cap. 27. tempore alio se responsurum esse pollicitus erat, denuo revertitur. 47. *Pitṛimatanibarhaṇam.* 48. *Ṣesha-garuḍamatanibarhaṇam.* Hujus sectae duces Ṣankhapáda et Kubjalíḍha fuerunt. 49. *Siddhamatanibarhaṇam.* Sectae principes Chirakírti, Nityánanda, Parárjuná (? चिरकीर्तिजनितानंदपरार्जुनादयः) appellantur. 50 (fol. 92a). *Gandharvamatanibarhaṇam.* De secta Viṣvávasu Gandharvam colente. 51. *Bhútavetálamatanibarhaṇam.* Incipit: तत्र केचिच्चितिभस्मव्याप्तसर्वांगाः शल्यविशेषभूषितमणिबंधगला भूतराडुपासन[पराः] etc. 52. Venerabilis ille Vyása, Brahmasútrarum auctor, ad Maṇikarṇikae ripam cum Ṣankara congressus, et de aphorismi cujusdam interpretatione altercatus, vapulat. 53, 54. Ṣankara a Vyása et Brahmaṇe deo monotheismi propagator instituitur. 55. Ṣankara, postquam Amaralingam, Kedáralingam, Badarínáráyaṇam[2], Dvárakám, Ayodhyám, Gayám visit, ad colendum Mallikárjunam proficiscitur, ubi nuntius adfertur, Bhaṭṭácháryam quendam, e regione septentrionali profectum, (nimirum Kumárilabhaṭṭam, Ṣankarae aequalem!) Bauddhas et Jainas ferro et igni delere (दुष्टमतावलंबिनो बौद्धान् जैनान् -- तेषां शीर्षाणि परशुभिश्छित्त्वा बहुमूलूखलेषु निक्षिप्य कटभ्रमणैश्चूर्णीकृत्य चैवं दुष्टमतध्वंसमाचरन्निर्भयो वर्तते). 56. Quocum, in Karísha monte degente (prope Ruddha? urbem), cum collocutus esset, Vidyálayam[3] (Hastinápurád ágneyadigbhágasthalam) venit, et in ejus loci vicinia Maṇḍanamiṣram disputando confutat. 57. Ipse vero, Kámaṣástrae imperitus, a Sarasaváṇí, Maṇḍanamiṣrae uxore, vincitur. 58–61. Quam artem ut edisceret, Ṣankara regis mortui cujusdam corpus intravit. 62 (fol. 100a). Ṣankara prope Ṣringapuram in Tungabhadrae ripa academiam instituit, et magistrorum ordinem, *Bhárati* titulum gerentem, condit. 63. In ea academia duodecim annos moratus, Ṣankara *Sureṣvaram* scholae rectorem (píṭhádhyaksha) instituit. Ipse Ahobalam, Venkaṭagirim, et regionem circiter Kánchínagaram sitam visit, Ṣivakánchí et Vishṇukánchí urbes condit, et *Támraparṇí* loci (ताम्रपर्णीतटाक) incolas monotheismum docet. 64. Kámákshís cultum instaurat, qui cultus a Sánkhyáyana conditus esse dicitur. 65. Circulos mysticos, Ṣríchakra appellatos, invenit. 66. Incipit: कदाचिच्छिष्या *Anantánandagiri*-mukhyá नत्वेदमूचुः । मोक्ष(स्य)मार्गलक्षणं वद । Ṣankara coram discipulis philosophiae Vedánticae principia exponit. 67–72. Ṣankara, eousque quum in numinis indivisibilis religione docenda et disseminanda elaborasset, aetatis imbecillitate (necnon discipulorum discordia!) perspecta, per discipulos principalium superstitionum instituta tradit (earum puto, quae Anantánandae temporibus exstabant): कलावस्मिन्युगनानापापपरिध्वस्तज्ञानांकुरेषु मर्त्येषु *ṣuddhádvaitavidyáyám anadhikárishu* तेषां वृत्तिः पुनरपि यथेप्सिता भवतीति सम्यग्विचार्य लोकरक्षार्थं वर्णाश्रमपरिपालनार्थं परमतकल्पनां जीवेशभेदास्पदां च रचयितुमुपक्रम्य etc. Quare *Paramatakálánalam* discipulum superstitionis Ṣivaiticae (67), *Lakshmaṇam* et *Hastámalakam* Vishṇuiticae (68), *Divakáram* solis cultus (69), *Tripurakumáram* superstitionis Ṣákticae (70), *Girijákumáram* Gáṇapatyae (71), *Vaṭukanátham*

[1] सत्याख्यशिलाविगतवेषतायाभवथेतिप्रोक्तास्ते कृतवि° MS.

[2] Ibi aquae perfrigidae Ṣankarae precibus calidae evadunt.

[3] तद्देशवासिनस्तु विभिलविंदुरिति वदंति ।

Kápálikae doctorem (73) delegat. 74. Discipuli Ṣankaram celebrant. Capitis finis desideratur. Desinit in verbis: यो मूढा जीवपरभेदं जल्पंति इह भवाब्धौ मग्नाः। नानायोनिषु मग्नाः पुनरपि मातु स्तनरसपानान्मत्ताः वाल्यं पुनरपि कौमारं.

Libros auctor hosce laudat: a. *Upanishad: Atharvaṣikhá, Atharvaṣiras, Kálágnirudra,* Kaivalya, Taittiríya, *Náráyaṇa,* Bṛihadáraṇyaka, *Mahopanishad,* Muṇḍaka, Varuṇa, Ṣvetáṣvatara. b. *Puráṇa:* Bṛihannáradíya, *Bhágavata* (c. 10. उक्तं च भागवते भगवद्भक्तस्य लक्षणं। न चलति निजवर्णधर्मतो यः सममतिरात्मविपक्षपक्षे। न जहति न च हंति कंचिदुच्चैः कृतमनसं[1] तमवैहि विष्णुभक्तं।), Márkaṇḍeyapuráṇa, *Ṣivagítá, Skándapuráṇa,* Agastyasanhitá. c. *Tantra. Brahmayámala, Rudrayámala.* d. alios libros: Jaiminisútra, Súryasiddhánta, *Adhikaraṇaratnamálá.*

In opere componendo[2] auctor id egisse videtur, ut, quae superstitiones temporibus suis praevalebant, eas dilucida et populari captui adaptata Vedántae expositione refutaret. Cui doctrinae ut auctoritatem ascisceret, Ṣankaram cum singularum sectarum principibus disputantem, omnes eloquentia sua ad veram fidem traducentem, immo miracula efficientem induxit. Quod in sectarum externis indiciis et ritibus describendis moratur, intimam vero superstitionum et dogmatum cognitionem rarissime prodit, id his de causis factum esse puto. Alias enim fidei ethnicae species, quarum explicationem aggressus est, quo tempore liber scriptus est, obsoletas, auctor auditione tantum accepisse, aliae ita quidem a cultu communi distinctae, ut disciplinam peculiarem constituerent, omnino non videntur fuisse. An Áryas illos antiquos propterea triginta tres religiones habuisse putabimus, quod tantus deorum supremorum numerus tradatur, hymnique singulos celebrantes exstent? Nomina autem, quae sectarum antistitibus tribuit, fere omnia ficta et a superstitionibus, quas capitibus singulis exponit, desumta esse puto. Non enim veri simile videtur, in tanto numero tam paucos fuisse dignos, quorum memoria ab aliis scriptoribus traderetur. Eum vero Ṣankarae discipulum fuisse credemus, qui, ut alias fabulas taceam, Kumárilam magistri aequalem facit? Atque eos libros omnes, quos Ṣankara laudans fingitur, tunc jam scriptos esse nobis persuadebimus, ne Bhágavata quidem, quo Vishṇubhaktae celebrantur, Ṣivagítá, Rudrayámala[3] exceptis? Utrum igitur Anantánandagiri noster idem sit cum Ánandajnánagiri, qui Sureṣvarae, Ṣankarae discipuli, Bṛihadáraṇyakae interpretatione se usum esse profitetur, an nomen illud a serae aetatis homine usurpatum sit, in praesentia quidem in medio relinquo.

Haec voluminis pars circiter annum 1820 negligentissime exarata est, et in medio libro lacunae minores inveniuntur. In hac codicis conditione, ea quae supra excerpsi, non equidem pro veris venditare, sed lectorum animos ad opus non prorsus contemnendum advertere volui. (WILSON 348[a].)

625.

Lit. Devan. Charta Ind. Foll. 105. Long. 13½. Lat. 5. Linn. 9.

Ṣankaravijayas. (B.)

Titulus in fine capitum hic subscriptus est: इत्यानंदगिरिकृतौ etc. In margine codicis A. शं° क्र° legitur.

De codice Havniensi cf. Westergaard, p. 10.

Hoc apographon ex eodem codice atque A. sed post annum 1830 transscriptum est. Desinit in capite 70. (MILL 30.)

626.

Foll. 113–206. Linn. 10. *Sankshepaṣankarajayas,* Ṣankarae victoria succincte enarrata, liber *Mádhavae* tributus. (A.) Incipit: प्रणम्य परमात्मानं ṣrí-*Vidyátírtha*-rúpiṇam। प्राचीनशंकरजये सारः संगृह्यते स्फुटं ॥१॥ यद्वद्घटानां पटलो विशालो विलोक्यतेऽल्पे किल दर्पणेऽपि। तद्वन्मदीये लघुसंग्रहेऽस्मिन्नुद्वीक्ष्यतां शांकरवाक्यसारः ॥२॥ यथातिरुच्ये मधुरेऽपि रुच्युत्पादाय रुच्यंतरयोजनार्हा। तथेष्यतां प्राक्कविहृद्यपद्येष्वेषापि मत्पद्यनिवेशभंगी ॥३॥ स्तुतोऽपि सम्यक्कविभिः पुराणैः कृत्यापि नस्तुष्यतु भाष्यकारः। क्षीराब्धिवासी सरसीरुहाक्षः क्षीरं पुनः किं चकमे न गोष्ठे ॥४॥ पयोब्धिविवरीसुनिःसृतसुधाझरीमाधुरीधुरीणभणिताधरीकृतफणाधराधीशितुः। शिवंकरसुशंकराभिधजगद्गुरोः प्रायशो यशो हृदयशोधकं कलयितुं समीहामहे ॥५॥[4] क्वेमे शंकरसद्गुरोर्गुणगणा दिग्जालकूलंकषाः कालोन्मीलितमालतीपरिमलावष्टंभमुष्टिंधयाः। क्वाहं हंत तथापि सद्गुरुकृपापीयूषपारंपरीमग्नोन्मग्नकटाक्षवीक्षणबलादस्ति प्रशस्तार्हता ॥६॥ धन्यंमन्यविवेकशून्यसुजनंमन्याब्धिकन्यानटीनृत्तोन्मत्तनराधमाधमकथासंमर्ददुष्कर्दमैः। दिग्धां मे गिरमद्य शंकरगुरुक्रीडासमुद्यद्यशःपारावारसमुच्चलज्जलझरैः संक्षालयामि स्फुटं ॥७॥ वंध्यासूनुखरीविषाणसदृशक्षुद्रक्षितींद्रक्षमाशौर्योदार्यदयादिवर्णनकलादुर्वासनावासि-

[1] सतमनसं MS.

[2] Major pars oratione soluta scripta est, nunnunquam versus epicus aliaque metra adhibentur.

[3] Dhanapati auctore Ṣankara ipse in Ṣivapuráṇa (ubinam vero?) laudatur. Ad Sankshep. I, 2: शिवावतारत्वं च भगवतो भाष्यकारस्य शिवपुराणादेरवगंतव्यं। तथा चोक्तं शिवपुराणे। व्याकुर्वन्व्याससूत्रार्थं श्रुतेरर्थं यथोचिवान्। श्रुतेर्न्याय्यः स एवार्थः शंकरः सवितानन: ॥

[4] Hujus distichi annominationem observatam velim.

तां । मद्वाणीमधिवासयामि यमिनस्त्रैलोक्यरंगस्थलीनृत्यत्कीर्तिनटीपटीरपटलीचूर्णैर्विकीर्णैः क्षितौ ॥८॥ पीयूषद्युतिखंडमंडनकृपारूपांतरः श्रीगुरुप्रेमस्थेमसमर्हणार्हमधुरव्याहारसूनोत्करः । प्रौढोऽयं nava-Kálidása (!)-kavitásaṃtánasaṃtánako दद्यादद्य समुद्यतः सुमनसामामोदपारंपरीं ॥९॥ सामोदैरनुमोदिता मृगमदैरानंदिता चंदनैर्मंदारैरभिनंदिता प्रियगिरा काश्मीरजैः स्मेरिता । वागेषा nava-*Kálidása*-vidusho दोषोज्झिता दुष्कविव्रातैर्निष्करुणैः क्रियेत विकृता धेनुस्तुरुष्कैरिव ॥१०॥ यद्वा दीनदयालवः सहृदयाः सौजन्यकल्लोलिनीदोलांदोलनखेलनैकरसिकस्वांताः समंतादमी । संतः संति परोक्तिमौक्तिकजुषः किं चिंतयाथानया[1], यद्वा तुष्यति शंकरः परगुरुः कारुण्यरत्नाकरः ॥११॥ उपक्रम्य स्तोतुं कतिचन गुणान् शंकरगुरोः प्रभग्नाः श्लोकार्धे, कतिचन तदर्धार्धरचने । अहं तुष्टूषुस्तानहह कलये शीतकिरणं कराभ्यामाहर्तुं व्यवसितमतेः साहसिकतां ॥१२॥ तथाप्युज्जृंभंते मयि विपुलदुग्धाब्धिलहरीलसत्कल्लोलालीलसितपरिहासैकरसिकाः । अमी मूकान्वाचालयितुमपि शक्ता यतिपतेः कटाक्षाः, किं चित्रं भृशमघटिताभीष्टघटने ॥१३॥ अस्मज्जिह्वाग्रसिंहासनमुपनयतु स्वोक्तिधारामुदारामद्वैताचार्यपादस्तुतिकृतसुकृतोदारताशारदांबा । नृत्यन्मृत्युंजयोच्चैर्मुकुटतटकुटीनिःस्रवत्स्वःस्रवंतीकल्लोलोद्वेलकोलाहलमदलहरीखंडिपांडित्यहृद्यां[2] ॥१४॥ क्वेदं शंकरसद्गुरोः सुचरितं क्वाहं वराकी, कथं निर्वघ्नासि चिरार्जितं मम यशः, किं मज्जयस्यंबुधौ । इत्युक्त्वा चपलां पलायितवतीं वाचं नियुंक्ते बलात्प्रत्याहृत्य गुणस्तुतौ कविगणश्चित्रं गुरोर्गौरवं ॥१५॥ rukshaiksharaván-nighaṇṭuṣaraṇair auṇádikapratyayapráyair हंत यङंतदंतुरतरैर्दुर्बोधदूरान्वयैः । क्रूराणां कवितावतां कतिपयैः कष्टेन कृष्टैः पदैर्हा हा स्याद्वशगा किरातविततेरेणीव वाणी मम? ॥१६॥ नेता यत्रोल्लसति भगवत्पादसंज्ञो महेशः, शांतिर्यत्र प्रकचति रसः शेषवानुज्ज्वलाद्यैः । यत्राविद्याक्षतिरपि फलं, तस्य काव्यस्य कर्ता धन्यो *Vyásachalakavivaras*[3], तत्कृतिज्ञाश्च धन्याः ॥१७॥

तत्रादिम उपोद्घातो द्वितीये तु तदुद्भवः । तृतीये तत्तदमृतांधोऽवतारनिरूपणं ॥१८॥ चतुर्थसर्गे तच्छुद्धाष्टमप्राक्चरितं स्थितं । पंचमे तद्योग्यसुखाश्रमप्राप्तिनिरूपणं ॥१९॥ महतानेहसा यैषा संप्रदायागता गता । तस्याः शुद्धात्मविद्यायाः षष्ठे सर्गे प्रतिष्ठितिः ॥२०॥ तद्व्यासाचार्यसंदर्शविचित्रं सप्तमे स्थितं । स्थितोऽष्टमे मंडनार्यसंवादो, नवमे मुनेः ॥२१॥ वाणीसाक्षिकसार्वज्ञनिर्वाहोपायचिंतनं । दशमे योगशक्त्या भूपतिकायप्रवेशनं ॥२२॥ बुद्ध्वा मीनध्वजकलां तत्प्रसंगप्रपंचनं । सर्गे एकादशे तूग्रभैरवाभिधनिर्जयः ॥२३॥ द्वादशे हस्तधात्र्यार्यतोटकोभयसंश्रयः[4] । वार्त्तिकांतब्रह्मविद्याचालनं तु त्रयोदशे ॥२४॥ चतुर्दशे पद्मपादतीर्थयात्रानिरूपणं । सर्गे पंचदशे तूक्तं तदाशाजयकौतुकं ॥२५॥ षोडशे शारदापीठवासस्तस्य महात्मनः । इति षोडशभिः सर्गैर्व्युत्पाद्या शांकरी कथा ॥२६॥ सैषा कलिमलच्छेत्त्री सकृच्छ्रुत्यापि कामदा । नानाप्रश्नोत्तरै रम्या विदामारभ्यते मुदे ॥२७॥

एकदा देवता रूप्याचलस्थमुपतस्थिरे । देवदेवं तुषारांशुमिव पूर्वाचलस्थितं ॥२८॥ प्रसादानुमितस्वार्थसिद्धयः प्रणिपत्य तं । मुकुलीकृतहस्ताब्जा विनयेन व्यजिज्ञपन् ॥२९॥ विज्ञातमेव भगवन्विद्यते यद्धिताय नः । वंचयन्सुगतान्बुद्धवपुर्धारी जनार्दनः ॥३०॥ तत्प्रणीतागमालंबैर्वैद्धैर्दर्शनदूषकैः । व्याप्तेदानीं प्रभो धात्री रात्रिः संतमसैरिव ॥३१॥ वर्णाश्रमसमाचारान्द्विषंति ब्रह्मविद्विषः । ब्रुवंत्याम्नायवचसां जीविकामात्रतां प्रभो ॥३२॥ न संध्यादीनि कर्माणि न्यासं वा न कदाचन । करोति मनुजः कश्चित्सर्वे पाषंडतां गताः ॥३३॥ श्रुते पिदधति श्रोत्रे क्रतुरित्यक्षरद्वये । क्रियाः कथं प्रवर्तेरन्कथं क्रतुभुजो वयं ॥३४॥ शिवविष्णवागमपरैर्लिंगचक्रादिचिह्नितैः । पाषंडैः कर्म संन्यस्तं कारुण्यमिव दुर्जनैः ॥३५॥ अनन्येनैव भावेन गच्छंत्युत्तमपूरुषं । श्रुतिः साध्वी मदक्षीवैः का वा शाक्तैर्न दूषिता ॥३६॥[5] सद्यः कृत्तद्विजशिरःपंकजार्चितभैरवैः । न ध्वस्ता लोकमर्यादा का वा कापालिकाधमैः ॥३७॥ अन्येऽपि बहवो मार्गाः संति भूमौ ससंकटाः । जनैर्येषु पदं दत्त्वा दुरंतं दुःखमाप्यते ॥३८॥ तद्भवाँल्लोकरक्षार्थमुत्साद्य निखिलान्खलान् । वर्त्म स्थापयतु श्रौतं जगद्येन सुखं व्रजेत् ॥३९॥ इत्युक्त्वोपरतान्देवानुवाच गिरिजाप्रियः । मनोरथं पूरयिष्ये मानुष्यमवलंब्य वः ॥४०॥ दुष्टाचारविनाशाय धर्मसंस्थापनाय च । भाष्यं कुर्वन्ब्रह्मसूत्रतात्पर्यार्थविनिर्णयं ॥४१॥ मोहनप्रकृतिद्वैतध्वांतमध्याह्नभानुभिः । चतुर्भिः सहितः शिष्यैश्चतुर्भिर्हरिवद्भुजैः ॥४२॥[6] यतींद्रः शंकरो नाम्ना भविष्यामि महीतले । मद्वत्तथा भवंतोऽपि मानुषीं तनुमाश्रिताः ॥४३॥ तं मामनुसरिष्यंति सर्वे त्रिदिववासिनः । तदा मनोरथः पूर्णो भवतां स्यान्न संशयः ॥४४॥ ब्रुवन्नेवं दिविषदः कटाक्षानन्यदुर्लभान् । कुमारे निदधे भानुः किरणानिव पंकजे ॥४५॥ क्षीरनीरनिधेर्वीचिसचिवान्प्राप्य तान्गुहः । कटाक्षान्मुमुदे रश्मीन्कुमुद्वानिंदवानिव ॥४६॥ अवदन्नंदनं स्कंदममंदं चंद्रशेखरः । दंतचंद्रातपानंदिवृंदारकचकोरकः[7] ॥४७॥ शृणु सौम्य वचः श्रेयो जगदुद्धारगोचरं । कांडत्रयात्मके[8] वेदे प्रोद्धृते स्याद्द्विजोद्धृतिः ॥४८॥ तद्रक्षणे रक्षितं स्यात्सकलं जगतीतलं । तदधीनत्वतो वर्णाश्रमधर्मततेस्, ततः ॥४९॥ इदानीमिदमुद्धार्यमिति वृत्तिमतः पुरा । मम गूढाशयविदौ विष्णुशेषौ समीपगौ ॥५०॥ मध्यमं कांडमुद्धर्तुमनुज्ञातौ मयैव तौ । अवतीर्यांशतो भूमौ संकर्षणपतंजली ॥५१॥ मुनी

1 चिंतयानंतया Schol. B. E. I. H. 441. चिंतया मेऽनया E. I. H. 1960.

2 *Khaṇḍin* vocabulo *Harsha* significatur.

3 Schol. व्यास इवाचलः स्थिरश्चासौ कविश्रेष्ठश्चेति व्यासाचलकविवरो माधवः । Me vero nescio quae impellunt, ut sub hoc epitheto veri auctoris nomen (Vyásagiri ?) latere existimem.

4 Hastadhátrí = Hastámalaka.

5 'Quae animo integro uni viro summo devota est, num quaequam traditio honesta (quasi matrona) superstes est, quae non a superstitionis Ṣákticae asseclis temulentis contaminata sit.' Auctor doctrinas sacras cum matronis comparat, quibus utrisque Ṣáktas prave usos esse constat.

6 'Cum quatuor aptis discipulis conjunctus, sicut Hari quatuor manibus, qui, sol velut meridianus, dualitatis tenebras dispellent, fatuitate (*ajnána*) productas . . .'

7 दंतचंद्रामितानं° A. et E. I. H. 1960.

8 Schol. कांडत्रयात्मके । कर्मोपसनाज्ञानभेदेन वृंदत्रयात्मके ।

भूत्वा तदोपास्तियोगकांडकृतौ[1] स्थितौ । अग्रिमं ज्ञानकांडं तूद्धरिष्यामीति, देवताः ॥५२॥ संप्रति प्रतिजाने स्म, जानात्येव भवानपि । जैमिनीयन्यायवार्धेः शरत्पर्वशशी भव ॥५३॥ विशिष्टं कर्मकांडं त्वमुद्धर ब्रह्मणः कृते । सुब्रह्मण्य इति ख्यातिं गमिष्यसि ततो, ऽधुना ॥५४॥ नैगमीं कुरु मर्यादामवतीर्य महीतले । निर्जित्य सौगतान्सर्वानाम्नायार्थविरोधिनः ॥५५॥ ब्रह्मापि ते सहायार्थं मंडनो नाम भूसुरः । भविष्यति महेंद्रोऽपि सुधन्वा नाम भूमिपः ॥५६॥ तथेति प्रतिजग्राह विधेरपि विधायिनीं । बुधानीकपतिर्वाणीं सुधाधारामिव प्रभोः ॥५७॥ अथेंद्रो नृपतिर्भूत्वा प्रजा धर्मेण पालयन् । दिवं चकार पृथिवीं स्वपुरीममरावतीं ॥५८॥ सर्वज्ञोऽप्यसतां शास्त्रे कृत्रिमश्रद्धयान्वितः । प्रतीक्षमाणः क्रौंचारिं मेलयामास सौगतान् ॥५९॥ ततः स तारकारातिरजनिष्ट महीतले । भट्टपादाभिधा यस्य भूषा दिक्सुदृशामभूत् ॥६०॥ स्फुटयन्वेदतात्पर्यमभाज्जैमिनिसूत्रितं । सहस्रांशुरिवानूरुव्यंजितं भासयञ्जगत् ॥६१॥ राज्ञः सुधन्वनः प्राप नगरीं स जयन्दिशः । प्रत्युद्गम्य क्षितींद्रोऽपि विधिवत्तमपूजयत् ॥६२॥ सोऽभिनंद्याशिषा भूपमासीनः कांचनासने । तां सभां शोभयामास सुरभिर्द्युवनीमिव ॥६३॥ सभासमीपविटपिश्रितकोकिलकूजितं । श्रुत्वा जगाद तद्व्याजाद्राजानं पंडिताग्रणीः ॥६४॥ मलिनैश्चेन्न संगस्ते नीचैः काककुलैः पिक । श्रुतिदूषकनिर्ह्रादैः श्लाघनीयस्तदा भवेः ॥६५॥ षडभिज्ञा निशम्येमां वाचं तात्पर्यगर्भितां । नितरां चरणस्पृष्टा भुजंगा इव चुक्रुधुः ॥६६॥ छित्त्वा युक्तिकुठारेण बुद्धसिद्धांतशाखिनं । स तद्ग्रंथेंधनैश्चौर्यैः क्रोधज्वालामवर्धयत् ॥६७॥ सा सभा वदनैस्तेषां रोषपाटलकांतिभिः । बभौ बालातपाताम्रैः सरसीव सरोरुहैः ॥६८॥ उपन्यस्यत्सु साक्षेपं खंडयत्सु परस्परं । तेषूद्तिष्ठन्निर्घोषो भिंदन्निव रसातलं ॥६९॥ अधः पेतुर्बुधेंद्रेण क्षताः पक्षेषु तत्क्षणं । व्यूढकर्कशतर्केण तथागतधराधराः ॥७०॥[2] स सर्वज्ञपदं विज्ञोऽसहमान इव द्विषां । चकार चित्तविन्यस्तानेतान्मौनविभूषितान् ॥७१॥ ततः प्रक्षीणदर्पेषु बौद्धेषु वसुधाधिपं । बोधयन्बहुधा वेदवचांसि प्रशशंस सः ॥७२॥ बभाषेऽथ धराधीशो विद्यायत्तौ जयाजयौ । यः पतित्वा गिरेः शृंगादव्ययस्तन्मतं ध्रुवं ॥७३॥ तदाकर्ण्य मुखान्यन्ये परस्परमलोकयन् । द्विजाग्र्यस्तु स्मरन्वेदानारुरोह गिरेः शिरः ॥७४॥ यदि वेदाः प्रमाणं स्युर्भूयात्काचिन्न मे क्षतिः । इति घोषयता तस्मान्न्यपाति सुमहात्मना ॥७५॥ किमु दौहित्रदत्तेऽपि पुण्ये विलयमास्थिते । ययातिश्च्यवते स्वर्गात्पुनरित्यूचिरे जनाः ॥७६॥ अपि लोकगुरुः शैलात्तूलपिंड इवापतत् । श्रुतिरात्मशरण्यानां व्यसनं नो छिनत्ति किं ॥७७॥ श्रुत्वा तदद्भुतं कर्म द्विजा दिग्भ्यः समाययुः । घनघोषमिवाकर्ण्य निकुंजेभ्यः शिखावलाः ॥७८॥ दृष्ट्वा तमक्षतं राजा श्रद्धां श्रुतिषु संदधे । निनिंद बहुधात्मानं खलसंसर्गदूषितं ॥७९॥ सौगतास्त्वब्रुवन्नेदं प्रमाणं मतनिर्णये । मणिमंत्रौषधैरेवं देहरक्षा भवेदिति ॥८०॥ दुर्विधैरन्यथानीते प्रत्यक्षेऽर्थेऽपि पार्थिवः । भ्रुकुटीभीकरमुखः संधामुग्रतरां व्यधात् ॥८१॥ पृच्छामि भवतः किंचिद्वक्तुं न प्रभवंति ये । यंत्रोपलेषु सर्वांस्तान्घातयिष्याम्यसंशयं ॥८२॥ इति संश्रुत्य[3] गोत्रेशो घटमाशीविषान्वितं । आनाय्यात्र[4] किमस्तीति पप्रच्छ द्विजसौगतान्[5] ॥८३॥ वक्ष्यामहे वयं भूयः श्वः प्रभातेऽस्य निर्णयं । इति प्रसाद्य राजानं जग्मुर्भूसुरसौगताः ॥८४॥ पद्मा इव तपस्तेपुः कंठद्वयसपाथसि । द्युमणिं प्रति भूदेवाः सोऽपि प्रादुरभूत्ततः ॥८५॥ संदिश्य वचनीयांशमादित्येऽतर्हिते द्विजाः । आजग्मुरपि निश्चित्य सौगताः कलशस्थितं ॥८६॥ ततस्ते सौगताः सर्वे भुजगोऽस्तीत्यवादिषुः । भोगीशभोगशयनो भगवानिति भूसुराः ॥८७॥ श्रुतभूसुरवाक्यस्य वदनं पृथिवीपतेः । कासारशोषणम्लानसारसश्रियमाददे ॥८८॥ अथ प्रोवाच दिव्या वाक् सम्राजमशरीरिणी । नुदंती संशयं तस्य सर्वेषामपि शृण्वतां ॥८९॥ सत्यमेव महाराज ब्राह्मणा यद्बभाषिरे । मा कृथाः संशयं तत्र भव सत्यप्रतिश्रवः ॥९०॥ श्रुत्वाशरीरिणीं वाणीं ददर्श वसुधाधिपः । मूर्तिं मधुद्विषः कुंभे सुधामिव सुराधिपः ॥९१॥ निरस्ताखिलसंदेहो विन्यस्तेतरदर्शनात् ।[6] व्यधादाज्ञां ततो राजा वधाय श्रुतिविद्विषां ॥९२॥ आ सेतोरा तुषाराद्रेर्बौद्धानावृद्धबालकं ।[7] न हंति यः स हंतव्यो भृत्यानित्यन्वशान्नृपः ॥९३॥ इष्टोऽपि दृष्टदोषश्चेद्वध्य एव महात्मनां । जननीमपि किं साक्षान्नावधीद्भृगुनंदनः[8] ॥९४॥ स्कंदानुसारिराजेन जैना धर्मद्विषो हताः । योगींद्रेणेव योगघ्ना विघ्नास्तत्त्वावलंबिना ॥९५॥ हतेषु तेषु दुष्टेषु परितस्तार कोविदः । श्रौतवर्त्म तमिस्रेषु नष्टेष्विव रविर्महः ॥९६॥ कुमारिलमृगेंद्रेण हतेषु जिनहस्तिषु । निष्प्रत्यूहमवर्धंत श्रुतिशाखाः समंततः ॥९७॥

प्रागित्थं ज्वलनभुवा प्रवर्तितेऽस्मि-
न्कर्माध्वन्यखिलविदा कुमारिलेन ।
उद्धर्तुं भुवनमिदं भवाब्धिमग्नं
कारुण्यांबुनिधिरियेष चंद्रचूडः ॥९८॥

इति श्रीमाधवीये तदुपोद्घातकथापरः ।
संक्षेपशंकरजये सर्गोऽयं प्रथमोऽभवत् ॥१॥[9]

Cap. I. Coelestes, quum inter homines verum deorum cultum in dies evanescere, dogmata vero heretica, et maxime Bauddharum placita, gliscere vidissent, a Ṣiva auxilium petunt. Isque, se in terra Ṣankarae forma manifestatum iri pollicitus, Skandam ad Sudhanvanem regem mittit. Quem deus, Kumárilae speciem gerens, duobus miraculis ad delendos Bauddhas impellit. 2. Incipit: ततो महेशः किल *Keraleshu* ṣrímad-*Vṛishádrau* करुणासमुद्रः । *Púrṇánadí*-puṇyataṭe स्वयंभूलिंगात्मनानंगधगाविरासीत् ॥१॥[10] तच्चोदितः कश्चन *Rájaṣekharaḥ* स्वप्ने मुहुर्दृष्टतदीयवैभवः । प्रासादमेकं परिकल्प्य सुप्रभं प्रावर्तयत्तस्य

---

[1] मुदोपास्तियोग° B.

[2] Si vocem *tarka* excipias, a montibus alienam, distichon optimi aevi poeta dignum est.

[3] इति निश्चित्य A. [4] आनीयात्र A. E. I. H. 441.

[5] i. e. et a Bráhmanis et a Bauddhis quaerebat.

[6] 'Omnibus dubiis compositis, quum alud, atque imposuerat, conspexisset.'

[7] Sic E. I. H. 734. in margine. °बौद्धानावृद्धबालकान् A. °बौद्धानां वृद्धबालकं B. C. E. I. H. 1960. 441. वृद्धं बालकं चाभिव्याप्य Schol. [8] i. e. Parasuráma.

[9] Et hoc prooemium, et eos locos, qui infra excerpti sunt, codicibus collatis emendavi. [10] Schol. *jyotirlingátmaná*.

समर्हणं विभोः ॥२॥ तस्येश्वरस्य प्रणतार्तिहर्तुः प्रसादतः प्राप्तनिरीतिभावः। कश्चित्तदभ्यासगतोऽग्रहारः *Kálaṭy*-abhikhyo ऽस्ति महान्मनोज्ञः ॥३॥ कश्चिद्विपश्चिदिह निश्चलधीर्विरेजे *Vidyádhirája* इति विश्रुतनामधेयः। रुद्रो वृषाद्रिनिलयोऽवतरीतुकामो यत्पुत्रमात्मपितरं समरोचयत्सः ॥४॥ पुत्रोऽभवत्तस्य पुरात्तपुण्यैः सुब्रह्मतेजाः *Ṣivagurv*-abhikhyaḥ। ज्ञाने शिवो यो वचने गुरुश्चान्वर्थनामाकृत लब्धवर्णः ॥५॥ Ṣankara Ṣivagurus filius gignitur. 3. Eo nato, etiam alii dei mortalem formam induunt. Atque Vishṇu *Padmapáda*, Vimalae filius; Agni *Hastámalaka*, Prabhákarae filius; Váyu *Toṭaka; Udanka*, Ṣiládae filius[1]; Brahman *Sureṣvara*[2]; Váchaspati *Ánandagiri;* Aruṇa *Sanandana;* Varuṇa *Chitsukha* factus est. Eodem tempore Sarasvatí dea, Durvásasis jussu in terram descendere coacta, Vishṇumitrae sacerdotis filia nata est (Ṣoṇatíre), et adulta Viṣvarúpae (Maṇḍanae), Himamitrae filio, nupsit. 4. Incipit: अथ शिवो मनुजो निजमायया द्विजगृहे द्विजमोदमुपावहन्। प्रथमहायन एव समग्रहीत्सकलवर्णमसौ निजभाषिकां ॥१॥ द्विसम एव शिशुर्लिखिताक्षरं गदितुमक्षमताक्षरवित्सुधीः। अथ स काव्यपुराणमुपाशृणोत्स्वयमवैत्किमपि श्रवणं विना ॥२॥ Hoc in capite, quo res a Ṣankara puero gestae verbis nimis tumidis celebrantur, haec narratio sola lectu digna est: स हि (Ṣankara) जातु गुरोः कुले वसन्सवयोभिः सह भैक्षलिप्सया। भगवान्भवनं द्विजन्मनो धनहीनस्य विवेश कस्यचित् ॥२१॥ तमवोचत तत्र सादरं वटुवर्यं गृहिणः कुटुंबिनी। कृतिनो हि भवादृशेषु ये वरिवस्यां प्रतिपादयंति ते ॥२२॥ विधिना खलु वंचिता वयं वितरीतुं वटवे न शक्नुमः। अपि भैक्ष्यमकिंचनत्वतो, धिगिदं जन्म निरर्थतां गतं ॥२३॥ इति दीनमुदीरयंत्यसौ प्रददावामलकं व्रतींदवे। करुणं वचनं निशम्य सोऽप्यभवज्ज्ञाननिधिर्दयार्द्रधीः ॥२४॥ स मुनिर्मुरभित्कुटुंबिनीं पदचित्रैर्नवनीतकोमलैः। मधुरैरुपतस्थिवान्स्तवैर्द्विजदारिद्र्यदशानिवृत्तये ॥२५॥ अथ कैटभजित्कुटुंबिनी तडिदुद्दामनिजांगकांतिभिः। सकलाश्च दिशः प्रकाशयंत्यचिरादाविरभूत्तदग्रतः ॥२६॥ अभिवंद्य सुरेंद्रवंदितं पदयुग्मं पुरतः कृतांजलिं। ललितस्तुतिभिः प्रहर्षिता तमुवाच स्मितपूर्वकं वचः ॥२७॥ विदितं तव वत्स हृद्गतं कृतमेभिर्न पुराभवे शुभं। अधुना मदपांगपात्रतां कथमेते महितामवाप्नुयुः ॥२८॥ इति तद्वचनं स शुश्रुवान्निजगादांब मयीदमर्पितं। फलमद्य ददस्व तत्फलं दयनीयो यदि तेऽहमिंदिरे ॥२९॥ अमुना वचनेन तोषिता कमला तद्भवनं समंततः। कनकामलकैरपूरयज्जनताया हृदयं च विस्मयैः ॥३०॥ 5 (inc. fol. 132ᵃ). Ṣankaram Rájaṣekhara, Keralae rex, invisit, et comoediis tribus recitatis conciliat (1–30)[3]. Ordinibus mediis omissis, Ṣankara puer, mendici errabundi (saṃnyásin) vita adoptata, Govindanátham magistrum adit, qui in eremo ad Indubhavám sito degebat[4]. 6. In Káṣí urbe commoratus, Ṣankara Sanandanam, e Chola regione oriundum (यत्रापगा वहति तत्र कवेरकन्या i. e. Káverí), in discipulorum numerum recipit, eique postea Padmapáda nomen tribuit (6, 71). A Ṣiva ipso edoctus, commentarium ad Brahmasútra componit[5]. Hic liber et nonnulli alii duodecimo aetatis anno in Badarívana scripti sunt: करतलकलिताद्वयात्मतत्त्वं क्षपितदुरंतचिरंतनप्रमोहं। उपचितमुदितोदितैर्गुणौघैरुपनिषदामयमुज्जहार[6] भाष्यं ॥६१॥ ततो महाभारतसारभूताः स व्याकरोद्भागवतीश्च गीताः। सनत्सुजातीयमसत्सुदूरं ततो नृसिंहस्य च तापनीयं ॥६२॥ 7. Vyása quum Ṣankaram convenisset, aphorismorum suorum interpretationem commendat (1–60). Exinde Ṣankara Prayágam ad refutanda Kumárilae placita proficiscitur: भाष्यस्य वार्त्तिकमथैष कुमारिलेन भट्टेन कारयितुमादरवान्मुनींद्रः। वंध्यायमानदरविंध्यमहीधरेण वाचंयमेन चरितां हरितं (i. e. australis regio, Agastyadiṣ) प्रतस्थे ॥६१॥ ततः स वेदांतरहस्यवेत्ता भेत्तामतांतरसंमतानां। प्रयागमागात्प्रथमं जिगीषुः कुमारिलं साधितकर्मजालं ॥६२॥ Ṣankarae cum Kumárila colloquium. 8. Ṣankara ad confutandum Maṇḍanamiṣram[7] proficiscitur: अथ प्रतस्थे भगवान्प्रयागात्तन्मंडनं पंडितमाशु जेतुं। गच्छन्खसृत्या पुरमालुलोके माहिष्मतीं मंडनमंडितां सः ॥१॥ तस्मिन् (scil. in luco) स विश्रम्य कृताह्निकः सन्खस्वस्तिकारोहणशालिनीने। गच्छन्नसौ मंडनपंडितौको दासीस्तदीयाः स ददर्श मार्गे ॥४॥ कुत्रालयो मंडनपंडितस्येत्येनाः स पप्रच्छ जलाय गंत्रीः। ताश्चापि दृष्ट्वाद्भुतशंकरं तं संतोषवत्यो ददुरुत्तरं स्म ॥५॥

---

[1] उदभावि शिलादसूनुना मदवद्वादिकदंबनिग्रहैः। समुदंचितकीर्तिशालिनं यमुदंकं ब्रुवते महीतले ॥५॥ Schol. Ṣiládasya súnuná putreṇa *Ánandi*saṃjnakenodabhávi.

[2] *Maṇḍana*-aparasaṃjnaḥ. Conf. dist. 8. चार्वाकदर्शनविधानसरोषधातृशापेन गोष्पतिरभूद्भुवि मंडनाख्यः। नंदीश्वरः करुणयेश्वरचोदितः सन्नानंदगिर्यभिधया व्यजनीति केचित्।

[3] Plurima hujus partis disticha in similem sonum desinunt. Cf. तेन पृष्टकुशलः क्षितिपालः स्वेन सृष्टमथ (i. e. a se factas tres fabulas) शात्रवकालः। हाटकायुतसमर्पणपूर्वं नाटकत्रयमवोचदपूर्वं ॥२५॥ तद्रसार्द्रगुणरीतिविशिष्टं भद्रसंधिरुचिरं सुकवीष्टं। संग्रहेण स निशम्य सुवाचं तं गृहाण वरमित्यमुमूचे ॥२६॥

[4] व्यासः पराशरसुतः किल सत्यवत्यां तस्यात्मजः शुकमुनिः प्रथितानुभावः। तच्छिष्यतामुपगतः किल गौडपादो गोविंदनाथमुनिरस्य च शिष्यभूतः ॥५॥

[5] भास्कराभिनवगुप्तपुरोगान्नीलकंठगुरुमंडनमुख्यान्। पंडितानथ विजित्य जगत्यां स्थापयाद्वयमते परतत्त्वं ॥५०॥ Schol. भास्करो भेदाभेदवादी। अभिनवगुप्तः शाक्तः। नीलकंठो भेदवादी शैवः। गुरुः प्रभाकरः। मंडनमिश्रो भाट्टमतानुयायी।

[6] Schol. ईशकेनकठप्रश्नमुंडकमांडूक्यतैत्तिरीयैतरेयछांदोग्यबृहदारण्यकाख्यानां वेदांतानां।

[7] उंवेक इत्यभिहितस्य तस्य लोकैरुंवेति बांधवैरभिधीयमाना। हेतोः कुतश्चिदिह वाक् परुषाभिशप्ता दुर्वाससाजनि वधूर्द्वयभारतीति ॥ 7, 116. Populare igitur Maṇḍanae nomen *Umveka* fuit.

‘स्वतः प्रमाणं, परतः प्रमाणं?’ कीरांगना यत्र गिरं गिरंति । द्वारस्थ-नीडांतरसंनिरुद्धा जानीहि तन्मंडनपंडितौकः ॥६॥ ‘फलप्रदं कर्म, फलप्रदोऽज्ञः?’ कीरांगना यत्र गिरं गिरंति । द्वा° ॥७॥ ‘जगद्ध्रुवं स्याज्जगदध्रुवं स्यात्?’ कीरांगना यत्र गिरं गिरंति । द्वा°[1] ॥८॥ Maṇḍanae de dualitate disputatio. 9 (fol. 159ᵃ). Maṇḍana se a Ṣankara victum esse profitetur. Ṣankara autem ipse, ne a Sarasvatí, illius uxore, superaretur, Amarakae regis mortui corpus intrat. Quae occasione oblata traditur fabula de cadaveris a vivis intrandi facultate, eam subjunxi: मत्स्येंद्रनामा[2] हि पुरा महात्मा गोरक्षमादिश्य निजांगगुप्त्यै । नृपस्य कस्यापि तनुं परासोः प्रविश्य तत्पत्तनमाससाद ॥८०॥ भद्रासनाध्यासिनि योगिवर्ये भद्राण्यनिद्राण्यभवन्प्रजानां । ववर्ष कालेषु वलाहकोऽपि सस्यानि चाशास्यफलान्यभूवन् ॥८१॥ विज्ञाय विज्ञाः सचिवा नृपस्य काये प्रविष्टं कमपीह दिव्यं । समादिशन्राजसरोरुहाक्षीः सर्वात्मना तस्य वशीक्रियायै ॥८२॥ संगीतलास्याभिनयादिमेषु संसक्तचेता ललितेषु तासां । स एष विस्मृत्य मुनिः समाधिं सर्वात्मना प्राकृतवद्बभूव ॥८३॥ गोरक्ष एषोऽथ गुरोः प्रवृत्तिं विज्ञाय रक्षन्बहुधास्य देहं । निशांतकांतानटनोपदेष्टा नितांतमस्याभवदंतरंगः ॥८४॥ तत्रैकदा तत्त्वनिबोधनेन निवृत्तरागं निजदेशिकं सः । योगानुपूर्वीमुपदिश्य निन्ये यथापुरं प्राक्तनमेव देहं ॥८५॥ 10. Kámaṣástram edoctus[3], Ṣankara in Maṇḍanae eremum revertitur, Sarasvatí divinam formam recuperat, Maṇḍana veram religionem amplectitur, et *Sureṣvarae* cognomine a Ṣankara inter discipulos recipitur[4]. In Mahárashṭram profectus, Ṣankara in Ṣríṣaila monte Mallikárjunam adorat. 11. Ṣankara insidias ab Ugrabhairava kápálika sibi structas miraculo effugit: तत्रैकदाच्छादितनैजदोषः पौलस्त्यवत्कल्पितसाधुवेषः । निर्मानमायं स्थितकार्यशेषः कापालिकः कश्चिदनल्पदोषः ॥१॥ असावपश्यन्मदनाद्यवश्यं वश्येंद्रियाग्र्यैर्मुनिभिर्विमृग्यं । आदिश्य भाष्यं सपदि प्रशस्यमासीनमाश्रित्य मुनिं रहस्यं ॥२॥ दृष्ट्वैव हृष्टः स चिरादभीष्टं निर्धार्य संसिद्धमिव स्वमिष्टं । महद्विशिष्टं निजलाभतुष्टं विस्पष्टमचष्ट च कृत्यशिष्टं ॥३॥ गुणांस्तवाकर्ण्य मुनेऽनवद्यान्सार्वज्ञसौशील्यदयालुताद्यान् । द्रष्टुं समुत्कंठितचित्तवृत्तिर्भवंतमागां विदितप्रवृत्तिः ॥४॥ त्वमेक एवात्र निरस्तमोहः परांकृतद्वैतवचःसमूहः । आभासि दूरीकृतदेहमानः शुद्धाद्वये योजितसर्वमानः ॥५॥ परोपकृत्यै प्रगृहीतमूर्त्तिरमर्त्यलोकेष्वपि गीतकीर्त्तिः । कटाक्षलेशार्दितसज्जनार्त्तिः सदुक्तिसंपादितविश्वमूर्त्तिः ॥६॥ गुणाकरत्वाद्भुवनैकमान्यः समस्तविस्वादभिमानशून्यः । विजित्वरत्वाद्गलहस्तितान्यः स्वात्मप्रदत्वाच्च महावदान्यः ॥७॥ अशेषकल्याणगुणालयेषु परावरज्ञेषु भवादृशेषु । कार्यार्थिनः क्वाप्यनवाप्य कामं न यांति दुष्प्रापमपि प्रकामं ॥८॥ तस्मान्महत्कार्यमहं प्रपद्य निर्वर्तितं सर्वविदा त्वयाद्य । कापालिनं प्रीणयितुं यतिष्ये कृतार्थमात्मानमतः करिष्ये ॥९॥ अनेन देहेन सहैव गंतुं कैलाशमीशेन समं च रंतुं । अतोषयं तीव्रतपोभिरुग्रं सुदुष्करैरब्दशतं समग्रं ॥१०॥ तुष्टोऽब्रवीन्मां गिरिशोऽमुमर्थमभीप्सितं प्राप्स्यसि मत्प्रियार्थं । जुहोषि चेत्सर्वविदः शिरो वा हुताशने भूमिपतेः शिरो वा ॥११॥ एतावदुक्त्वांतरधान्महेशस्तदादि तत्संग्रहणे धृताशः । चराम्यथापि क्षितिपो न लब्धो न सर्ववित्तत्र मयोपलब्धः ॥१२॥ दिष्ट्याद्य लोकस्य हिते चरंतं सर्वज्ञमद्राक्षमहं भवंतं । इतः परं सेत्स्यति मेऽनुबंधः संदर्शनांतो हि जनस्य बंधः ॥१३॥ मूर्धाभिषिक्तस्य शिरःकपालं मुनीशितुर्वा मम सिद्धिहेतुः । आद्यं पुनर्मे मनसाप्यलभ्यं ततः परं तत्रभवान्प्रमाणं ॥१४॥ शिरःप्रदानेऽद्भुतकीर्तिलाभस्तवापि लोके मम सिद्धिलाभः । आलोच्य देहस्य च नश्वरत्वं यद्रोचते सत्तम तत्कुरु त्वं ॥१५॥ तद्याचितुं न क्षमते मनो मे को वेष्टदायी स्वशरीरमुज्झन् । भवान्विरक्तो न शरीरमानी परोपकाराय धृतात्मदेहः ॥१६॥ जनाः परक्लेशकथानभिज्ञा नक्तंदिवं स्वार्थकृतात्मचित्ताः । रिपुं निहंतुं कुलिशाय वज्री दाधीचमादत्किल वांछितास्थि ॥१७॥ दधीचिमुख्याः क्षणिकं शरीरं त्यक्त्वा, परार्थे स्म यशःशरीरं । प्राप्य स्थिरं सर्वगतं, जगंति गुणैरनर्घ्यैः खलु रंजयंति ॥१८॥ वपुर्धरंते परतुष्टिहेतोः केचित्प्रशांता दयया परीताः । अस्मादृशाः केचन संति लोके स्वार्थैकनिष्ठा दयया विहीनाः ॥१९॥ परोपकारं न विनास्ति किंचित्प्रयोजनं ते विधुतैषणस्य । अस्मादृशाः कामवशास्तु युक्तायुक्ते विजानंति न हंत योगिन् ॥२०॥ *Jímútaváho* निजजीवदायी दधीचिरप्यस्थि मुदा ददानः । आचंद्रताराकमपायशून्यं प्राप्तौ यशः, कर्णपथं गतौ हि ॥२१॥ यद्यप्यदेयं ननु देहवद्भिर्मयार्थितं गर्हितमेव सद्भिः । तथापि सर्वत्र विरागवद्भिः किमस्त्यदेयं परमार्थविद्भिः ॥२२॥ अखंडमूर्धन्यकपालमाहुः संसिद्धिदं साधकपुंगवेभ्यः । विना भवंतं बहवो न संति तद्वत्पुमांसो भगवन्पृथिव्यां ॥२३॥ प्रयच्छ शीर्षं भगवन्नमः स्तादितीरयित्वा पतितं पुरस्तात् । तमब्रवीद्वीक्ष्य सुधीरधस्तात्कृपालुरावृत्तमनाः[5] समस्तात् ॥२४॥ नैवाभ्यसूयामि वचस्त्वदीयं प्रीत्या प्रयच्छामि शिरोऽस्मदीयं । को वार्थिसात्प्राज्ञतमो नृकायं जानन्न कुर्यादिह बह्वपायं ॥२५॥ पतत्यवश्यं हि विकृष्यमाणं कालेन यत्नादपि रक्ष्यमाणं । वर्ष्मामुना सिध्यति चेत्परार्थः स एव मर्त्यस्य परः पुमर्थः ॥२६॥ वर्ते विविक्तेऽधिसमाधिसिद्धिविस्मियः समायाहि करोमि ते मतं । नाहं प्रकाशं वितरीतुमुत्सहे शिरःकपालं विजनं समाश्रय ॥२७॥ शिष्या विदंति यदि चिंतितकार्यमेतद्योगिन्मदेकशरणा विहतिं विदध्युः । को वा सहेत वपुरेतदपोहितुं स्वं, को वा क्षमेत निजनाथशरीरमोक्षं ॥२८॥ तौ संविदं वितनुतामिति संप्रहृष्टौ योगी जगाम मुदितो निलयं मनस्वी । श्रीशंकरोऽपि निजधामनि जोषमास्ते प्रोचे न किंचिदपि भावमसौ मनोगं ॥२९॥ शूली त्रिपुंड्री पुरतो व्यलोकि कंकालमालाकृतगात्रभूषः । संरक्तनेत्रो मदघूर्णिताक्षो योगी ययौ *Deṣika*-vásabhúmim ॥३०॥ शिष्येषु शिष्टेषु विदूरगेषु, स्नानादिकार्याय विविक्तभाजि । Ṣrí-*deṣikendre* तु सनंदनाख्ये, भीत्या स्वदेहं व्यवधाय गूढे ॥३१॥ तं भैरवाकारमुदीक्ष्य *deṣikas*

[1] Haec disticha Anantánandagirikṛitis imitatione facta sunt.

[2] De Matsyendra et Goraksha v. supra pp. 233, 236.

[3] Ṣankara ipse ejusmodi librum composuisse traditur: वात्स्यायनप्रोदितसूत्रजातं तदीयभाष्यं च निरीक्ष्य सम्यक् । स्वयं व्यधत्ताभिनवार्थगर्भं निबंधमेकं नृपवेषधारी ॥१८॥

[4] Sureṣvara = Brahman = Sarasvatís conjux.

[5] Kṛipálu B. कृतकृत् reliqui.

त्यक्तुं शरीरं व्यधित स्वयं मनः । आत्मानमात्मन्युदयुंक्त योजयन्समाहितात्मा करणानि संहरन् ॥३२॥ तं भैरवोऽलोकत लोकपूज्यं स्वसौख्यतुच्छीकृतदेवराज्यं । योगीशमासादितनिर्विकल्पं सनत्सुजातप्रभृतेरनल्पं ॥३३॥ जत्रुप्रदेशे चिबुकं निधाय व्यात्तास्यमुत्तानकरौ निधाय । जानूपरि प्रेक्षितनासिकांतं विलोचने सामि निमील्य कांतं ॥३४॥ आसीनमुच्चीकृतपूर्वगात्रं[1] सिद्धासने शेषितबोधमात्रं । चिन्मात्रविन्यस्तहृषीकवर्गं समाधिविस्मारितविश्वसर्गं ॥३५॥ विलोक्य तं हंतुमपास्तशंकः स्वबुद्धिपूर्वार्जिततीव्रपंकः । प्रापोद्यतासिः सविधं स यावद्विज्ञातवान्पद्मपदोऽपि तावत् ॥३६॥ त्रिशूलमुद्यम्य निहंतुकामं गुरुं यतात्मा समुदैक्षतांतः । स्थितश्रुकोप ज्वलिताग्निकल्पः स पद्मपादः स्वगुरोर्हितैषी ॥३७॥ स्मरन्नथैष स्मरदार्तिहारी प्रह्लादवश्यं परमं महस्तत् । स मंत्रसिद्धो नृहरेर्नृसिंहः श्रुत्वा ददर्शोग्रदुरीहचेष्टां ॥३८॥ स तत्क्षणक्षुभ्रनिजस्वभावः प्रवृद्धरूढिस्मृतमर्त्यभावः । आविष्कृतात्युग्रनृसिंहभावः समुत्पपातातुलितप्रभावः ॥३९॥ सटाच्छटास्फोटितमेघसंघस्तीव्रारवत्रासितभूतसंघः । संवेगसंमूर्छितलोकसंघः किमेतदित्याकुलदेवसंघः ॥४०॥ क्षुभ्यत्समुद्रं समुदूढरौद्रं रटन्निशाटं स्फुटदद्रिकूटं । ज्वलद्दिशांतं प्रचलद्धरांतं प्रभ्रश्यदक्षं दलदंतरिक्षं ॥४१॥ जवादभिद्रुत्य शितस्वरूग्रैर्दैत्येश्वरस्येव पुरा नखाग्रैः । क्षिपन्त्रिशूलस्य स तस्य वक्षो ददार विक्षिप्तसुरारिपक्षः ॥४२॥ तत्रादूगत्युग्रनखायुधाग्र्यो दंष्ट्रांतरप्रोतदुरीहदेहः । नृत्यं प्रचक्रे[2] नृहरिर्विदीर्णाद्युपट्टनाट्टालिकाट्टहासं ॥४३॥ आकर्णयंस्तं निनदं वहिर्गता उपागमन्नाकुलचित्तवृत्तयः । व्यलोकयन्भैरवमग्रतो मृतं ततो विमुक्तं च गुरुं सुखोषितं ॥४४॥ 12 (fol. 174ª). Deinde Gokarṇam, Harisankaram, Múkámbikáyáḥ sadanam proficiscitur[3]. In Sríbali vico Prabhákarae filium surdum et mutum sanat. In Sringagiri Sarasvatís templum condit: या *Śáradámbety* अभिधां वहंती कृतां प्रतिज्ञां प्रतिपालयंती । अद्यापि *Sringeripure* वसंती प्रद्योततेऽभीष्टवरान्दिशंती ॥६९॥ Toṭaka[4] (sive Troṭaka) a magistro quatuordecim scientias docetur. 13. Suresvaram, quem ad scribendum Bádáráyaṇasútravárttikam ipse adhortatus erat, Sankara, monentibus reliquis discipulis, illum disciplinae in ritibus observandis summum bonum quaerentis asseclam esse, ab opere absolvendo arcet, et ad explicandos alios libros suos impellit: इत्युक्तोपरते सुरेश्वरगुरौ, तेनैव 'शारीरके नो संभाव्यहहात्र वार्त्तिकं' इति प्रौढः शुगग्निं शनैः । धीराग्र्यः शमयन्विवेकपयसा देवेश्वरेण त्रयीभाष्ये[5] कारयितुं स वार्त्तिकयुगं बद्धादरोऽभून्मुनिः ॥६३॥ भावानुकारिमृदुवाक्यनिवेशितार्थं स्वीयैः पदैः सह निराकृतपूर्वपक्षं । सिद्धांतयुक्तिविनिवेशिततत्स्वरूपं दृष्ट्वाभिनंद्य परितोषवशादवोचत् ॥६४॥ सत्यं यदात्थ विनयिन्मम याजुषी या शाखा तदंतगतभाष्यनिबंध इष्टः । तद्वार्त्तिकं मम कृते भवता प्रणेयं सच्चेष्टितं परहितैकफलं प्रसिद्धं ॥६५॥ तद्वत्त्वदीया खलु काण्वशाखा ममापि तत्रास्ति तदंतभाष्यं । तद्वार्त्तिकं चापि विधेयमिष्टं परोपकाराय सतां प्रवृत्तिः ॥६६॥ तत्रोभयत्र कुरु वार्त्तिकमार्तिहारि कीर्तिं च याहि जितकार्त्तिकचंद्रिकाभां । मा शंकि पूर्वमिव दुःशठवाक्यरोधो मद्वाक्यमेव शरणं व्रज मा विचारीः ॥६७॥ इत्थं स उक्तो भगवत्पदेन श्रीविश्वरूपो विदुषां वरिष्ठः । चकार भाष्यद्वयवार्त्तिके द्वे आज्ञा गुरूणां ह्यविचारणीया ॥६८॥ आज्ञा गुरोरनुचरैर्न हि लंघनीयेत्युक्त्वा तयोर्निगमशेखरयोरुदारं । निर्माय वार्त्तिकयुगं[6] निजदेशिकाय निःसीमनिस्तुलनधीरुपदीचकार ॥६९॥ *Sanandano* náma guror anujnayá bháshyasya ṭíkáṃ vyadhiteritaḥ parám । yatpúrvabhágaḥ kila *Panchapádiká*, tachchheshagá *Vrittir* iti prathíyasí ॥ 70 ॥ Vyásarshisútranichayasya vivechanáya *ṭíkábhidhaṃ vijayaḍiṇḍimam* átmakírteḥ । nirmáya *Padmacharaṇo*[7] niravadyayuktidṛibdham prabandham akarod gurudakshiṇáṃ saḥ ॥ 71 ॥ आलोचयन्नथ तदानु गतिं ग्रहाणामूचे सुरेश्वरसमाह्वमुपह्वरे सः । पंचैव वत्स चरणाः प्रथिता इह स्युस्तत्रापि सूत्रयुगलद्वयमेव भूम्ना ॥७२॥ प्रारब्धकर्मपरिपाकवशात्पुनस्त्वं वाचस्पतित्वमधिगम्य वसुंधरायां । भव्यां विधास्यसितमां मम भाष्यटीकामाभूतसंलयमधिक्षिति सा च जीयात् ॥७३॥ इत्येवमुक्त्वाथ यतीश्वरोऽसावानंदगिर्यादिमुनीन्स हूत्वा । कुरुध्वमद्वैतपरान्निबंधानित्यन्वशान्निर्ममसार्वभौमः ॥७४॥ ते सर्वेऽप्यनुमतिमाप्य देशिकेंद्रोरानंदाचलमुखरा महानुभावाः । आतेनुर्जगति यथास्वमात्मतत्त्वांभोजार्कान्विशदतरान्निबंधान् ॥७५॥ 14. Padmapáda ad peragrandos locos sacros (tírthayátrá), Sankara ad visendam matrem moribundam proficiscitur (1–54). Padmapáda in regione australi haec sacraria adit: Kálahastísvaram (57), ubi Suvarṇamukharí fluvius; in Kánchíkshetra Ekámrádhísvaram Visvanátham, et Kallálesam[8] Lakshmíkántam adorat. Inde Puṇḍaríkapuram proficiscitur: पुंडरीकपुरमाययौ मुनिर्यत्र नृत्यति सदाशिवोऽनिशं । वीक्षते प्रकृतिरादिमा हृदा पार्वतीपरिणतिः शुचिस्मिता ॥६२॥ Ibi Sivagangátírtham. Idem quum, ad Rámasetum profecturus, apud

[1] °मुञ्चीकृत° vel °मुज्जीकृत° MSS. Schol. uchchaiḥ kṛitam.

[2] नृत्यं च चक्रे E. I. H. 1960. नृत्यं तदानीं reliqui.

[3] अंके निधाय व्यसुमात्मजातं महाकुलौ हंत मुहुः प्ररुद्य । तदेकपुत्रौ द्विजदंपती स दृष्ट्वा दयाधीनतया शुशोच ॥२१॥ अपारमंचत्यथ शोकमस्मिन्नभूयतोच्चैरशरीरवाचा । 'जायेत संरक्षितुमक्षमस्य जनस्य दुःखाय परं दयेति' ॥२२॥ आकर्ण्य वाणीमशरीरिणीं तामसाविति व्याहरति स्म विज्ञः । 'जगत्त्रयीरक्षणदक्षिणस्य सत्यं तवैकस्य तु शोभते सा' ॥२३॥ इतीरयत्येव यतौ द्विजातेः । सुतः सुखं सुप्त इवोदतिष्ठत् । समीपगैः सर्वजनीनमस्य चारित्र्यमालोक्य विसिस्मिये च ॥२४॥ रम्योपशल्यं कृतमालसालरसालहिंतालतमालसालैः । सिद्धिस्थलं साधकसंसदां तन्मूकांबिकायां स मुनिर्जगाहे ॥२५॥

[4] Olim *Giri* appellatus?

[5] Commentarios ad Upanishadas significari puto.

[6] Schol. वेदांतयोस्तैत्तिरीयबृहदारण्यसंज्ञयोस्तयोर्भाष्ययोरुदारं वार्त्तिकद्वयं निर्माय.

[7] i. e. ex auctoris nostri sententia *Sanandana*.

[8] कल्लाकेशं A.

cognatos devertisset, ab avunculo, monotheismi adversario, libri ejus concremantur. *Panchapádí* postea a Ṣankara ex memoria restituitur[1]. Desinit caput in versibus: कविताकुशलोऽथ केरलक्ष्माकमनः कश्चन *Rájaṣekharákhyaḥ* । मुनिवर्यममुं मुदा वितेने निजकोटीरनिघृष्टपत्रखाग्रः ॥१७१॥ प्रथते किमु *náṭakatrayí* (cf. cap. 2.) सेत्यमुना संयमिना ततो नियुक्तः । अयमुत्तरमाददे प्रमादादनले साहुतितामुपागतेति ॥१७२॥ मुखतः पठितां मुनींदुना तां विलिखन्नेष विसिस्मियेऽथ भूपः । वद किं करवाणि किंकरोऽहं वरदेति प्रणमन्व्यजिज्ञपच्च ॥१७३॥ नृप *Kálaṭi*-námakágrahára-dvijakarmánadhikáriṇo 'dya ṣaptáḥ । भवतापि तथैव ते विधेया वत पापा इति देशिकोऽशिषन्नं ॥१७४॥ पद्मांघ्रौ प्रतिपद्य नष्टविवृतिं तुष्टे पुनः केरलक्ष्मापालो यतिसार्वभौमसविधं प्राप्य प्रणम्यांजसा । लब्ध्वा तस्य मुखात्स्वनाटकवराख्यानंदपाथोनिधौ मज्जंस्तत्पादपद्मयुग्ममनिशं ध्यायन्प्रतस्थे पुरीं ॥१७५॥

15. Ṣankara, Sudhanvane rege comite et adjutore Indiae regiones peragrat: अथ शिष्यवरैर्युतः सहस्रैरनुयातः स सुधन्वना च राज्ञा । ककुभो विजिगीषुरेष सर्वाः प्रथमं *Setum* उदारधीः प्रतस्थे ॥१॥ अभवत्किल तस्य तत्र *Ṣáktair* Girijárchákapaṭán madhuprasaktaiḥ । निकटस्थवितीर्णभूरिमोदस्फुटरिंखत्पटुयुक्तिमान्विवादः ॥२॥ स हि युक्तिभिरैर्विधाय शाक्तान्प्रतिवाग्व्याहरणेऽपि तानशक्तान् । द्विजजातिवहिष्कृताननार्यानकरोल्लोकहिताय कर्मसेतुं ॥३॥[2] abhipújya sa tatra *Rámanátham*, saha *Páṇḍyaiḥ* svavaṣe vidháya *Cholán* । Dravidáns cha, tato jagáma Kánchím nagarím Hastagirer nitambakánchím ॥4॥ सुरधाम स तत्र कारयित्वा परविद्याचरणानुसारि चित्रं । अपवार्य च तांत्रिकानतानीद्भगवत्याः श्रुतिसंमतां सपर्यां ॥५॥ निजपादसरोजसेवनायै विनयेन स्वयमागतानथांध्रान् । अनुगृह्य स Venkaṭáchaleṣam प्रणिपत्याप *Vidarbharájadháním* ॥6॥ अभिगम्य स भक्तिपूर्वमस्यां कृतपूजः क्रथकैशिकेश्वरेण । निजशिष्यनिरस्तदुष्टबुद्धीन्व्यदधाद्भैरवतंत्रसावलंबान् ॥७॥ Deinde in Karṇáta regionem proficiscitur, et ibi sectam Kápálikám[3] ad veram religionem perducit. Exinde in maris occidentalis viciniam proficiscitur: यतिराडथ तेषु तेषु देशेष्विति पाषंडपरान्विमथ्नन् । अपरांतमहार्णवोपकंठं प्रतिपेदे प्रतिवादिदर्पहंता ॥२९॥ Gokarṇae *Nílakanṭham* Ṣivaitam confutat, cujus *Haradatta* discipulus fuisse traditur[4]. तदनंतरमागमांतविद्यां प्रणतेभ्यः प्रतिपादयंतमेनं । हरदत्तसमाह्वयोऽधिगम्य स्वगुरुं संगिरते स्म नीलकंठं ॥३३॥ भगवन्निह शंकराभिधानो यतिरागत्य जिगीषुरार्यपादान् । स्ववशीकृतभट्टमंडनादिः सह शिष्यैर्गिरिशालये समास्ते ॥३४॥ इति तद्वचनं निशम्य सम्यग्ग्रथितानेकनिबंधरत्नहारः । *Ṣivatatparasútra*bháshyakartá प्रहसन्वाचमुवाच शैववर्यः ॥३५॥ यतिनामृषभेण नीलकंठं जितमाकर्ण्य मनीषिधुर्यवर्यं । सहसोदयनादयः कवींद्राः (i. e. *Udayana* et alii viri sapientes) परमं द्वैतमुपाश्चकंपिरे स्म ॥७२॥ विषयेषु वितत्य नैजभाष्याण्यथ सौराष्ट्रमुखेषु तत्र तत्र । बहुधा विबुधैः प्रशस्यमानो भगवान् *Dváravatím* पुरीं विवेश ॥७३॥ भुजयोरतितप्तशंखचक्राकृतिलोहाहतसंभृतव्रणांकाः । शरदंडसहोदरोर्ध्वपुंड्रास्तुलसीपर्णसनाथकर्णदेशाः ॥७४॥ शतशः समवेत्य पांचरात्रास्त्वमृतं पंचभिदाविदां[5] वदंतः । मुनिशिष्यवरैरतिप्रगल्भैर्मृगराजैरिव कुंजराः प्रभग्नाः ॥७५॥ इति वैष्णवशैवशाक्तसौरप्रमुखानात्मवशंवदान्विधाय । अतिवेलवचोझरीनिरस्तप्रतिवाद्य् *Ujjayiním* पुरीमयासीत् ॥७६॥ Ibi Bháskaram[6] refutat (140). Inde in Avanti terram proficiscitur: स कथाभिरवंतिषु प्रसिद्धान्विबुधान् *Báṇa-Mayúra-Daṇḍi*-mukhyán । शिथिलीकृतदुर्मताभिमानान्निजभाष्यश्रवणोत्सुकांश्चकार ॥१४१॥, inde ad Báhlikas, ubi Jainarum placita refutat (155). इति माध्यमिकेषु भग्नदर्पेष्वथ भाष्याणि स नैमिषे वितत्य । दरदान्भरतांश्च शूरसेनान्कुरुपांचालमुखान्बहूनजैषीत् ॥१५६॥ पटुयुक्तिनिकृतसर्वशास्त्रं गुरुभट्टोदयनादिकैरजय्यं[7] । स हि *Khaṇḍanakára*-múḍhadarpam बहुधा व्युह्य वशंवदं चकार ॥१५७॥ तदनंतरमेष Kámarúpán अधिगत्याभिनवोपशब्दगुप्तं[8] । अजयत्किल Ṣáktabháshyakáraṃ स च भग्नो मनसेदमालुलोचे ॥१५८॥ निगमाब्जविकाशिबालभानोर्न समोऽमुष्य विलोक्यते त्रिलोक्यां । न कथंचन मद्वशंवदोऽसौ तदमुं दैवतकृत्यया हरेयं ॥१५९॥ इति गूढमसौ विचिंत्य पश्चात्सह शिष्यैः सहसा स्वशाक्तभाष्यं । परिहृत्य जनापवादभीत्या यतिनः शिष्य इवान्ववर्ततैषः ॥१६०॥ निजशिष्यपदं गतानुदीच्यानिति कृत्वाथ विदेहकौशलाद्यैः । विहितापचितिस्तथांगवंगेष्वयमास्तीर्य यशो जगाम गौडान् ॥१६१॥ abhibhúya *Murárimiṣra*varyaṃ sahasá cha-*Udayanaṃ* vijitya váde । abhibhúya cha *Dharmaguptamiṣram* स्वयशः प्रौढमगाययत्स गौडान् ॥१६२॥

16. Abhinavagupta (J. I. ?) fascinante Ṣankara morbo quodam desperato (bhagandara) afficitur, cui Padmapáda adhibitis precibus mysticis medetur (1–32): अथ यदा जितवान्यतिशेखरोऽभिनवगुप्तमनुत्तमांत्रिकं । स तु तदापजितो यतिगोचरं हतमनाः कृतवानपगोरणं ॥१॥ स ततोऽभिचचार मूढबुद्धिर्यतिशार्दूलममुं प्ररूढरोषः । अचिकित्स्यतमो भिषग्भिरस्मादजनिष्टास्य भगंदराख्यरोगः ॥२॥ अचिकित्स्यभगंदराख्यरोगप्रसरच्छोणितपंकिलस्य शाठ्यात् । अजुगुप्स्यविशोधनादिरूपां परिचर्या-

[1] ऐतिह्यमाश्रित्य वदंति चैव तदेव मूलं मम भाषणेऽपि ॥११६॥ Nescio an ex hac fabula, librum a recentiore quodem auctore retractatum esse, colligendum sit.

[2] एवं सेतुं प्रति प्रस्थितेन तत्र प्रस्थाने *Tulábhavání*-nikaṭasthánám parájayaṃ saṃkshepeṇa pradarsya etc. Schol.

[3] Pontifex eorum *Krakacha* fuisse dicitur.

[4] Ibidem hymnum Bhujanga metro usus scripsisse dicitur.

[5] Schol. अमृतं मोक्षं पंचभिदाविदां जीवेश्वरभेदो, जीवानां परस्परभेदो, जीवानामचित्तां भेद, ईश्वरस्याचित्तां भेदोऽचित्तां च परस्परभेद etc.

[6] Verba ejus: प्रशमिंस्त्वदुदीरितं न युक्तं 'प्रकृतिर्जीवपरात्मभेदिकेति'। न भिनत्ति जीवगेशगा वोभयभावस्य तदुत्तरोद्भवत्वात् ॥९४॥

[7] Guru = Prabhákara.

[8] i. e. Abhinavagupta.

Desunt in hoc codice disticha 97–107. capitis ultimi.

Auctor Anantánandagiris librum in usum suum ita convertit, ut permulta omiserit sive transposuerit, alia brevissime tractaverit, alia poetica licentia exornaverit et amplificaverit. A veritate hoc opus longius recedit, quam Ananta, quamquam nonnulla ex alio quodam fonte hausta esse videntur. Capita tria quatuorve ad philosophiam Vedánticam accuratius cognoscendam satis utilia erunt. Quae miracula Ṣankarae tribuuntur, nescio an Evangelii imitatione conficta sint. Multa certe in Ṣankarae vita sunt, qualis et nostro et Anantae libro traditur, quae suspicionem moveant, a Christo nonnulla in monotheismi Indici propugnatorem, corrupte quidem et ad superstitiones ethnicas accomodate, translata esse. Quae res investigatione accuratiore digna est.

Haec voluminis pars seculo superiore medio satis accurate exarata est. Fol. १०. (2, 84–3, 10.) desideratur. (WILSON 348b.)

627.

Lit. Devan. Charta Ind. Foll. 287. Long. 13½. Lat. 6½. Linn. 12–16.

Sankshepaṣankarajayas, cum *Dhanapatis*, Rámakumárae filii, Bálagopálatírthae discipuli, commentario, *Sankaráchâryavijayaḍiṇḍima* appellato. (B.) Commentarius ab his distichis incipit, quae emendata subjeci: श्रीमद्विष्णु etc. ॥१॥

Numaḥ *ṣrí-Bálagopálatírthán Vyásamukhán* munín ।
Vighnahartṛín *Gaṇeṣádín* paṇḍitánṣ cha vimatsarán ॥2॥
Vyákhyánarahitasyásya vyákhyánam Ḍiṇḍimábhidham ।
Kriyate svíyabodháya, pramádaḥ kshamyatám budhaiḥ ॥3॥

Dhanapatim hanc operam anno 1799 absolvisse, ex his epilogi verbis patet:

पांडवेष्वहितारेशप्रमिते शुभवत्सरे ।
श्रावणे सितपंचम्यां सिंहे सिद्धो गुरावयं ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यबालगोपालतीर्थश्रीपादशिष्यसारस्वतजात्यंतर्गतदत्तवंशावतंसरामकुमारसूनुधनपतिसूरिविरचिते श्रीमच्छंकराचार्यविजयडिंडिमे षोडशः सर्गः ॥ Res faciliores satis accurate expedit, difficiliorum explicationem ab ejus aevi homine frustra quaeras. Passim locos integros ex Anandagiris opere, et simili quadam Ṣankarae vita, necnon e hymnis Ṣankarae tributis excerpsit. Idem auctor *Vidyáratnákaram* (E. I. H. 343. 344), encyclopaediam literarum Sanskriticarum, in *Colebrooki* usum, ex operibus vulgatis sine ulla crisi compilavit.

Codex post annum 1820 exaratus est. (MILL 19.)

628.

Lit. Bengal. Charta Ind. Foll. 96. Long. 16. Lat. 5. Linn. 8.

Sankshepaṣankarajayas. (C.)

Idem liber in codd. E. I. H. 441. 724 (fragm.). 734 (cum Dhanapatis commentario, anno 1802 exarato). 1960 exstat. Quorum in codicum numero noster A. et cod. E. I. H. 441. textum exhibere videntur corruptelis minimis foedatum.

In cod. E.I.H. 1960. tertium *Ṣankaravijaya* inscriptum opus reperitur. Idque capita 32. continens et metro vulgari compositum dialogi forma a *Chidvilása* yatíndra cum *Vijnánakanda* tapodhanendra communicatur. Incipit: अस्तु स्वस्तिकृते वस्तु निस्तुलानंदनिर्भरं । वस्तु वा शांकरं नः स्तादीप्सितार्थसमृद्धये ॥१॥ Uter liber recentior sit, hujus loci non est quaerere; id solum monuisse velim, ab utroque auctore Ṣankaram frequentissime *deṣikendram* nuncupari, quae appellatio neque ab Ánandagiri usurpari, et ritus Tántricos olere videtur[1]. Codex e libris Johannis Taylor provenit, ideoque in Deccan regione (Godátaṭe) exaratus est.

Manuscriptum nostrum post annum 1820 exaratum est. (MILL 6.)

629.

Lit. Bengal. Charta Europ. Foll. 126. Long. 13. Lat. 8. Linn. 12–15.

Vidvanmodataranginí (fluvius sapientium animis delicias afferens) liber a *Rámadeva*, *Chiranjíva* cognomen gerente, *Rághavendrae* filio, Káṣínáthae nepote, scriptus et in octo capita (taranga) divisus. Primum, collato Weberi Catal. p. 158 sqq. paulum emendatum, subjunxi: तमोगुणविनाशिनी सकलकालमुद्योतिनी धरातलविहारिणी जडसमाजविद्वेषिणी । कलानिधिसहायिनी लसदलोलसौदामिनी मदं-

---

कर्म समाजुहाव बंधून् । किमिहास्ति यतेस्तवाधिकारः कितवेत्येनममी निनिंदुरुच्चैः ॥४६॥ अनलं बहुधार्थितापि तस्मै वत नादत्त च बंधुता तदीया । अथ कोपपरीवृतांतरोऽसावखिलांस्तानशपच्च निर्ममेंद्रः ॥४७॥ संचित्य काष्ठानि च शुष्कवंति गृहोपकंठे धृततोयपात्रः । स दक्षिणे दोष्णि ममंथ वह्निं ददाह तां तेन च संयतात्मा ॥४८॥ न याचिता वह्निमदुर्यदस्मै शशाप तान्स्वीयजनान्सरोषः । इतः परं वेदबहिष्कृतास्ते द्विजा यतीनां न भवेच्च भिक्षा ॥४९॥ गृहोपकंठेषु च वः श्मशानमद्यप्रभृत्यस्त्विति ताञ्छशाप । अद्यापि तद्देशभवा न वेदमधीयते नो यतिनां च भिक्षा ॥५०॥ तदाप्रभृत्येव गृहोपकंठेष्वासीच्छ्मशानं किल हंत तेषां । महत्सु धीपूर्वकृतापराधो भवेत्पुनः कस्य सुखाय लोके ॥५१॥

[1] Nam quod *deṣika* per se magistrum (guru) significare dicitur, id nescio an ab angusti judicii lexicographis proficiscatur.

तरवलंबिनी भवतु कापि कादंबिनी ॥१॥ *Daksho* दक्षोपमेयः समजनि जनितारंभसंभावनीयो रक्षोविक्षोभभीतः प्रथितजनपदो रक्षितो येन Gauḍaḥ । तस्याशीर्वाददूर्वादलकलितशिखो भूपतेर्यज्ञयूपः संजातोऽनेकशाखः स्फुटमिव निगमो व्यासतो व्यासमान्नः ॥२॥ क्रियादक्षस्य दक्षस्य *Ráḍhápura*nivásinaḥ । सौजन्यजनिता कीर्तिर्गौडदेशमपूरयत् ॥३॥ तस्य काश्यपगोत्रस्य कश्यपस्येव संततिः । प्रचुरा गौडदेशीयकुलीनाग्रसराभवत् ॥४॥ ब्राह्मण्याचारधाराचरणरसवशो हंसरूपोऽस्य वंशे *Káṣínáthá*bhidhánaḥ[1] समजनि विनतो गोषु च ब्राह्मणेषु । येनानीय प्रयत्नाद्द्विजचरणरजो मूर्ध्नि विन्यस्तमात्रं पुत्रादेरत्र सिद्धौषधमिव सहसानेकरोगाञ्जहार ॥५॥ सामुद्रिके सोऽथ समुद्रकल्पः *Sámudrikáchárya* इति प्रसिद्धिं । लेभे नृणामाकृतिदर्शनेन फलं वदन्भूतभविष्यदादि ॥६॥ अथ तस्य त्रयः पुत्रा जाताः पितृपरायणाः । *Rájendro, Rághavendraṣ* cha, *Maheṣaṣ* चेति ते क्रमात् ॥७॥ तेषामेष गुणोत्तरः समजनि ṣrí-*Rághavendraḥ* कृती बाल्ये यं समुदीक्ष्य लक्षणयुतं तातोऽनुरक्तोऽभवत् । लेभे षोडशवार्षिकः कृतिमतामानंदवृंदांकुरो *Bhaṭṭácháryaṣatávadhána*-padavíṃ यस्तीर्णविद्यार्णवः ॥८॥ बाल्येऽधीत्य समस्तशास्त्रमभितः *Siddhánta-vágíṣa-to* वागीशप्रतिमो बभूव विजयी .वादेषु विद्यावतां । यस्यास्वाद्य सरस्वतीरससुधाधारैकसारा गिरो मूर्धांदोलनशालिनो हि कवयो गायंति नित्यं यशः ॥९॥ एकैकमेकैककविप्रयुक्तं श्लोकस्थितं वर्णमपव्यवस्थं । आकर्ण्य तत्संख्यमथ प्रयुंक्ते स्वयंकृतश्लोकगतं च वर्णं ॥१०॥ रीत्यानया श्लोकशतं कवीनां शतस्य निर्वर्त्त्यवधारयित्वा । समस्यया पूर्तिमतीमथैतां स्वयंकृतश्लोकशतीं तथैव ॥११॥ अतोऽभिधानेन शतावधानो बभूव लोके विदितप्रभावः । अनन्यसाधारणशक्तिशाली संख्यावतां संसदि माननीयः ॥१२॥ श्रुत्यर्थसार्थानवबोधहेतोर्मोहांधकारे पततां चिराय । संचारहेतोर्विविधक्रियायै *Mantrárthadípaṃ* कृतवान्कृती यः ॥१३॥ नानाव्यवस्थाभ्रमवंतमंतर्विद्वद्विचारोच्छलदुत्तरंगं । yaḥ *Kálatattvárṇavam* uttarítuṃ *Rámaprakáṣaṃ* nibabandha *setum* ॥ 14 ॥ यस्य च कविद्वयकृतमेतच्छ्लोकद्वयं ।

1. Ahaṃ *Hariharaḥ* siddher avilambasarasvatiḥ ।[2]
   Sákshách *Chhatávadhánas* tvam avatírṇá Sarasvatí
2. Pumrúpádaraṇí[3] sákshád avatírṇá Sarasvatí । [॥ 15 ॥
   Jitaḥ[4] *Ṣatávadhάno* 'to Vishṇunápi na jishṇuná

Kiṃ cha । [॥ 16 ॥

Adhíyánam uddiṣya chádhyápako yam
Bhavánandasiddhántavágíṣa úche ।
'Ayaṃ ko 'pi devo 'navadyátividyá-
chamatkáradharám apárám bibharti' ॥ 17 ॥[5]

तस्मादहं समुत्पन्नो महापुरुषतः पुमान् । धामैकनिधितः सूर्यात्किरणैककणो यथा ॥१८॥ विचार्य तारकं चक्रं पिता मे करुणापरः । मन्नाम *Rámadeveti* कृतवान्नामकर्मणि ॥१९॥ नाम्नैव संबोध्य जनः कथायां यदेवमाकारयिता[6] तदाशीः । ततोऽग्रजो मामतिवत्सलत्वाच्चिरंचिरंजीवतया जुहाव ॥२०॥ सोऽहं पुरः समधिगत्य पितुः प्रसादं ब्रह्मैकतां गतवतः शिवराजधान्यां । यत्नादधीतमनधीतमथापि शास्त्रमध्यापयामि निभृतं निपुणं विचार्य[7] ॥२१॥ *Nyáyádiṣástreshu* mayá kṛitá ye *kávyeshu* ye vá ruchiraprabandháḥ । bhavanti vidyásu cha yásu yásu ye बुधास्तत्परितोषकास्ते ॥२२॥ संप्रत्यसौ सर्वमहीश्वराणामपंडितानामपि सन्मतीनां । विलासहेतोरथ पंडितानां विरच्यते कोऽपि मया प्रबंधः ॥२३॥ पुनः पुनः पंडितमंडलीं तां याचे यया भूरपि मंडितेयं । मात्सर्यमुत्सृज्य कृतिं ममैतां सर्वे भवंतोऽपि विलोकयंतु ॥२४॥ जाने कदाचिदपि नैव शिवस्वरूपात्तातात्परं परमदैवतमन्यदत्र । तस्मादिमां कृतिमिहास्य तरंगिणीत्वे पाद्याय तच्चरणयोः परिकल्पयामि ॥२५॥ एतां मदीयामवगाह्य सम्यक्तरंगिणीं शुद्धधियो मनुष्याः । विद्यार्णवालोडनमंतरेण भवंतु *Shaṭṣástramata*-pravíṇáḥ ॥ 26 ॥ द्वैताद्वैतमतादिनिर्णयविधिप्रोद्बुद्धबुद्धिः श्रुतो भट्टाचार्यशतावधान इति यो गौडोद्भवोऽभूत्कविः । विद्वन्मोदतरंगिणी ननु चिरंजीवेन तज्जन्मना शास्त्रे या रचितोचितः प्रथमकस्तस्यास्तरंगो गतः ॥२७॥

इति महामहोपाध्यायश्रीचिरंजीवभट्टाचार्यकृतविद्वन्मोदतरंगिण्यां प्रथमस्तरंगः ॥१॥ '

Argumentum libri, systematum philosophicorum et religiosorum expositionem popularem, hic illic salibus aspersam, continentis, *Fr. Windishmann* in libro Münchener Gelehrte Anzeigen 1844. XVIII. p. 581 sqq. breviter et dilucide enarravit. Partem libri, tar. II. III. VIII. Kali-Krishna Bahadur anno 1832 et 1834, sententiis et distichis nonnullis praetermissis, edidit et Anglice se vertisse professus est. De codice Berolinensi cf. Weber Catal. p. 158.

Tar. I. fol. 6^b; II. fol. 20^b; III. fol. 30^b; IV. fol. 47^b; V. fol. 61^b; VI. fol. 72^b; VII. fol. 97^b; VIII. fol. 125^b.

Codex post annum 1810 satis accurate exaratus est. (Mill 41.)

---

[1] Káṣínátho *'shṭamo 'smát* Cod. Berol.

[2] °sarasvatí MS.

[3] Sic MSS.

[4] जातः MS.

[5] Bhujangaprayáta.

[6] यदेतमाका° MSS.

[7] 'Equidem quum praesentem patris favorem mihi conciliaverim, qui Váráṇasiae cum numine conjunctus est, diligenter doctrinas, quas (ab eo) edoctus sum, aliasve quas non edoctus sum, trado, rebus obscuris cum sollertia perpensis.' Metri ratione respecta, equidem verba: ब्रह्मैकतां गतवतः शिवराजधान्यां de 'Rághavendra in urbe Benares mortuo' intellexerim; *Windishmann* vero Ṣivarájadhányám vocabulum in alteram distichi partem tractum ad *Rámadevam* Benaris magisterium exercentem retulit.

N. JURISPRUDENTIA (DHARMA).

A. DHARMASASTRA.

630.

Lit. Devan. Charta Ind. Foll. 47. Long. $11\frac{1}{2}$. Lat. 6. Linn. 10, 11.

Dharmaṣástram, legum codex, vulgo *Yájnavalkyae* tributus, antiquitate Mánavadharmaṣástrae proximus. Caput primum de moribus et cerimoniis (áchára), secundum de jure civili (vyavahára), tertium de piamentis (práyaṣchitta) agit.

Codex noster cum Chambersiano 346, nunc Berolini adservato, tantopere consentit, ut ex eodem fonte utrumque derivatum esse facile appareat. Cujus rei probandae causa varias lectiones distichorum primi libri 1–150. cum Stenzleri textu collatorum excerpsi.

5. प्रवर्तकाः. 10. निषेकाद्याः. 18. अंतर्जानु. 23. पूर्वकां. 24. स प्रोक्ष्य. 29. भैक्ष्यं. 31. अपोशान. 32. आद्यात्. 37. षाडशाद्वाद्वा. 47. अधीयीत. 56. नैतन्मम. 59[a]. यज्ञस्यर्त्विजे. 59[b]. उत्तरजश्च. 62. वेतने. 66. दंड्यो. Ibid. दूषयंस्तां. 71. गंधर्वाश्च. 79. चतस्रस्तु. 82. भूषणाच्छादनैः. 85[a]. पुत्राश्च. 85[b]. स्वातंत्र्यं न. 87. इह. 88. विनेतराः. 89. वृतवर्ती. 97. पंचमे सप्तमेऽपि वा. 98. प्रकुर्वीत. Ibid. पूर्विकां. Post distichon 89. haec sequuntur:

कंटकिक्षीरवृक्षोत्थं द्वादशांगुलिसंमितं ।
कनिष्ठकाग्रवत्स्थूलं पर्वार्धकृतकूर्चिकं ।
दंतधावनमुद्दिष्टं जिह्वोल्लेखनिका तथा ।

99. अवगच्छेत्. 101. अध्यात्मिकां. 106. अपोशान. 108. सत्कृत्य भिक्षा दातव्या भिक्षवे. 109. सत्क्रियान्वासनं. 113. नातितृप्तोऽथ. 115. चोत्थाय. 119. कुसीदकृषि. 124. स हि सोमं. 125. पशुं. 132. वार्धुषी. 136. वर्ज्यं. Ibid. सर्वमंत्रं. 137. निःक्षिपेत्. 143. यथोत्तरं द्वि post वहिः. 144. तथा pro मृते. 146. च pro वा. 147. कृतांतरे. 148. श्मशाने.

Distichorum omnium numerus in hoc codice 1058. In fine haec adduntur, emendatis emendandis a me exscripta:

विप्रैरेतद्विशेषेण धार्यं वाजसनेयकैः ।
इच्छद्भिर्धर्ममतुलमिह लोके परत्र च ॥५०॥
यदवाप्तं मया देवादादित्याद्वै सनातनात् ।
तद्वः सर्वमिदं प्रोक्तं श्रुतिस्मृत्यभिसंज्ञितं ॥५१॥
निःश्रेयसकरं नृणां शास्त्रं देवाभिपूजितं ।
ज्ञात्वा ये च व्यवस्यंति ते नेहायांति वै पुनः ॥५२॥
निर्जित्य वाजसनेयानृषीन्सर्वानुपस्थितान् ।
गावो येनाहृतास्तस्मै नमोऽस्तु ब्रह्मरातये ॥५३॥
अध्यापयितुं संक्षिप्तं शास्त्रं बुद्धिविवर्धनं ।
अतुलं छंदसि हैतद्याज्ञवल्क्येन भाषितं ॥५४॥[1]
सर्वपापहरं पुण्यं सुप्रसन्नं समंजसं ।
श्लोकानामपि विज्ञेयं सहस्रं च शताधिकं ॥५५॥ etc.
प्रकाशिता येन यजूंषि लोके भृगोः सकाशात्तपसः प्रभावात् ।
तं याज्ञवल्क्यं ककुदं मुनीनां नमस्करोम्यार्तिहरं मुनींद्रं ॥

Editio praestantissima cum versione accurata Germanica a *Stenzler* anno 1849 Berolini edita est. Quam versionem Roer et Montriou in libro: 'Hindu law and judicature from the Dharma-ṣástra of Yájnavalkya. Calcutta, 1859. 8°.' Anglice reddiderunt.

Codex hoc seculo ineunte exaratus est. (MILL 55.)

631.

Foll. 217[b]. Hoc folium, quod literatura Bengalica hoc seculo ineunte exaratum est, laeva numero ৮৫, dextra ৭৪. signatum, *Mitáksharae,* a *Vijnáneṣvara* scriptae, fragmentum continet, quo Yájnavalkyae distichon 2, 127. explicatur. (WILSON 163[d].)

632.

Lit. Devan. Charta Ind. Foll. 354. Long. $13\frac{1}{2}$. Lat. 5. Linn. 9.

Continetur hoc codice commentarius ad secundum *Mitáksharae,* a Vijnáneṣvara compositae, caput, quo jus forense tractatur. Qui commentarius subscriptione a *Lakshmídeví* compositus esse dicitur. In folio 1[a]. vero titulus *Mitáksharáṭíká Bálambhaṭṭí* inscriptus est. Incipit: पूर्वस्मिंते दुष्टदंडस्य शिष्टरक्षणस्य विधानादन्वयव्यतिरेकाभ्यां पालनाधिकारिणाहरहर्व्यवहारदर्शनं कर्त्तव्यमित्युक्तं तस्य व्यवहारस्य स्वरूपप्रकारेतिकर्तव्यताकांक्षायामयमध्याय इत्याहाभिषेकादीति.

In fine haec leguntur: इति श्रीमन्मिताक्षराव्याख्याने महादेवभट्टात्मजोमांगजवैद्यनाथाङ्गभूत्तनालकृष्णाजनिपापगुंपाख्यश्रीलक्ष्मीदेवीविरचिते लक्ष्म्यभिधे व्यवहारप्रकरणं संपूर्णः ॥ Quae verba, quamvis corrupta, opus post medium seculum duodevicesimum compositum esse probant.

Codex hoc seculo ineunte exaratus est. (WILSON 160.)

633.

Lit. Bengal. Charta Ind. Foll. 155. Long. 16. Lat. $3\frac{1}{2}$. Linn. 6.

Continetur hoc codice *Subodhiní,* commentarius brevis ad Vijnáneṣvarae Mitáksharám a *Viṣveṣara* (bhaṭṭa-

[1] i. e. 'Hic legum codex praestantissimus, animi incrementum, ut docendo inserviret, a Yájnavalkya metrice in compendium redactus est.'

Visvesvara) Peṭṭibhaṭṭae et Ambikae filio, e Kausika gente oriundo, compositus. (A.) Incipit:

नमः सकलकल्याणभाजनाय पिनाकिने ।
नमो लक्ष्मीनिवासाय देवतायै गिरां नमः ॥१॥
पेट्टिभट्टात्मजः श्रीमान् भट्टविश्वेश्वरः सुधीः ।
व्याख्यां मिताक्षराख्यायाः कुरुतेऽयं सुबोधिनीं ॥२॥
मतिर्येषां शास्त्रे प्रकृतिरमणीया, व्यवहृतिः
परा, शीलं श्लाघ्यं, जगति ऋजवस्ते कतिपये ।
चिरं चित्ते तेषां मुकुरतलभूते स्थितिमिया-
दियं *Vyásáraṇyapravaramunisishyasa* भणितिः ॥३॥

पूर्व्वाध्यायायान्ते राजधर्म्मकथनप्रस्तावेन दुष्टेषु दण्डविधानाच्छिष्टेषु परिपालनविधानादन्वयव्यतिरेकाभ्यां प्रजापालनाधिकारिणाऽहरहर्दर्शनं कर्त्तव्यमित्युक्तं । तस्य व्यवहारस्य स्वरूपेतिकर्त्तव्यताकाङ्क्षायामुत्तराध्याय आरभ्यते । अभिषेकादिगुणयुक्तस्येति ।

1. Vyavahāramātṛiká fol. 8^{b}; 2. asádháraṇamátṛiká fol. 31^{b}; 3. riṇádánaprakaraṇam et 4. nikshepaprakaraṇam fol. 48^{b}; 5. sákshiprakaraṇam fol. 56^{a}; 6. lekhyaprakaraṇam fol. 57^{a}; 7. divyaprakaraṇam fol. 60^{b}; 8. rikthavibhágaprakaraṇam fol. 113^{a}; 9. símávivádaprakaraṇam fol. 116^{b}; 10. svámipálavivádaprakaraṇam fol. 113^{b}; 11. asvámikavikrayaprakaraṇam fol. 119^{b}; 12. dattápradánikam fol. 121^{a}; 13. krítánusayaprakaraṇam fol. 121^{b}; 14. abhyupetyásusrúshá fol. 123^{a}; 15. samvidvyatikramaprakaraṇam fol. 123^{b}; 16. vetanádánaprakaraṇam fol. 125^{a}; 17. dyútasamáhvayaprakaraṇam fol. 125^{b}; 18. vákpárushyam fol. 130^{a}; 19. daṇḍapárushyaprakaraṇam fol. 134^{a}; 20. sáhasaprakaraṇam fol. 134^{b}; 21^{a}. *nejakádínáṃ daṇḍavidhánaṃ náma prásangikaprakaraṇam* fol. 136^{a}; 21^{b}. vikríyásampradánam fol. 138^{b}; 22. sambhúyasamutthánam fol. 142^{b}; 23. steyaprakaraṇam fol. 146^{b}; 24. strísaṃgrahaprakaraṇam fol. 152^{a}; 25. prakírṇakam fol. 154^{b}.

In fine disticha duo leguntur, quorum primum, collato codice B. emendatum, exscripsi:

माता पुण्यचरित्रकीर्त्तिविभवा (°विमला B.) यस्यांबिका नामतः,
शाकल्यापरमूर्त्तिरार्यचरितः श्रीपेट्टिभट्टः पिता ।
सोऽयं कौशिकवंशभूषणमणिः श्रीभट्टविश्वेश्वरो
विज्ञानेश्वरसूक्तिभारविवृतौ दक्षश्चिरं वर्धते ॥१॥[1]

Codex post annum 1810 satis accurate exaratus est. (Wilson 32.)

634.

Foll. 167–217. Lit. Bengal. Linn. 13–17. *Subodhinís* fragmentum, quo Mahesvarae commentarius inde ab initio usque ad finem capitis rem hereditariam tractantis continetur. (B.)

[1] °सूक्तिभारविवृतौदीक्षश्चिरं B.

Haec voluminis pars post annum 1805 exarata est. (Wilson 163^{c}.)

635.

Foll. 218–251. Mitáksharayáḥ *Siddhántasangrahas*, placitorum, quae Mitákshará libro continentur, compendium, a *Rádhámohanaṣarman* factum. Incipit:

नत्वा कृष्णपदद्वन्द्वं राधामोहनशर्म्मणा ।
मिताक्षरायाः सिद्धान्तसंग्रहोऽयं विलिख्यते ।

सर्व्वत्र संक्षेपे कार्य्यकारित्वाभावादष्टादशविवादपदसिद्धान्तसंग्रहेऽयं यत्नः । यद्यप्यष्टादशविवादपदानां परस्परकार्य्यकारणभावाभावान्मानवेयपाठक्रमो ग्रन्थकृद्भिर्न लिखितस्तथापि प्रसिद्धत्वात्तत्क्रम एवात्र लिख्यते मतन्तु योगीश्वरस्यैव ।

Auctor, quae Vijnánesvara de octodecim actionum civilium generibus protulit, in compendium redegit et perraro annotationibus illustravit, ordinem vero eum secutus est, qui Mánavadharmae libris VIII et IX (cf. VIII, 4–7) observatus est, et quem ipse vulgo retineri (*prasiddhatvát*) declarat.

Haec voluminis pars hoc seculo ineunte exarata est. (Wilson 163^{e}.)

636, 637.

Volumina duo. Lit. Devan. Charta Ind. Vol. I. Foll. 1–274. Long. 11. Lat. 5. Linn. 9. Foll. 275–332. Long. $11\frac{1}{2}$. Lat. 5. Linn. 14. Vol. II. Long. $11\frac{1}{2}$. Lat. 5. Linn. 10.

Parásarasmṛitiryákhyá Mádhavíyá, legum codicis Parásarae tributi explicatio, a *Mádhava* composita (A.), quo opere auctor se Parásarasanhitám interpretatum esse profitetur, re vera textu illo exili usus est, quo suam morum, legum, philosophiae, theologiae doctrinam, e variis fontibus petitam, exponeret et in conspectu collocaret. Quare, quae ex libris antiquioribus afferuntur, nonnunquam satis utilia sunt, sed in explicandis Parásarae verbis a re et veritate longius discessit, quam Vijnánesvara in Yájnavalkyae commentario.

Vol. I. foll. 332. Adhyáya I–III. Prooemii partem majorem, qua inprimis Parásarasmṛitis auctoritas arguitur, collatis codicibus B. et E. I. H. 402.[2] paulum emendatam, subjeci:

वागीशाद्याः सुमनसः सर्वार्थानामुपक्रमे ।
यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननं ॥१॥
सोऽहं प्राप्य विवेकतीर्थपदवीमाम्नायतीर्थे परं
मज्जन्सज्जनतीर्थसंगनिपुणः सद्वृत्ततीर्थं श्रयन् ।
लब्ध्वामाकलयन्प्रभावलहरीं *sri-Bháratítírthato*
Vidyátírtham उपाश्रयन्हृदि भजे श्रीकंठमव्याहतं ॥२॥

[2] Hoc apographon e codice, anno 1597 exarato, transscriptum est.

सत्यैकव्रतपालको द्विगुणधीस्त्र्यर्घी चतुर्वेदिता
पंचस्कंधकृती षडन्वयदृढः सप्तांगसर्वंसहः ।
अष्टव्यक्तिकलाधरो नवनिधिः पुष्यद्दशप्रत्ययः
स्मार्तोच्छ्रायधुरंधरो विजयतां *ṣrí-Bukkaṇaḥ* क्ष्मापतिः ॥३॥
इंद्रस्यांगिरसो, ऽनलस्य सुमतिः, शैव्यस्य मेधातिथि-
र्धौम्यो धर्मसुतस्य, वैन्यनृपतेः स्वौजा, निमेर्गौतमिः ।
प्रत्यग्दृष्टिररुंधतीसहचरो रामस्य पुण्यात्मनो
यद्वत्तस्य विभोरभूत्कुलगुरुर्मंत्री तथा *Mádhavaḥ* ॥४॥
प्रज्ञामूलमहाविवेकसलिलैः सिक्तावलोपघ्निका[1]
मंत्रैः पल्लविता विशालविटपा संध्यादिभिः षड्गुणैः ।
शक्त्या कोरकिता यशःसुरभिता सिद्धा समुद्यत्फला
संप्राप्ता भुवि भाति नीतिलतिका, सर्वोत्तरं माधवं ॥५॥
Ṣrímatí jananí yasya, sukírtir *Máyanaḥ* pitá ।
Sáyaṇo Bhoganáthaṣ cha manobuddhí sahodarau ॥6॥
Yasya *Baudháyanaṃ* sútraṃ, ṣákhá yasya cha yájushí ।
Bháradvájaṃ kulaṃ yasya, sarvajnaḥ sa hi Mádhavaḥ ॥7॥
स माधवः सकलपुराणसंहिताप्रवर्तकः स्मृतिसुखमापराशरः ।[2]
परावरस्मृतजगदीहितासये पराशरस्मृतिविवृतौ प्रवर्तते ॥८॥
पराशरस्मृतिः पूर्वैर्न व्याख्याता निबंद्धृभिः ।
मयातो माधवार्येण तद्व्याख्यायां प्रयत्यते ॥९॥

ननु "नेयं स्मृतिर्व्याख्यानमर्हति तत्प्रामाण्यस्य दुर्निरूपत्वात् । यत्तु वेदप्रामाण्यकारणं जैमिनिना सूत्रितं तत्प्रमाणं बादरायणस्यानपेक्षत्वादिति, न तत् *paurusheyeshu* मूलप्रमाणसापेक्षेषु ग्रंथेषु योजयितुं शक्यते । तर्ह्यस्तु मूलप्रमाणमुपजीव्य प्रामाण्यं । तन्न, मूलस्य दुर्भणत्वात् ।[3] न तावत्प्रत्यक्षं मूलं, धर्मस्यातींद्रियत्वात् । नाप्यनुमानं, तस्य प्रत्यक्षसापेक्षत्वात् ।[4] नापि पुरुषांतरवाक्यं । विप्रलंभकस्य पुंसो यथादृष्टार्थवादित्वाभावात्, अविप्रलंभकस्यापि संशयविपर्ययसंभवात् । नापि चोदना, तस्या अनुपलब्धेः । नो खलु स्मर्यमाणानां शौचाद्याचाराणां मूलभूतां कांचिच्चोदनां प्रत्यक्षत उपालभामहे । nápy *anumátuṃ* ṣakyate, Ṣákyádipraṇítachaityavandanádishv atiprasangát. Athochyeta[5]: 'Manvádismṛitínáṃ Ṣákyádismṛitínáṃ chásti mahad vaishamyam, pratyakshavedenaiva sákshán *Manvádi*prámáṇyángíkárát. *Yad vai kiṃcha* Manur avadat, tad bheshajam iti hy ámnáyate. Na tv evaṃ *Ṣákyádi*smṛityanugráhakaṃ kiṃchid vaidikaṃ vacho 'sti. Ato noktátiprasanga' iti. *Tan na. Yad vai kiṃchety* asyárthavádatvena svárthe tátparyábhávát. मानवी ऋचौ धाय्ये कुर्यादिति विधाय तद्विधिस्तावकत्वेन यद्वैकिंचेत्यादेः पठितत्वात् । तस्य च विधेरयमर्थः । इष्टिविकृतिरूपे सोमारौद्रे चरावतिदेशतः प्राप्तासु सामिधेनीषु मध्ये प्रक्षेप्तव्यौ धाय्यासंज्ञकौ द्वौ मंत्रौ, तौ मानवौ कर्तव्याविति । तत्र मानवत्वमुक्तेनार्थवादेन[6] प्रशस्यते । अतो न स्मृतिप्रामाण्यं वेदेनोक्तमिति शाक्यादिस्मृतिवदप्रमाणभूता एव मन्वादिस्मृतयः । तथा चोक्तं ।

प्रायेणानृतवादित्वात्पुंसां भ्रांत्यादिसंभवात् ।
चोदनानुपलब्धेश्च श्रद्धामात्रात्प्रमाणतेति ॥

अस्तु वा कथंचिन्मनुस्मृतेः प्रामाण्यं तथापि प्रकृतायाः पराशरस्मृतेः किमायातं ।[7] न हि मनोरिव पराशरस्य महिमानं क्वचिद्वेदः प्रख्यापयति । तस्मात्तदीयस्मृतेर्दुर्निरूपं प्रामाण्यं" ।

अत्रोच्यते । *Prámáṇyasya svatastvád, aprámáṇye káraṇábhávách cha smṛitayaḥ pramáṇam.* यत्त्वप्रामाण्यसाधकमनृतवादित्वादिहेतुत्रयमुपन्यस्तं तदसिद्धं । आजन्मसिद्धेषु मनुपराशरादिष्वनृतवदनभ्रांत्योरत्यंतानाशंकितत्वेन हेतोः स्वरूपासिद्धेः । न चाजन्मसिद्धौ विवदितव्यं, पराशरादिसद्भावबोधिनामेव मंत्रार्थवादेतिहासपुराणानां तदीयसिद्धिबोधकत्वात् । मंत्राद्यप्रमाणे[8] च पराशराद्यसद्भावेऽनाश्रया सिद्धिः केन वार्येत । मानांतराविरुद्धानामननुवादिनां मंत्रादीनां स्वार्थप्रामाण्यमुत्तरमीमांसायां देवताधिकरणे व्यवस्थापितं । अर्थवादाधिकरणे तु स्वार्थप्रामाण्यनिराकरणं विरुद्धानुवादयोः सावकाशं । अतो यद्वैकिंचेत्यर्थवादस्य विधिस्तावकस्य स्वार्थेऽपि तात्पर्यमस्तीति न शाक्यादिप्रतिवंदी युक्ता । तदेवाभिप्रेत्य *Chaturvinṣatimate* शाक्यादिवाक्यानामनादरणीयत्वमुक्तं ।

अर्हच्चार्वाकवाक्यानि बौद्धादिपठितानि तु ।
विप्रलंभकवाक्यानि तानि सर्वाणि वर्जयेदिति ॥

न च पराशरमहिम्नोऽश्रौतत्वं । स होवाच Vyásaḥ *Páráṣarya* इति श्रुतौ पराशरपुत्रत्वमुपजीव्य व्यासस्य स्तुतत्वात् । यदा सर्वसंप्रतिपन्नमहिम्नो वेदव्यासस्यापि स्तुतये पराशरपुत्रत्वमुपजीव्यते, तदा किमु वक्तव्यमचिंत्यमहिमा पराशर इति । किंच वाजसनेयिशाखायां वंशब्राह्मणे वेदसंप्रदायप्रवर्तकगुरुशिष्यपरंपरायां पराशरस्य पुत्रपुत्रौ श्रूयेते । घृतकौशिकाद्घृतकौशिकः पाराशर्यायनात्पाराशर्यायणः पाराशर्यात्पाराशर्यो जातूकर्ण्यात् (शत° ब्रा° १४. ५. ५. २१.) इत्यादि । तस्मात्पराशरोऽपि मनुसमान एव । एष एव न्यायो वसिष्ठात्रियाज्ञवल्क्यादिषु योजनीयः । तत्तद्विषयश्रुतीनामुपलंभात् । ऋषयो वा इंद्रं प्रत्यक्षं नापश्यन् तं वसिष्ठः प्रत्यक्षमपश्यत् । अत्रिरदादौर्वाय[9] प्रजां पुत्रकामाय । अथ याज्ञवल्क्यस्य द्वे भार्ये बभूवतुरित्याद्याः श्रुतयः । न चैवं सति

[1] सिक्तापलो° A. सिक्तावलो° B. C.

[2] स्मृतिसुखमा° A.

[3] यद्यस्तु मूलप्रमाणमुपजीव्य प्रामाण्यं तत्तन्मूलस्य दुर्भणत्वात् । A.

[4] तस्य प्रत्यक्षमूलत्वात् A.

[5] 'Quodsi dicatur.'

[6] मानववचनमु° B. C.

[7] किमायतं B. C.

[8] मंत्राद्यप्रामाण्ये च B. C. सद्भावेनाश्रया MSS. Totum locum *Muller*, Ancient Sanscrit Literature, p. 90. ita vertit: 'Nay, even if we had not the testimony of the Mantras, how could the perfection of Paráśara and others be denied, which is involved in their very existence? A difference of opinion is quite impossible.' Locus mihi quidem sic videtur reddendus esse. 'Quodsi Paráṣaram aliosque re vera exstitisse, Mantrae ceterique libri sacri auctoritate sua comprobent, quis est, qui eorum virorum perfectionem aliunde non pendentem negare possit?'

[9] अत्रिरदर्शदौर्वाय A. pr. m. C. अत्रिरादर्शदौर्वाय A. s. m. अत्रिरदर्शदौर्वाय B.

मन्वादिस्मृतौ कुतोऽनादर इति शंकनीयं, मन्वादिस्मृतेर्मेधातिथ्यादिभिर्व्याख्यातत्वात्।[1] या च मूलभूतचोदनानुपलब्धिरुपन्यस्ता साप्यसिद्धा। 'पंच वा एते महायज्ञाः संतति प्रतायंते, संतति संतिष्ठंते । देवयज्ञः पितृयज्ञो भूतयज्ञो मनुष्ययज्ञो ब्रह्मयज्ञ' इत्यादीनां स्मार्तधर्ममूलभूतचोदनानामुपलंभात्। संतति संततं नित्यमित्यर्थः। यत्रापि शौचादौ नोपलभ्यते तत्रापि सा संभाव्यते। तथा चोक्तं भट्टाचार्यैः।

वैदिकैः स्मर्यमाणत्वात्तत्परिग्रहदार्ढ्यतः।
संभाव्य वेदमूलत्वात्स्मृतीनां मानतोचिता ॥ इति।

मनुनाप्येतदेवाक्तं।

श्रुतिं पश्यंति मुनयः स्मरंति च तथा स्मृतिं।
तस्मात्प्रमाणमुभयं प्रमाणैः प्रमितं भुवि ॥
योऽवमन्येत ते तूभे हेतुशास्त्राश्रयान्नरः।
स साधुभिर्बहिष्कार्यो नास्तिको वेदनिंदकः ॥[2] इति।

आनुशासनिकेऽपि।

धर्मं जिज्ञासमानानां प्रमाणं परमं श्रुतिः।
द्वितीयं धर्मशास्त्रं तु तृतीयं लोकसंग्रहः ॥ इति।

तस्माद्व्याख्यातुं योग्या पराशरस्मृतिरिति सिद्धं।

पराशरस्मृतावस्यां ग्रंथकृद्भिर्विविच्यते।
द्वे कांडे द्वादशाध्यायाः श्लोका अष्टोनषट्छतं ॥
आचारस्याग्रिमः[3] कांडः प्रायश्चित्तस्य चांतिमः।
इष्टप्राप्तिरनिष्टस्य निवृत्तिश्चानयोः क्रमात् ॥
एते सर्वे पुण्यश्लोका भवंतीति श्रुतिर्जगौ।
विहितादाश्रमाचारादिष्टाप्तिः पारलौकिकी ॥
प्रसक्तो नरकोऽनिष्टो निषिद्धाचरणेन यः।
तन्निवृत्तिः स्फुटा शास्त्रे प्रायश्चित्ताभिधायिनी ॥
परलोकप्रधानस्य धर्मस्यैषा द्वयी गतिः।
प्रायश्चित्तं तथाचारः श्रौतधर्मे तथेक्षणात् ॥
श्रौतो धर्मोऽग्निहोत्रादिराचारस्तदनुष्ठितिः।
अयथाविध्यनुष्ठाने प्रायश्चित्तं श्रुतौ श्रुतं ॥
कल्पसूत्रकृतः श्रौते प्रायश्चित्तमनुष्ठितिं।
असूत्रयन्नुभे एव, व्यवहारं तु नाब्रुवन् ॥
तद्वदेवायमाचार्यः परलोकप्रधानकं।
स्मार्तधर्मं विवक्षुः सन्कांडद्वयमवोचत ॥
ननु चोदनयागम्ये व्यवहारेऽपि धर्मता।
अस्तीति चेदस्तु, सा तु लोके[4]ऽस्मिन्नुपयुज्यते ॥

कारीर्यादिश्रौतधर्मो दृष्टैकफलको यथा।
लाभपूजाख्यातिमात्रफला व्यवहृतिस्तथा ॥
जेतुर्लाभादिकं तद्वत्पराजेतुश्च दंडनं।
तावेव स्वर्गनरकौ विहितप्रतिषिद्धजौ ॥
ननु राज्ञश्च सभ्यानां साक्षिणां चान्यथाकृतौ।
प्रत्यवायाच्च व्यवहृतिः परलोकप्रयोजना ॥
अदंड्यान्दंडयन्राजा दंड्यांश्चैवाप्यदंडयन्।
अयशो महदाप्नोति नरकं चापि गच्छति ॥ Manu 8, 128.
सभा वा न प्रवेष्टव्या वक्तव्यं वा समंजसं।
अब्रुवन्विब्रुवन्वापि नरो भवति किल्बिषी ॥ Ibid. 13.
साक्ष्येऽनृतं वदन्पाशैर्बध्यते वारुणैर्नरः।
विवशः शतमा जातीस्तस्मात्साक्षी वदेदृतं ॥ Ibid. 82.
राजादेः प्रत्यवायोऽस्तु व्यवहारे किमागतं।
व्यवहारो न राजादेरर्थिप्रत्यर्थिनोस्तु सः ॥
अर्थिप्रत्यर्थिनोरत्र प्रत्यवायो न हि स्मृतः।
पराजयनिमित्तेन प्रायश्चित्तं च न स्मृतं ॥
ऋणाद्यैर्नरकोक्तिर्या साप्याचारनिबंधना।
अस्तु वा नरकः शास्त्रविरुद्धव्यवहारिणः।
परलोकप्रधानत्वमेवास्माभिर्निवार्यते ॥
एतल्लोकप्रधानो यः परलोकोपसर्जनः।
स धर्मो व्यवहारः स्यादाचारस्तु विपर्यये ॥
प्राधान्ये 'py *asya* लोकस्य स्यादेवाम्नायमूलता।
गांधर्वाद्युपवेदेषु तादृशेषु तदीक्षणात् ॥
जग्राह पाठ्यमृग्वेदात्सामभ्यो गीतमेव च।[5]
यजुर्वेदादभिनयान्रसानाथर्वणादपि ॥
किं बहूक्त्यायमाचार्यः परलोकैकदृष्टिमान्।
व्यवहारं तु नावोचत्किंतु सूचितवानमुं ॥
राजधर्मप्रसंगेन 'क्षितिं धर्मेण पालयन्।
इति ब्रुवन्राजदृश्यं व्यवहारमसूचयत् ॥
साक्षादिष्टादिहेतुत्वादाचारः पूर्वमीर्यते।
आचारस्यान्यथात्वे तु प्रायश्चित्तगवेषणं ॥
इहाचारे त्रयोऽध्यायाः प्रायश्चित्ते नवेरिताः।
अवतारश्चतुर्वर्णधर्मौ[6] साधारणेतरौ ॥
शिष्टाचाराद्विके तत्र धर्मौ साधारणौ मतौ।
षट्कर्मक्षितिरक्षाद्या वर्णाः साधारणाः स्मृताः ॥
आचारे प्रथमाध्याये त एतेऽर्थाः प्रकीर्तिताः।
कृष्यादिजीवनोपायो द्वितीयेऽध्याय ईरितः ॥
चतुराश्रमधर्माश्च सूचिता आश्रमोक्तितः।
उक्तौ तृतीय आशौचविस्तारश्राद्धसंग्रहौ ॥

---

[1] *Müller* l. l. p. 92. 'Therefore one must not think of attacking the Smṛitis of Manu and others by any means.' Locum *nostrum* sic vertendum esse apparet: 'Quae quum ita sint, legum codices, a Manu aliisque compositi, ne (a me) spreti videantur, verendum non est, quum ii *Medhátithim* aliosque commentatores invenerint (in Parásara vero explicando hucusque nemo incubuerit).'

[2] Manu II, 11. Prius distichon in editionibus nostris exstare non videtur.

[3] आचारस्यादिमः B. C.

[4] अस्तीति चेदनुष्ठातुर्लोके B. C.

[5] जग्राह पाठ्यमृग्वेदात् सामभ्यो गीतिमेव च A. B. जग्राह पाक्यमृग्वेदात् सामभ्यो गित्तिमेव च C. Cf. supra 200ª. 13. ubi nunc चाभिनयं गीतं legendum esse video.

[6] आचारतश्चतुर्वर्ण° B. C.

अध्यायत्रयगा अर्थाः प्रोक्ता आचारकांडगाः ।
तुर्ये प्रकीर्णपापस्य प्रायश्चित्तं प्रपंचितं ॥
प्रसंगात्पुत्रभेदादि प्रोक्तं च परिवेदनं ।
प्रकीर्णशेषः संस्कार आहिताग्नेश्च पंचमे ॥
मलावहे च संकीर्णकरणे चोपपातके ।
प्रायश्चित्तं षष्ठ उक्तं शुद्धिश्चान्ने रसेऽपि च ॥
अवशिष्टद्रव्यशुद्धिः सप्तमाध्याय ईरिता ।
प्रायश्चित्तं गोवधस्य सामान्येनाष्टमे स्मृतं ॥
रोधनादि विशेषेण नवमे तदुदीरितं ।
अगम्यागमने प्रायश्चित्तं दशम ईरितं ॥
अभोज्यभोजनादौ तदेकादश उदीरितं ।
द्वादशः परिशेषः स्यात्कांडयोरुभयोर्द्वयोः ॥
अस्यान्येषामनुक्तानामुपलक्षणमीक्ष्यतां ।[1]
अनुपातकयुक्तेषु प्रायश्चित्तं क्वचित्क्वचित् ॥
नोक्तं तथा रहस्यं च प्रायश्चित्तं न वर्णितं ।
सौम्यपर्णादिकृच्छ्राणि नोदितान्यत्र कानिचित् ॥
नोक्तः कर्मविपाकश्च तत्सर्वमुपलक्षितं ।
इत्थं नवभिरध्यायैः प्रायश्चित्तं प्रपंचितं ॥
कलिं प्रति प्रवृत्तत्वात्प्रायश्चित्तप्रपंचनं ।
कलौ हि पापबाहुल्यं दृश्यते स्मर्यतेऽपि च ॥
नराः प्रायोऽल्पसामर्थ्यास्तेषामनुजिघृक्षया ।
समकोचयदाचारं प्रायश्चित्तव्रतानि च ॥
तेषां निंदा न कर्तव्या युगरूपा हि ते द्विजाः ।
इत्युक्तमादावंते च प्रायुंक्तैषा[2] कृपालुता ॥
वेदैकदेशाध्ययनं कृष्या विप्रादिजीवनं ।
इत्यादिवचसाचारसंकोचो भासते स्फुटं ॥
प्राजापत्यं गोवधे स्याद्ब्रह्मघ्नः सेतुदर्शनं ।
इति मुख्यव्रतत्वोक्तेः संकोचोऽत्रापि गम्यते ॥ κ.τ.λ.

Vol. I. fol. 48^{b}. *Áchárakáṇḍe prathame 'dhyáya áchárávatáraḥ samáptaḥ.*

Ad Paráṣarae distichon: व्यासवाक्यावसाने तु मुनिमुख्यः पराशरः । धर्मस्य निर्णयं प्राह सूक्ष्मं स्थूलं च विस्तरात् ॥ quaestionis criticae nodus parum feliciter solvitur: ननु कस्यायं श्लोकः । न तावद्व्यासस्य । प्रश्नरूपस्याभावात् । नापि पराशरस्य । उत्तररूपत्वाभावात् । न त्वस्पमिदमुच्यते । आद्यश्लोकेऽपि समानमिदं नाचोद्यं ।[3] एवं तर्हीदृशेषु सर्वेषु परिहारोऽन्वेष्टव्यः ॥ उच्यते । पराशर एव भाविशिष्यबुद्धिसमाधानाय स्वकीयवृत्तांतादिज्ञापकार्थमीदृशाञ्छ्लोकान्निर्ममे इति द्रष्टव्यं । भारतादौ व्यासवृत्तांतश्लोकानां व्यासेनैव निर्मितत्वे सर्वसंप्रतिपत्तेः ॥

Fol. 34^{b}. De legum conditoribus: तत्र पैठीनसिः । teshám *Manv-Angiro-Vyása-GautamaAtry-Uṣano-Yamáḥ* । *Vasishṭha-Daksha-Saṃvarta-Ṣátátapa-Paráṣaráḥ* ॥ *Vishṇv-Ápastamba-Háritáḥ, Ṣankhaḥ, Kátyáyano, Bhṛiguḥ* । *Prachetá, Nárado, Yogí* (i. e. Yájnavalkya), *Bodháyana-Pitámahau* ॥ *Sumantuḥ, Kaṣyapo, Babhruḥ, Paiṭhíno, Vyása* eva cha । *Satyavrato, Bharadvájo, Gárgyaḥ, Kárshṇájinis* tathá ॥ *Jábálir, Jamadagniṣ* cha, *Laugákshir, Brahmasambhava* । iti dharmapraṇetáraḥ shaṭtrinṣad ṛishayas tathá ॥

Nanu kim iyam *parisankhyá?* । maivam । tatha sati *Vatsa-Maríchi-Devala-Páraskara-Pulastya-Pulaha-Kratu-Ṛishyaṣṛinga-Ṣankhalikhita-ChágaleyáÁtreyádínáṃ* dharmaṣástrapraṇetṛitvaṃ na syát । Áṣvamedhike parvaṇy api tattanmuniproktadharmánukramaṇád dharmaṣástrakartáro 'vagamyante । *ṣrutá me mánavá* dharmá ity upakramyaivaṃ paṭhyate ।

औमा माहेश्वराश्चैव नंदिधर्माश्च पावनाः ।
ब्रह्मणा कथिताश्चैव कौमाराश्च श्रुता मया ॥
धूम्रायणकृता धर्माः काव्या वैश्वानरा अपि ।
भार्गवा याज्ञवल्क्याश्च मार्कंडेयाश्च कौशिकाः ॥
भरद्वाजकृता ये च बृहस्पतिकृताश्च ये ।
कुणेश्च कुणिताहेश्च विश्वामित्रकृताश्च ये ॥
सुमंतुजैमिनिकृताः शाकुनेयास्तथैव च ।
पुलस्त्यपुलहोद्गीताः पावकीयास्तथैव च ॥
अगस्त्यगीताः सौधन्याः शांडिल्याः सौलभायनाः ।[4]
बालखिल्यकृता ये च ये च सप्तर्षिभिः कृताः ॥
वैयाघ्रा व्यासगीताश्च वितंडककृताश्च ये ।
तथा विदुरवाक्यानि भृगोरंगिरसस्तथा ॥
वैशंपायनगीताश्च ये चान्य एवमादयः ।

Fol. 54^{b}. *Anadhyáyaprakaraṇam.*

Fol. 52^{b}. Praecepta sacra e magistrorum ore ediscenda, non vero e libris scriptis legenda sunt: गुरुमुखादेवाध्येतव्यं न तु लिखितपाठः कर्तव्यः । तदाह नारदः । पुस्तकप्रत्ययाधीतं नाधीतं गुरुसंनिधौ । भ्राजते न सभामध्ये जारगर्भ इव स्त्रिया इति ॥

Fol. 54^{b}. *Atha yajanayájane nirúpayámaḥ.*

Fol. 56^{a}. Sacrificiorum genera enumerantur: हारीतोऽपि । पाकयज्ञान्यजेन्नित्यं हविर्यज्ञांश्च नित्यशः । सौम्यांस्तु विधिपूर्वेण य इच्छेद्ब्रह्म चाव्ययं ॥ ते च गौतमेन दर्शिताः । अष्टका पार्वणं श्राद्धं श्रावण्याग्रहायणी चैत्र्याश्वयुजीति सप्त पाकयज्ञसंस्थाः । अग्न्याधेयमग्निहोत्रं दर्शपूर्णमासौ चातुर्मास्यान्याग्रयणेष्टिर्निरूढपशुबंधः सौत्रामणीति सप्त हविर्यज्ञसंस्थाः । अग्निष्टोमोऽत्यग्निष्टोम उक्थ्यः षोडशी वाजपेयोऽतिरात्रोऽप्तोर्याम इति सप्त सोमसंस्था इति ॥ अपरांस्तु महायज्ञक्रतून्देवलो दर्शितवान् । अश्वमेधराजसूयपौंडरीकगोसवादयो महायज्ञक्रतव इति । एते सर्वे यज्ञा यथायोगं नित्यनैमित्तिककाम्यभेदेन त्रिविधाः ॥ नित्यं नैमित्तिकं काम्यं त्रिविधं कर्म पौरुषमिति मदालसोक्तेः ॥

Fol. 59^{a}. *Itthaṃ yajanaṃ nirúpitaṃ, yájane tu vidhiḥ*

[1] स्यादन्येषामनु° B. C.

[2] प्रयुक्तैषा C. et B. pr. m.

[3] चोद्यं B. C. quod idem valet.

[4] शौन्वभाजनाः A. pr. m. शौलभंजनाः B. C.

ṣrúyate. Sequitur disquisitio, utrum sacrificium ritus solius causa, an bonorum · et praemii, an utriusque rei respectu habito a Bráhmaṇa habendum sit: द्रव्यमर्जयन्ब्राह्मणः प्रतिगृह्णीयाद्याजयेदध्यापयेद्वा । न चायं नित्यविधिः । अकरणे प्रत्यवायादिनित्यलक्षणाभावात् । *api tu kámyavidhiḥ* । द्रव्यार्जनकामस्य तत्राधिकारात् । तत्रापि नापूर्वविधिः । जीवनोपायत्वेन याजनस्य प्राप्तत्वात् । तद्धेतुत्वं च मार्कंडेयपुराणे दर्शितं ।

याजनाध्यापने शुद्धे तथा पुत्रप्रतिग्रहः ।
एषा सम्यक्समाख्याता त्रितयं तस्य जीविका ॥ इति ।

नापि परिसंख्या । नित्यप्राप्तेरभावात् । तस्मात्पक्षे प्राप्तत्वान्नियमविधिरयं । स चायं नियमः पुरुषार्थ एव न तु क्रत्वर्थः । द्रव्यार्जनविधानस्य पुरुषार्थत्वे न लिप्सा । सूत्रे विचारितत्वात् । तथा हि । द्रव्यप्राप्तिः क्रत्वर्था पुरुषार्था वेति संशयः । तत्र पूर्वः पक्षः । *Kratvartheyam* । तथापि नियमस्यार्थवत्त्वात् । ब्राह्मणस्य याजनादिना क्षत्रियस्य जयादिना वैश्यस्य कृष्यादिनेति नियमः । स च पुरुषार्थत्वपक्षेऽनर्थकः स्यात् । उपायांतरेणार्जितस्यापि द्रव्यस्य क्षुत्प्रतिघातादिपुरुषार्थसंपादकत्वात् । क्रतुस्तु नान्यथा सिध्यति । अतस्तत्र नियमोऽर्थवानिति प्राप्ते ब्रूमः । द्रव्यं हि संपादितं सत्पुरुषं प्रीणयति । अतस्तस्य पुरुषार्थत्वं प्रत्यक्षदृष्टं । क्रत्वर्थता तु नियमान्यथानुपपत्त्या कल्पते । कॢप्तं चाकॢप्ताद्बलीयः । सति च पुरुषार्थत्वे क्रतोरपि भोजनादिवत्पुरुषकार्यतया तदर्थताप्यर्थात्संपद्यते । नियमस्तु *purushárthe*ऽप्यर्जनविधौ किंचिददृष्टं जनयिष्यति । क्रत्वर्थवादिनो जीवनलोपेन क्रतुरपि न सिध्येत । अतः पुरुषार्थो याजनादिरिति सिद्धं । ऋत्विग्भिर्विना याजयितान्यो न कोऽप्यस्तीति चेत् मैवं । आपस्तंबसूत्रे षोडशानामृत्विजां वरणमभिधाय याजयितुः सप्तदशस्य पृथग्वरणाभिधानात् । सदस्यं सप्तदशं कौषीतकिनः समामनंति । स कर्मणामुपद्रष्टा भवतीति । अत एव वसिष्ठवंशोत्पन्नस्य सात्यहव्यनामकस्य महर्षेः प्रश्नवाक्ये देवभागस्य सृंजयनामकान्ब्राह्मणान्प्रति याजकत्वं तैत्तिरीयकब्राह्मणे श्रूयते । वासिष्ठो ह सात्यहव्यो देवभागं प्रयच्छन्सृंजयान्बहुयाजिनो याजयत इति । तथा कौषीतकिब्राह्मणे चित्रनामकं प्रति श्वेतकेतोर्याजकत्वमाम्नातं । चित्रो ह वै गार्ग्यायणिर्यक्ष्यमाण आरुणिं वव्रे स ह पुत्रं श्वेतकेतुं प्रजिघाय याजयेतीति । तस्मादृत्विग्भ्योऽन्यः सदस्यो याजयिता । ऋत्विजो वा याजयितारः संतु, सर्वथाप्यस्ति ब्राह्मणानां जीवनहेतुर्याजनं ॥

Fol. 61[a]. *Atha dánapratigrahau nirúpyete.*

Fol. 63[b]. Donorum species quatuor: *Dhruvam, ájasrikam, kámyam, naimittikam* iti kramát । वैदिको दानमार्गोऽयं चतुर्धा वर्ण्यते द्विजैः ॥ प्रपारामतडागादि सर्वकामफलं *dhruvam* । 'tad *ájasrikam* इत्याहुर्दीयते यद्दिने दिने ॥ अपत्यविजयैश्वर्यस्त्रीबलार्थं यदिष्यते । इच्छासंस्थं[1] तु यद्दानं *kámyam* इत्यभिधीयते ॥ कालापेक्षं क्रियापेक्षमर्थापेक्षमिति स्मृतं । त्रिधा नैमित्तिकं प्रोक्तं सहोमं होमवर्जितं ॥

Fol. 71[b]. *Iti pratigrahaprakaraṇam.*

Fol. 76[b]. *Iti devatásvarúpanirúpaṇaprakaraṇam.*

Fol. 79[a]. *Iti bráhmamuhúrta átmahitachintanaprakaraṇam.*

Fol. 81[a]. *Iti viṇmútrotsarjanavidhiḥ.*

Fol. 83[b]. *Iti ṣauchaprakaraṇam.*

Fol. 88[b]. *Ity áchamanaprakaraṇam.*

Fol. 89[a]. *Iti dantadhávanaprakaraṇam.*

Fol. 91[a]. *Iti darbhavidhiprakaraṇam.*

Fol. 92[b]. *Iti snánaprakaraṇam.*

Fol. 93[b]. *Iti vastradháraṇaprakaraṇam.*

Fol. 94[a]. *Ity úrdhvapuṇḍhraprakaraṇam:* ब्रह्मपुराणे । पर्वताग्रे नदीतीरे मम क्षेत्रे विशेषतः । सिंधुतीरे च वल्मीके तुलसीमूलमाश्रिते । मृद एतास्तु संपाद्या वर्जयेत्त्वन्यमृत्तिकाः ॥ श्यामं शांतिकरं प्रोक्तं रक्तं वश्यकरं भवेत् । श्रीकरं पीतमित्याहुर्वैष्णवं श्वेतमुच्यते ॥ अंगुष्ठः पुष्टिदः प्रोक्तो मध्यमायुष्करी भवेत् । अनामिकान्नदा नित्यं मुक्तिदा च प्रदेशिनी ॥ एतैरंगुलिभेदैस्तु कारयेन्न नखं स्पृशेत् । वर्तिदीपाकृतिं वापि वेणुपत्त्राकृतिं तथा ॥ पद्मस्य मुकुलाकारं तथैव कुमुदस्य च । मत्स्यकूर्माकृतिं वापि शंखाकारमतः परं ॥ दशांगुलप्रमाणं तु उत्तमोत्तममुच्यते । नवांगुलं मध्यमं स्यादष्टांगुलमतः परं ॥ - - - सत्यव्रतोऽपि । ऊर्ध्वपुंड्रो मृदा शुभ्रो ललाटे यस्य दृश्यते । स चंडालोऽपि शुद्धात्मा पूज्य एव न संशयः ॥

Fol. 94[a]. *Prátaḥsnánaprasaṃgena snánántaráṇy uchyante.* Tatra Ṣankhaḥ । स्नानं तु द्विविधं प्रोक्तं गौणमुख्यप्रभेदतः । तयोस्तु वारुणं मुख्यं तत्पुनः षड्विधं भवेदिति । तत्र मुख्यस्नानस्य षट्प्रकारताग्नेयपुराणे दर्शिता । नित्यं नैमित्तिकं काम्यं क्रियांगं मलकर्षणं । क्रियास्नानं तथा षष्ठं षोढा स्नानं प्रकीर्तितं ॥

Fol. 101[a]. *Atha saṃdhyávidhiḥ.* तत्र संध्यास्वरूपं दक्षो दर्शयति । अहोरात्रस्य यः संधिः सूर्यनक्षत्रवर्जितः । सा तु संध्या समाख्याता मुनिभिस्तत्त्वदर्शिभिरिति । यद्यपि कालवाचकत्वेनात्र संध्याशब्दः प्रतीयते, तथापि तस्मिन्काल उपास्यदेवता संध्याशब्देनोपलभ्यते ॥

Fol. 106[b]. *Atha saṃdhyángajapavidhiḥ.*

Fol. 109[b]. *Atha homavidhiḥ.*

Fol. 113[a]. *Atha* múlavachanánusáreṇa *devatápújanaṃ vaktavyam.*

Fol. 120[a]. *Atha brahmayajnavidhiḥ.*

Fol. 122[b]. *Atha tarpaṇam.*

Fol. 127[b]. *Tarpaṇántaraṃ vastranishpíḍanaṃ kartavyam.*

Fol. 128[a]. *Atha* múlavachanoktaṃ kramapráptaṃ *devárchanaṃ nirúpyate.*

Fol. 137[b]. *Iti vaiṣvadevaprakaraṇam. Athátithyaparanámako manushyayajno nirúpyate.* Incipit: आतिथ्यस्य मनुष्ययज्ञत्वं कात्यायनेनोक्तं । अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणं । होमो दैवो बलिर्भौतो[2] नृयज्ञोऽतिथिपूजनमिति ॥ श्रुतिरपि । यद्ब्राह्मणेभ्योऽन्नं ददाति तन्मनुष्ययज्ञः संतिष्ठत इति ॥ बौधाय-

[1] इच्छासंज्ञं MSS.

[2] बलिर्भूतो MSS.

नोऽपि । अहरहर्ब्राह्मणेभ्योऽन्नं दद्यान्मूलफलशाकानि वेत्यथैनं मनुष्ययज्ञं समाप्नोति ॥

Hospitibus in India summam reverentiam tributam esse, nisi antiquioribus auctoritatibus constaret, etiam his recentiorum scriptorum sententiis appareret: अत एव यमः । न पृच्छन्गोत्रचरणे देशं नाम कुलं श्रुतं । अध्वनोऽप्यागतं विप्रं भोजनार्थमुपस्थितमिति ॥ न केवलं गोत्रप्रश्नादिवर्जनं किं तर्हि देवताबुद्धिरपि कर्तव्या । तदुक्तं शातातपेन । चित्ते विभावयेत्तस्मिन्व्यासः स्वयमुपागत इति ॥ विष्णुपुराणेऽपि । स्वाध्यायगोत्रचरणमपृष्ट्वापि तथा कुलं । हिरण्यगर्भबुद्ध्या तं मन्येताभ्यागतं गृहीति ॥ देवताबुद्धिविषयत्वे हेतुः सर्वदेवमयत्वं । तच्च पुराणसारे दर्शितं । धाता प्रजापतिः शुक्रो वह्निर्वसुगणो यमः । प्रविश्यातिथिमेते वै भुंजतेऽन्नं द्विजोत्तमेति ॥ गोत्रादिप्रश्ने बाधो यमेन दर्शितः । देशं नाम कुलं विद्यां पृष्ट्वा योऽन्नं प्रयच्छति । न स तत्फलमाप्नोति दत्त्वा स्वर्गं न गच्छतीति ॥

अतिथित्वेन स्तुवन्नन्यानपि भोजनीयानाह (scil. Paráṣara) । पापो वा यदि चांडालो विप्रघ्नः पितृघातकः । वैश्वदेवे तु संप्राप्तः सोऽतिथिः स्वर्गसंक्रम इति ॥ पापो गोवधाद्युपपातकी । एतेषां भोजनीयत्वमेव न त्वशेषातिथ्यसत्कारार्हत्वमेतदेवाभिप्रेत्याश्वमेधिके वर्णितं । चांडालो वा श्वपाको वा कालेयः कश्चिदागतः । अन्नेन पूजनीयश्च परत्र हितमिच्छतेति ॥ विष्णुधर्मोत्तरे । चांडालो वाथ पापो वा शत्रुर्वापि नृघातकः । देशकालेऽभ्युपगतो भरणीयो मतो ममेति ॥

Fol. 156[a]. *Iti bhojanaprakaraṇam.*

Fol. 156[b]. *Ity ahaḥṣeshádikṛityam.* Sequuntur de cubili praecepta quaedam: शयनप्रकारमाह हारीतः । सुप्रक्षालितचरणतलो रक्षां कृत्वोदकपूर्णघटादिमंगलोपेत आत्माभिरूपामनुपहतां सुत्रामाणमिति पठन् शय्यामधिष्ठाय रात्रिसूक्तं जपित्वा विष्णुं नमस्कृत्य सर्पाप सर्प भद्रं त इति श्लोकं जपित्वेष्टदेवतास्मरणं कृत्वा समाधिमास्थायान्यांश्च वैदिकान्मंत्रान्सावित्रीं च जपित्वा मंगल्यश्रुतं शंखं च शृण्वन्दक्षिणाशिराः स्वपेदिति । दक्षिणाशिरा इति प्रदर्शनार्थं । तथा च विष्णुपुराणं । प्राच्यां दिशि शिरः शस्तं याम्यायामथवा नृप । सदैव स्वपतः पुंसो विपरीतं तु रोगदमिति । गर्गोऽपि । स्वगृहे प्राक्शिराः शेते ह्यायुष्यं दक्षिणाशिराः । प्रत्यक्शिराः प्रवासे तु न कदाचिदुदक्शिराः ॥ पुराणेऽपि । रात्रिसूक्तं जपेत्स्मृत्वा सर्वांश्च सुखशायिनः । नमस्कृत्याव्ययं विष्णुं समाधिस्थः स्वपेन्निशीति ॥ *sukhaṣáyino* 'pi Gobhilena[1] darṣitáḥ । अगस्तिर्माधवश्चैव मुचुकुंदो महामुनिः । कपिलो मुनिरास्तीकः पंचैते सुखशायिनः ॥ शयने वर्जनीयानाह मार्कंडेयः । शून्यालये श्मशाने च एकवृक्षे चतुष्पथे । महादेवगृहे वापि मातृवेश्मनि न स्वपेत् ॥ न यक्षनागायतने स्कंदस्यायतने तथा । कूलच्छायासु च तथा शर्करालोष्टपांशुषु ॥ न स्वपेच्च तथा गर्ते विना वीक्षां कथंचन । धान्यगोविप्रदेवानां गुरूणां च तथोपरि ॥ न चापि भग्नशयने नाशुचौ नाशुचिः स्वयं । नार्द्रवासा न नग्नश्च नोत्तरापरमस्तकः । नाकाशे सर्वशून्ये च न च चैत्यद्रुमे तथा ॥ विष्णुरपि । नार्द्रवासाः स्वपेन्न पलाशशयने, न पंचदारुकृते, न गजभग्नकृते, न विद्युद्दग्धे, नाग्निस्पृष्टे, न बालमध्ये, न वारिमध्ये, न धान्ये, न गोगेहे, न गुरुहुताशनसुराणामुपरि, नोच्छिष्टे, न दिवेति ॥ etc.

Fol. 158[a]. *Idáním prakṛitán evábhishiktasya kshatriyasyásádháraṇadharmán áha.*

Fol. 169[a]. *Iti rájadharmaprakaraṇam. Kramapráptán vaiṣyásádháraṇadharmán áha.*

Fol. 170[b]. *Iti vaiṣyadharmaprakaraṇam.*

Fol. 173[a]. *Iti ṣúdradharmaprakaraṇam.*

Prathamo 'dhyáyaḥ.

Lectio secunda incipit: प्रथमेऽध्याये व्यासेन पृष्टयोर्वर्णचतुष्टयसाधारणधर्मयोर्मध्ये साधारणं धर्मं संक्षिप्यासाधारणधर्मः प्रपंचितः । अथेदानीं संक्षिप्तः साधारणो धर्मो द्वितीयेऽध्याये प्रपंच्यते । अथवा पूर्वाध्याय आमुष्मिकधर्मप्राधान्येन प्रवृत्तः । अयं त्वैहिकजीवनहेतुधर्मप्राधान्येन प्रवर्तते । तत्रादावध्यायप्रतिपाद्यमर्थं प्रतिजानीते । अतः परं गृहस्थस्य धर्माचारं कलौ युगे । धर्मं साधारणं शक्त्या चातुर्वर्ण्याश्रमागतं । तं प्रवक्ष्याम्यहं पूर्वं पराशरवचो यथेति ॥

Fol. 184[a]. De variis cincinnorum gerendorum modis haec: तत्र ऋषिभेदेन चूडानियममाह लौगाक्षिः । दक्षिणतःकमुंजा[2] वसिष्ठानामुभयतोऽत्रिकाश्यपानां मुंडा भृगवः पंचचूडा अंगिरसः । मंडनार्थं शिखिनोऽन्ये यथाकुलधर्मं वेति ॥

Fol. 184[b]. *Iti garbhádhánádi-chúḍánta-saṃskáraprakaraṇam. Athopanayanam.*

Fol. 192[b]. *Iti brahmacháriprakaraṇam. Atha gṛihasthásramaṃ nirúpayituṃ tadadhikárahetu snánam ádau nirúpyate.*

Fol. 193[b]. *Iti snátakaprakaraṇam. Atha viváhaḥ.*

Fol. 197[b]. Postquam praecepta plura attulit, quibus quominus consobrina in matrimonium ducatur prohibetur, haec addit: ननु ब्राह्मादिविवाहविषये मातुलसुताया इव मातृष्वसृसुताया अपि विवाहः प्राप्नुयात् । तन्न । शिष्टगर्हितत्वेन तत्र निषेधस्मृतिकल्पनात् । शिष्टगर्हितस्यानुपादेयत्वं याज्ञवल्क्य आह । अस्वर्ग्यं लोकविद्विष्टं धर्ममप्याचरेन्न त्विति । यद्यपि मातुलसुतापरिणयनमुदीच्यशिष्टगर्हितं, tathápi *dákshiṇátyaṣishṭair ádṛitatvena* नाविगीतोऽयमुदीच्यानामाचारः । न च दाक्षिणात्यानां रागमूलत्वं शंकनीयं विधिनिषेधपरीक्षकैरेव तद्विवाहकरणात् । मातृष्वसुः सुताविवाहस्त्वविगीतेन शिष्टाचारेण गर्हितः । मातुलसुताविवाहस्यानुग्राहकाः श्रुत्यादयः । तत्र मंत्रवर्णः । आ याहींद्र पथिभिरीळितेभिर्यज्ञमिमं नो भागधेयं जुषस्व । तृप्तां जहुर्मातुलस्येव योषा भागस्ते पैतृष्वसेयी वपामिवेति ॥

Fol. 201[a]. प्रवरगोत्रयोः समानत्वासमानत्वे बौधायनकात्यायनविश्वामित्रगर्गादिप्रणीतेषु प्रवरग्रंथेषु प्रसिद्धे ।

Fol. 206[a]. *Atha viváhabhedá uchyante.*

---

[1] Gálavena B. s. m. C.

[2] कंमुजा C. Lectionem Vedicam दक्षिणतस्कपर्दे esse, nemo est qui ignoret. Mádhava vocabulum कमुंजा per केशपंक्ति explicat. Cf. Nirṇayasindhu, p. 191.

Fol. 221[a]. *Atha savarṇásavarṇaviváhaprasangena buddhyárúḍhánám anulomajátánáṃ vyavahάropayogisaṃjnápratipattyarthaṃ játibhedo nirúpyate.*

Fol. 224[b]. *Athávaṣishṭá gṛihasthadharmá nirúpyante. Upákarmavidhiḥ.*

Fol. 228[a]. Itthaṃ brahmachárigṛihasthásramau nirúpitau. *Atha vánaprasthásramo nirúpyate.*

Fol. 233[a]. *Atha chaturthásramo nirúpyate.*

Fol. 239[a]. Quatuor mendicorum genera antiqui noverunt: चातुर्विध्यं तु भिक्षूणां हारीत आह । चतुर्विधा भिक्षवस्तु प्रोक्ताः सामान्यलिंगिनः । तेषां पृथक् पृथग्ज्ञानं वृत्तिभेदात्कृतं श्रुतं ॥ कुटीचरो बहूदकश्च हंसश्चैव तृतीयकः । चतुर्थः परमो हंसो यो यः पश्चात्स उत्तम इति ॥ पितामहोऽपि । चतुर्विधा भिक्षवस्तु प्रख्याता ब्रह्मणो मुखात् । कुटीचरो बहूदको हंसश्चैव तृतीयकः । चतुर्थः परमहंसश्च संज्ञाभेदैः प्रकीर्तिता इति ॥ तत्राधिकारिविशेषः पुराणे दर्शितः ॥ विरक्तिर्द्विविधा प्रोक्ता तीव्रा तीव्रतरेति च । सत्यामेव तु तीव्रायां न्यसेद्योगी कुटीचरे ॥ शक्तो बहूदके तीव्रतरायां हंससंज्ञिते । मुमुक्षुः परमे हंसे साक्षाद्विज्ञानसाधन इति ॥

तत्र कुटीचरस्य वृत्तिविशेषमाह प्रजापतिः । कुटीचरो नाम स्वगृहे वर्तमानः सुचिरकलुष आहिताग्निषु भिक्षां भुंजानोऽपगतकामक्रोधलोभमोहोऽहंकारवर्जी तप आत्मानुग्रहं कुरुते ॥ वृद्धपराशरोऽपि । कुटीचरा नाम पुत्रादिभिः कुटीं कारयित्वा कामक्रोधलोभमोहमदमात्सर्यभयादीन्हित्वा विधिवत्संन्यासं कृत्वा त्रिदंडजलपवित्रकाषायवस्त्रधारिणः, स्नानशौचाचमनजपस्वाध्यायब्रह्मचर्यध्यानतत्पराः, पुत्रादेरेव भिक्षाकालेऽन्नं पात्रमात्रमुपयुंजानास्तस्यां कुट्यां नित्यं संत आत्मानं मोक्षयंत इति ॥ स्कंदपुराणेऽपि । कुटीचरश्च संन्यस्य स्वे स्वे सद्मनि नित्यशः । भिक्षामादाय भुंजीत स्वबंधूनां गृहेऽथवा । शिखायज्ञोपवीती स्यात्त्रिदंडी सकमंडलुरिति ॥ कुटीचरत्वस्यायुक्तविषयत्वाद्युक्तो गृहवासादिः । तदुक्तं बौधायनेन । कुटीरकाः परिव्रज्य स्वे स्वे वेश्मनि नित्यशः । भिक्षां बंधुभ्य आदाय भुंजते शक्तिसंक्षयादिति ॥

बहूदकस्य वृत्तिविशेषमाह स्कंदः । बहूदकश्च संन्यस्य बंधुपुत्रादिवर्जितः । सप्तागारं चरेद्भैक्ष्यमेकान्नं च परित्यजेत् ॥ गोवालरज्जुसंबंधं त्रिदंडं शिक्यमुद्धृतं । जलपात्रं पवित्रं च खनित्रीं च कृपाणिकां ॥ शिखां यज्ञोपवीतं च देवताराधनं चरेदिति ॥ वृद्धपराशरोऽपि । तत्र बहूदका नाम त्रिदंडकमंडलुपद्मपवित्रपात्रकाषायवस्त्रधारिणो वेदांतार्थावबोधकाः, साधुवृत्तेषु ब्राह्मणगृहेषु भैक्षचर्यां चरंत आत्मानं मोक्षयंत इति ॥ पितामहोऽपि । बहूदकः स विज्ञेयः सर्वसंगविवर्जितः । बंधुवर्गे न भिक्षेत स्वभूमौ नैव संवसेत् ॥ निश्चलः स्थाणुभूतश्च सदा मोक्षपरायणः । न कुट्यां नोदके संगं कुर्याद्वस्त्रे च चेतसा ॥ नागारे नासने नान्ने नास्तरे च त्रिदंडके । स्वमात्रायां न, कुर्याद्वैराग्यं दंडादिके यतिरिति ॥

हंसवृत्तिः स्कंदपुराणे दर्शिता । हंसः कमंडलुं शिक्यं भिक्षापात्रं तथैव च । कंथां कौपीनमाच्छाद्यमंगवस्त्रं बहिष्पटं ॥ एकं तु वैणवं दंडं धारयन्नित्यमादरात् । देवतानामभेदेन कुर्याद्ध्यानं समर्चयेदिति ॥ विष्णुरपि । यज्ञोपवीतं दंडं च वस्त्रं जंतुनिवारणं । तावान्परिग्रहः प्रोक्तो नान्यो हंसपरिग्रह इति ॥ पितामहोऽपि । हंसस्तृतीयो विज्ञेयो भिक्षुर्मोक्षपरायणः । नित्यं त्रिषवणस्नायी त्वार्द्रवासा भवेत्सदा ॥ चांद्रायणेन वर्तेत यतिधर्मानुशासनात् । वृक्षमूले वसेन्नित्यं गुहायां वा सरित्तट इति ॥ बौधायनोऽपि । हंसाः कमंडलुं शिक्यं दंडं पात्राणि बिभ्रतः । ग्रामतीर्थैकरात्राश्च नगरे पंचरात्रकाः ॥ त्रिषड्रात्रोपवासाश्च पक्षमासोपवासिनः । कृच्छ्रसांतपनाद्यैश्च मंत्रैः कृशवपुर्धरा इति ॥

परमहंसवृत्तिः स्कंदपुराणे दर्शिता ॥ कौपीनाच्छादनं वस्त्रं कंथां शीतनिवारणीं । अक्षमालां च गृह्णीयाद्वैणवं दंडमव्रणं ॥ माधूकरमथैकान्नं[1] परहंसः समाचरेत् । परहंसस्त्रिदंडं च रज्जुं गोवालनिर्मितां । शिखां यज्ञोपवीतं च नित्यं कर्म परित्यजेदिति ॥ Haec ad illustrandam Ásramopanishadem inservient[2].

Fol. 246[b]. *Tad evaṃ chaturvidhaḥ saṃnyáso nirúpitaḥ. Atha taddharmá nirúpyante.*

Fol. 256[b]. *Atha tṛitíyo 'dhyáyaḥ. Ásauchavidhiḥ.*

Fol. 289[b]. *Atha saṃgṛihítasráddhanirṇayaḥ prapanchyate.*

Vol. II. Foll. 241. Adhy. 4. Incipit: आचारकांडनिरूपणाद्येनाध्यायत्रयेण विधिनिषेधौ दर्शितौ । अथेदानीं तदुल्लंघननित्यपातित्यपरिहारोपायप्रतिपादकं प्रायश्चित्तकांडमारभ्यते ॥

Adhy. 5. (inc. fol. 28[a].) Incipit: चतुर्थेऽध्याये प्रकीर्णकपापानां प्रायश्चित्तमभिहितं । तत्र यद्यपि परिवेदनादिकं न प्रकीर्णकमुपपातकेषु पठितत्वात्, यद्यपि च पुत्रभेदादिकथनं न प्रायश्चित्तरूपं, तथापि प्रकीर्णकप्रायश्चित्तस्य बाहुल्यादध्यायार्थत्वमविरुद्धं । तत्राध्यायांते स्वर्गसाधनमनुगमनं वर्णितं । तेन ब्रह्मलोकसाधनमाहिताग्निदहनं बुद्धिस्थं । अतः पंचमाध्याये तद्विवक्षुरादौ प्रायश्चित्तप्रकरणविच्छेदशंकामपनुदन्परिशिष्टं प्रकीर्णकप्रायश्चित्तं तावन्नवभिः श्लोकैराह ॥

6. (fol. 35[a].) Incipit: प्रकीर्णकप्रकाशप्रायश्चित्तप्रसंगागताहिताग्निसंस्कारः पंचमाध्याये निरूपितः । अथ षष्ठाध्याये प्रकृतमेव प्रायश्चित्तमनुवर्तयिष्यमाणो मलिनीकरणसंकीर्णकरणोपपातकानां प्रायश्चित्तानि प्राधान्येन विवक्षुः प्रथमं प्रतिजानीते ॥

7. (fol. 65[a].) Incipit: अत्र रसशुद्धिः षष्ठाध्याये वर्णिता । सप्तमाध्यायेऽवशिष्टानां द्रव्याणां शुद्धिं विवक्षुर्महाप्रकरणप्रायश्चित्तशंकाव्युदासाय प्रतिजानीते ॥

8. (fol. 82[b].) Incipit: सप्तमाध्याये द्रव्यशुद्धिः प्रतिपादिता । तत्रांते शुद्धं समुद्धरेदित्युक्तं । तत्रोद्धारप्रकारः प्रकीर्णकादिप्रायश्चित्तरूपश्चतुर्थाद्यध्यायेषूपवर्णितः । अथावशिष्ट उपवर्णनीयः । षष्ठाध्याये वैश्यं वा क्षत्रियं वापीत्यादिनोपपातकानां प्रायश्चित्तान्युपवर्णयन् बहुवक्तव्यसद्भावादुपपातकविशेषस्य गोवधस्य प्रायश्चित्तं वक्तुमुपेक्षितं । तदिदानीमध्यायद्वयेन विवक्षुरादौ मुनिविप्रतिपत्तिं सूचयितुं पृच्छति ॥

---

[1] मनःसंकल्परहितान्गृहात्त्रिसप्तपंचकात् । मधुवदाहरणं यत्तु (भैक्षं) माधूकरमिति स्मृतं ॥

[2] Haec Upanishad infra Kátyáyanasmṛitis pars esse dicitur. Fol. 254[b]. तत्र चातुर्विध्यं कात्यायनस्मृतिर्व्याचचक्षे । ब्रह्मचारिगृहस्थवानप्रस्थपरिव्राजकाश्चत्वार आश्रमाः etc.

9. (fol. 103^{b}.) Incipit: अष्टमाध्याये गोवधस्य सामान्यप्रायश्चित्तमुपवर्णितं । अथ नवमाध्याये रोधनादिनिमित्तविशेषानुपजीव्य प्रायश्चित्तविशेषा अभिधीयंते ॥

10. (fol. 119^{b}.) Incipit: अष्टमनवमाध्यायोरुपपातकस्य गोवधस्य सामान्यविशेषाभ्यां प्रायश्चित्तानि प्रपंचितानि । अथागम्यागमनस्योपपातकस्य दशमाध्याये प्रायश्चित्तमभिधीयते ॥

11. (fol. 143^{b}). Incipit: दशमेऽध्याये ह्युपपातकविशेषस्यागम्यागमनस्य प्रायश्चित्तमभिधाय तत्प्रसंगाद्गुरुतल्पादीनामपि प्रायश्चित्तमभिहितं । एकादशाध्याये त्वभोज्यभोजनस्य प्रायश्चित्तं प्राधान्येनोपवर्ण्यते ॥

12. (fol. 174^{b}.) Incipit: आचारकांडे त्रिभिरध्यायैर्ये यावंत आचाराः प्रतिपादिताः प्रायश्चित्तकांडे चाष्टभिरध्यायैर्यानि प्रायश्चित्तान्यभिहितानि तेभ्योऽतिरिक्तानां परिशिष्टानां केषांचिदाचाराणां प्रायश्चित्तानां च विधानाय द्वादशाध्यायमारभते ॥

Auctores et libri in capitibus 1–3. a Mádhava hi laudantur: *Angiras* (smṛiti) fol. 66^{b}. etc. *Atri* (smṛiti) 88^{b}. 101^{b}. etc. *Ágneyapuráṇa* 94^{b}. 123^{a}. etc. *Átharvaṇa* 56^{b}. 57^{a}. *Ádipuráṇa* 150^{b}. 209^{a}. etc. *Ádityapuráṇa* 61^{a}. 82^{b}. etc. *Ápastamba* (smṛiti et sútra) 16^{a}. 46^{a}. 60^{a}. etc. *Áruṇiṣruti* 241^{b}. *Áṣvaláyana* (smṛiti et sútra) 110^{b}. 126^{a}. etc. *Ṛishyaṣṛinga* (smṛiti) 186^{b}. 288^{a}. 297^{a}. 328^{b}. *Kaṇva* II, 11^{a}. *Kapila-mata* 238^{b}. *Karmapradípa* 323^{a}. *Kavasha* 285^{a}. *Káṭhaka* 316^{a}. 317^{b}. *Kátyáyana* (smṛiti) 57^{b}. 80^{a}. etc. *Kárshṇájini* (smṛiti) 92^{a}. 123^{b}. 137^{b}. 276^{a}. 327^{b}. *Kálikápuráṇa* 246^{b}. *Káṣyapa* (smṛiti) 207^{b}. 275^{b}. *Kuthumaṣákhá* 56^{b}. *Kúrmapuráṇa* 16^{b}. 21^{b}. etc. *Kaivalyopanishad* 10^{b}. *Kauṣika* (smṛiti) 87^{b}. 90^{a}. *Kaushítakibráhmaṇa* 60^{a}. 243^{b}. *Kratu* (smṛiti) 45^{a}. 280^{a}. *Kshurikopanishad* 10^{b}. *Garuḍapuráṇa* 69^{b}. *Gárgya* (smṛiti) 98^{a}. 225^{a}. etc. *Vṛiddhagárgya* 295^{b}. 330^{a}. *Gálava* (smṛiti) 288^{b}. 327^{a}. *Gítá* 17^{b}. etc. *Gṛihyapariṣishṭa* 111^{b}. 134^{a}. 137^{a}. 182^{b}. 208^{a}. 287^{b}. *Gṛihyapariṣishṭakára* 319^{b}. *Gobhila* (smṛiti et sútra) 87^{b}. 90^{a}. etc. *Gautama* 53^{b}. 56^{a}. etc. *Vṛiddhagautama* 154^{b}. *Ṣlokagautama* 288^{a}. 294^{b}. 298^{b}. 327^{a}. *Chaturviṅṣatimata* 3^{b}. 69^{a}. 91^{b}. 92^{a}. 112^{a}. 134^{a}. 274^{a}. 318^{a} (cf. Shaṭtriṅṣanmata). *Chandrikákára* 296^{b}. *Chyavanasmṛiti* (Vol. II, 10^{a}). *Chhandoga, Chhandogaṣákhá, Chhandogaṣruti, Chhandogá madhuvidyáyám, Chhándogabráhmaṇa* 32^{a}. 70^{a}. 192^{b}. 24^{a}. 60^{a}. *Chhágaleya* 229^{b}. 299^{a}. 315^{b}. *Jamadagni* (smṛiti) 320^{b}. 324^{a}. 326^{a}. *Játúkarṇya* (smṛiti) 260^{a}. 297^{a}. 323^{b}. 326^{a}. *Jábáli* (smṛiti) 91^{b}. 92^{b}. 192^{a}. 233^{a}. 294^{b}. 332^{b}. *Jábáláḥ* 260^{a}. *Jábálaṣruti* 234^{b}. 241^{a}. *Jaimini* (smṛiti) 269^{b}. etc. *Jyotiḥṣástra* 99^{a}. *Tápaníyopanishad, Uttaratápaníya* 192^{b}. 31^{b}. 34^{b}. *Taittiríyabráhmaṇa* 60^{a}. 101^{b}. 120^{b}. *Taittiríyopanishadvyákhyáne* bháshyakáravárttikakárábhyám pratipáditam 15^{b}. 32^{a}. *Daksha* (smṛiti) 82^{b}. 84^{b}. *Devala* (smṛiti) 56^{a}. 61^{a}. etc. *Devasvámin* 296^{b}. 297^{b}. 301^{a}. *Dharma* 318^{a}. *Dhaumya* (smṛiti) 295^{b}. *Nandikeṣvarapuráṇa* 131^{b}. *Nárada* (smṛiti) 52^{b}. 70^{b}. 113^{b}. 155^{b}. 158^{b}. etc. *Náráyaṇa* (smṛiti) 104^{b}. 106^{a}. 307^{a}. 320^{a}. 323^{b}. *Nṛisiṅhapuráṇa* 92^{a}. 128^{a}. 143^{b}. 234^{a}. etc. *Padmapuráṇa* 85^{a}. *Paramahaṅsopanishad* 245^{a}. *Vṛiddha-Paráṣara* 46^{a}. 82^{b}. 83^{b}. 239^{b}. *Pariṣishṭa* 134^{a} (cf. Gṛihya°). *Páraskara* (smṛiti et sútra) 181^{a}. etc. *Pitámaha* 83^{a}. 240^{b}. 244^{b}. *Pippaládaṣruti* 242^{b}. 244^{b}. *Puráṇasára* 23^{b}. 41^{b}. 64^{a}. 88^{b}. 118^{a}. 142^{b}. 222^{b}. *Pulastya* (smṛiti) 93^{a}. 98^{a}. 106^{b}. 149^{b}. 259^{b}. 276^{a}. 296^{a}. etc. *Paiṭhínasi* 53^{b}. 125^{b}. 147^{a}. 195^{b}. etc. *Prachetas* (smṛiti) 84^{b}. 99^{a}. 136^{a}. 140^{a}. etc. *Bṛihat-Prachetas* 269^{b}. *Prajápati* 54^{a}. 55^{b}. 57^{b}. 93^{a}. 109^{a}. etc. *Prapanchasára* 10^{a}. *Prabhákara* 50^{a}. *Prábhákarás* 27^{b}. *Bahvṛichabráhmaṇa* 246^{a}. *Bahvṛichopanishad* 31^{a}. *Bádaráyaṇasútra* 30^{b}. *Bṛihaspati* 24^{a}. 64^{b}. 102^{b}. 111^{b}. etc. *Vṛiddha-Bṛihaspati* 306^{a}. *Baijavápa* 181^{a}. 187^{b}. 313^{b}. 318^{a}. *Baudháyana* (smṛiti et sútra) 49^{a}. 57^{b}. 61^{a}. etc. *Vṛiddha-Baudháyana* II, 239^{a}. *Brahmagarbha* 268^{a}. *Brahmanirukta* 315^{a}. *Brahmapuráṇa* 43^{b}. 62^{a}. 93^{b}. etc. *Brahmáṇḍapuráṇa* 70^{b}. 82^{a}. *Bhaṭṭácharya* 4^{a}. *Bharadvája* (smṛiti) 67^{a}. 71^{a}. 81^{a}. 84^{b}. 103^{b}. 112^{a}. 113^{b}. *Bhavishyapuráṇa* 114^{b}. *Bhavishyottara* 65^{a}. etc. *Bháṭṭáḥ* (phil.) 27^{a}. *Bhṛigu* (smṛiti) 87^{a}. 93^{a}. 187^{a}. 332^{a}. *Matsyapuráṇa* 36^{b}. etc. *Madálasá* 56^{b} (नित्यं नैमित्तिकं काम्यं त्रिविधं पौरुषमिति मदालसोक्तेः). 163^{a}. 322^{a} (तथा च मदालसावाक्यं । ततस्त्वाचमनार्थाय दद्याच्चापः सकृत्सकृदिति). *Manu* 54^{a}. etc. *Bṛihanmanu* 269^{a}. 277^{b}. *Vṛiddhamanu* 65^{b}. 100^{b}. 102^{a}. 149^{b}. *Maríchi* (smṛiti) 81^{b}. 97^{a}. 106^{b}. etc. *Mahábhárata* 65^{b}. etc. *Márkaṇḍeya* (smṛiti) 183^{b}. 194^{a}. etc. *Márkaṇḍeyapuráṇa* 59^{a}. etc. *Mudgala* 297^{a} (a Játúkarṇya laudatur). *Medhátithi* 4^{a}. 96^{b}. etc. *Maitraṣákhá* 34^{a}. 42^{a}. *Maitrávaruṇaṣruti* 242^{a}. *Yajnapárṣva* 317^{a}. *Yama* (smṛiti) 44^{a}. 64^{a}. etc. *Laghu-Yama* 320^{b}. *Yájnavalkya* 22^{b}. etc. *Vṛiddha-Yájnavalkya* 89^{b}. 286^{b}. *Yogasútrabháshya*, Vyásae tributum 11^{a}. *Rámáyaṇa* 169^{a}. *Laingapuráṇa* 29^{b}. 120^{b}. etc. *Laugákshi* (smṛiti) 181^{a}. 183^{a}. *Vatsa* (smṛiti) 207^{a}. *Vasishṭha* (smṛiti) 52^{a}. 56^{a}. 61^{a}. etc. *Vṛiddha-Vasishṭha* 66^{b}. 134^{a}. 290^{a}. *Vahnipuráṇa* 61^{b}. *Vájasaneyabráhmaṇa* 60^{b}. *Vájaseneyiṣákháyám Vanṣabráhmaṇe* 3^{b} (= Bṛihadár.). *Vámanapuráṇa* 99^{a}. 113^{b}. 235^{b}. *Váyupuráṇa, Váyavíyasaṃhitá* 16^{b}. 188^{a}. 323^{a}. *Váráhapuráṇa* 169^{b}. 305^{b}. *Várttikakára* (Kum.) 17^{b}. *Vivasvat* (smṛiti) 81^{b}. *Viṣvarúpácharya* várttike 16^{a}. *Viṣvámitra* (smṛiti) 107^{a}. 190^{a}. 290^{a}. *Vishṇu* (smṛiti) 67^{a}. 87^{b}. *Vishṇudharmottara* 62^{a}. 64^{a}. 69^{b}. 146^{a}. 290^{b}. etc. *Vishṇupuráṇa* 142^{b}. etc. *Vaikhánasasútra* .... *Vyághra* 269^{a}. etc. *Vyághrapád* vel *Vyághrapáda* (smṛiti) 83^{b}. 88^{b}. 94^{b}. 123^{b}. 271^{a}. *Vyása* (smṛiti) 53^{a}. 64^{b}. etc. *Ṣankha* (smṛiti) 86^{b}. 90^{b}. 94^{a}. etc. *Vṛiddha-Ṣankha* (smṛiti) 85^{a}. 88^{b}. *Ṣankha-Likhitau* 67^{b}. 84^{a}. 123^{a}. 169^{b}. 183^{a}. etc. *Ṣambhu* 314^{b}. *Ṣátyáyani* 294^{a}.

294^{b}. 328^{b}. *Ṣátátapa* (smṛiti) 62^{a}. 65^{a}. etc. *Vṛiddha-Ṣátátapa* 320^{a}. *Ṣivadharma* 66^{a}. *Ṣivadharmottara* II, 237^{b}. *Ṣivasvámin* 326^{b} (नवश्राद्धानि पंचाहुराश्वलायनशाखिनः। आपस्तंबाः षडित्याहुर्विभाषामैत्तरेयिणः). etc. *Ṣunaḥpucha* 287^{b}. *Ṣailálibráhmaṇa* 110^{a}. *Ṣaivapuráṇa* 132^{a}. 178^{b}. *Ṣaivágama* 47^{a}. *Ṣaunaka* (smṛiti) 92^{a}. 95^{b}. 107^{b}. 111^{a}. etc. *Ṣvetáṣvataropanishad*, *Ṣvetáṣvataraṣákhá* 10^{b}. 31^{a}. 23^{a}. *Shaṭtriṅṣanmata* 85^{b}. 86^{b}. 100^{b}. 156^{a}. 267^{a}. 275^{a}. *Saṃvarta* (smṛiti) 64^{b}. 69^{b}. 108^{a}. 181^{b}. etc. *Saṃgraha-kára* 97^{b}. 186^{b}. 204^{a}. 262^{a}. 275^{b} (cf. Smṛitisaṃgraha). *Satyavrata* (smṛiti) 94^{a}. 125^{a}. 126^{a}. 313^{b}. *Sánkhyáyana* (gṛihyasútra) 79^{b}. 181^{a}. *Sumantu* (smṛiti) 60^{b}. 196^{b}. 295^{a}. etc. *Suṣruta* (med.) 310^{a}. *Skandapuráṇa* 30^{a}. etc. *Smṛitisaṃgraha* 330^{a}. 332^{b}. *Hárita* (smṛiti) 49^{a}. 52^{b}. 55^{a}. etc.

Voluminis prioris folia 1–274. seculo sexto decimo, folia 275–332. anno 1703 exarata sunt. Volumen alterum circiter annum 1760 transscriptum est. (WALKER 172, 173.)

638, 639.

Volumina duo. Lit. Bengal. Charta Ind. Vol. I. foll. 250. Vol. II. foll. 321. Long. 10½. Lat. 3½. Linn. Vol. I. et II. foll. 1–173. 6. reliquorum 7.

Paráṣarasmṛitivyákhyá Mádhavíyá. (B.)

Vol. I. Adhy. I. fol. 119^{b}; II. fol. 173^{b}; III. fol. 250^{b}. Haec pars a secunda manu satis accurate emendata est.

Vol. II. Adhy. IV. fol. 16^{a}; V. fol. 19^{b}; VI. fol. 35^{a}; VII. fol. 46^{a}; VIII. fol. 60^{a}; IX. fol. 71^{a}; X. fol. 88^{b}; XI. fol. 111^{a}; XII. fol. 173^{a}.

Sequitur inde a folio 174^{a}. usque ad fol. 303^{b}. lectio tertia decima, eidem *Mádhavae* tributa, qua jus civile tractatur. Incipit: वागीशाद्याः etc. व्याख्याते आचारप्रायश्चित्ते। अथ व्यवहारः प्रस्तूयते। यद्यप्यृणादानादीनामष्टादशपदानां व्यवहाराणां मध्ये कमपि व्यवहारं पराशरो न व्युत्पादितवान्। तथाप्याचारकाण्डे चतुर्णां वर्णानां क्रमेण चाचारान् ब्रुवन्। क्षत्रियस्तु प्रजाश्चैव क्षितिं धर्म्मेण पालयेदित्यस्मिन्वचने क्षत्रियविशेषस्य राजाचारविशेषमवोचत् क्षितिं धर्म्मेण पालयेदिति।

Denique in foliis 304–321. initium commentarii ad librum primum repetitur. Desinit in verbis: यावज्जीवाशौचंवाक्यं च निन्दापरत्वेन व्याख्येयं। पराशरवचो यथेत्यनेन स्वमतं विशदपर मतांतरे

Haec volumina hoc seculo ineunte exarata sunt. (MILL 129, 130.)

640.

Lit. Devan. Charta Europ. Foll. 104. Long. 12½. Lat. 8½. Linn. 24.

उद्धर्षय उद्गतहर्षान् कुरु हे मघवन्नायुधानि । उत्सत्वनां । उद्धर्षय च सत्वनां सत्वानां मनुष्याणां मामकानां मदीयानां मनांसि । उद्धर्षय हे मघवन्वाजिनामश्वानां वाजिनानि वेजनवस्थानि । चंचलत्वमश्वस्य गुणः । उद्रथानां च जयतां यंतु घोषाः । उद्यंतु च त्वत्प्रसादाद्रथानां च जयतां ये घोषाः शब्दाः ॥१०॥

ऋस्माकमिंद्रः । ऋस्माकं तावत्समृतेषु संगतेषु ध्वजेषु शत्रुवलध्वजलोलीभूतेष्विंद्रो रक्षिता भवतु । इंद्रप्रसादादेवास्माकं या इषवस्ता जयंतु । ऋस्माकं च वीरा उत्तरे विजयिनो भवंतु । ऋस्माँ उ । विनिग्रहार्थीय उकारः । ऋस्मानेव हे देवा ऋवत रक्षत हवेष्वाह्वानेषु ॥११॥

ऋप्वा देवता । सा च पुनर्व्याधिर्वा भयं वा यस्मादेतया विद्धो व्याप्तोऽपवीयते तया लक्ष्यमाणस्तस्मादप्वा । ऋपशब्दांत्याकारलोपः । वेतेरुत्तरः । ऐंद्र्योऽभिरूपा द्वादश भवंतीति श्रुतेरियमपींद्रसेनासंबंधिनी । ऋमीषां शत्रुबलसंबंधिनां मनुष्याणां चित्तं चित्तानीति । विभक्तिव्यत्ययः । प्रतिलोभयंती । लुभ विमोहने । विमोहयमाना गृहाण शत्रूणामंगानि । हे ऋप्वे ततः परेहि । परागच्छ । परतराञ्छत्रून् ग्रहीतुमतो भूयोभूयःकरणेनैतानेव शत्रूनभिप्रेहि । निर्दह चैषां हृदयानि शोकैः । यथांधेनाध्यानलक्षणेनामित्रास्तमसा सचंतां तमसा संसेव्यंतां तमसा संश्लिष्यंतां ॥१२॥

द्वादशैंद्र्यः समाप्ताः । पृथग्विनियोगमंत्राः ॥

ऋवसृष्टा । इषुदेवत्यानुष्टुप् । ऋवसृष्टा निक्षिप्ता परापत परागच्छ हे शरव्ये । शरमयीषुः शरव्या । हे ब्रह्मसंशिते ब्रह्मणा मंत्रेणाभिमंत्र्यातितरां तीक्ष्णीकृते गच्छ । परापत गच्छेत्यतिशयार्थमेकार्थयोराख्यातयोर्द्विर्वचनं । ऋमित्रान् प्रपद्यस्व । मामीषाममित्राणां कं चनोच्छिषः । उच्छेषयः । उद्धृतमूलान् कुर्वित्यभिप्रायः ॥१३॥

प्रेत । योद्धृन् स्तौति । ऋनुष्टुप् । हे नरो मनुष्याः प्रेत । प्रगच्छत । जयत च । इंद्रश्च वः शर्म शरणं परित्राणं यच्छतु । ददातु । उग्रा उद्गूर्णायुधा वो युष्माकं संतु बाहवः । ऋनाधृष्या ऋप्रधृष्या यथा यूयमसथ भवथ तथोग्रा वः संतु बाहव इत्यनुषंगः ॥१४॥

ऋसौ या । मारुती त्रिष्टुप् । ऋसौ या सेना हे मरुतः परेषां शत्रूणामभ्येति ऋभ्यागच्छति नोऽस्मान् प्रति ऋोजसा बलेन स्पर्धमाना तां सेनां गूहत व्याप्नुत तमसापव्रतेन । व्रतमिति कर्मनाम । ऋपगतकर्मणा । येन तमसा व्याप्तानां नश्यंति कर्माणि तदपव्रतं तमस्तेनापव्रतेन तमसा वा गूहत । यथामी ऋन्यो ऋन्यं न जानन् यथामी सैनिका ऋन्योऽन्यं परस्परं न जानीयुः ॥१५॥

यत्र बाणाः । लिंगोक्तदेवताः । पंक्तिः । यत्र बाणा इषवः संपतंति निर्मर्यादं । कथमिव । कुमारा विशिखा इव । यथा कुमारा ऋदृष्टपरिकारिणो विगतशिखाः सर्वमुंडास्तंतमर्थं संनिपतेयुरेवं संपतंति । तत्र । तत्रेत्यर्थः (?) । नोऽस्माकमिंद्रः शर्म शरणं यच्छतु ददातु । वृहस्पतिः शर्म यच्छतु । ऋदितिः शर्म यच्छतु । विश्वाहा सदाकालं शर्म यच्छत्विंद्रो वृहस्पतिरदितिः ॥१६॥

मर्माणि ते । लिंगोक्तदेवता । त्रिष्टुप् । कवचं प्रयच्छति । मर्माणि ते तव वमर्णा कवचेन छादयामि । सोमश्च राजा त्वाममृतेनानुवस्तां । ऋाच्छादयतु । किंच जयंतं च त्वामनुमदंतु उत्साहयंतु देवाः ॥१७॥

Haec voluminis pars anno 1587 exarata est. (MILL 75.)

725.

Foll. 29–35. Linn. 7. His foliis *Devísúktam*, *Rátrísúktam*, *Lakshmísúktam* continentur, qui hymni notissimi Ṛigvedae carminibus appenduntur. Incipit: ऋोँ नमःश्चण्डिकायै ऋोँ ऋहं रुद्रेभिरित्यष्टर्चसूक्तस्य वागाम्भृणि ऋषिः etc.

Haec folia hoc seculo ineunte exarata sunt. (WILSON 426[e].)

726.

Lit. Devan. Foll. 5. Lin. num. 9.

Hujus codicis folia 62–67. *Sauram*, i. e. preces, quibus Sol colitur, continent. Constat hymnis ex Ṛigveda excerptis. Initio hymnorum auctores, metrum, distichorum numerus (Anukramaṇiká) recensentur, sequuntur hymni ipsi accentibus notati. Sunt ii:

उदु त्यं Rv. I, 50, 1. 13 disticha. चित्रं देवानां Rv. I, 115, 1. 6 disticha. इंद्रं मित्रं Rv. I, 164, 46. 47. 2 disticha. हंसः शुचिषत् Rv. IV, 4, 5. 1 distichon. यस्त्वा सूर्य Rv. V, 40, 5. 1 distichon. यदद्य सूर्य Rv. VII, 60, 1. 1 distichon. उत्सूर्यो Rv. VII, 62, 1. 3 disticha. उद्वेति Rv. VII, 63, 1. 4 disticha. उदु त्यद्दर्शतं Rv. VII, 66, 14. 3 disticha. बण्महाँ ऋसि Rv. VIII, 90, 11. 2 disticha. नमो मित्रस्य Rv. X, 37, 1. 12 disticha. सूर्यो नो दिवस्पातु Rv. X, 158, 1. 5 disticha. विभ्राड् Rv. X, 170, 1. 4 disticha. ऋायं गौः Rv. X, 189, 1. 3 disticha.

Finitur opusculum disticho:

नमः सवित्रे जगदेकचक्षुषे जगत्प्रसूतिस्थितिनाशहेतवे ।
त्रयीमयाय त्रिगुणात्मधारिणे विरिंचिनारायणशंकरात्मने ॥

Libellus anno 1788 accurate exaratus est. (WILSON 394[b].)

727.

Foll. 287–304. *Ádityahṛidayastotramantras,* Solis orientis colendi ritus et preces, a Krishṇa cum Arjuna communicatae. Incipit: ओं अस्य श्रीसवितासूर्यनारायणकवचस्तोत्रमंत्रस्य ब्रह्मा ऋषिः etc. Praemissa *lorica* libellus, disticha 154. continens, ab his versibus incipit: अर्जुन उवाच ॥ ज्ञानं च धर्मशास्त्राणां गुह्याद्गुह्यतरं तथा । मया कृष्ण परिज्ञातं वाङ्मयं सचराचरं ॥१॥ सूर्यस्तुतिमयं न्यासं वक्तुमर्हसि माधव । भक्त्या पृच्छामि देवेश कथयस्व प्रसादतः ॥२॥ सूर्यभक्तिं करिष्यामि कथं सूर्यं प्रपूजयेत् । तदहं श्रोतुमिच्छामि त्वत्प्रसादेन यादव ॥३॥ श्रीभगवानुवाच ॥ रुद्रादिदैवतैः सर्वैः पृष्टेन कथितं मया । वक्ष्ये हं कर्मविन्यासं शृणु पांडव यत्नतः ॥४॥

Subscriptione quidem libellus e Bhavishyottarapuráṇa excerptus esse dicitur. De exemplaribus Berolinensibus cf. Weber Catal. p. 351. (WILSON 531g.)

728.

Foll. 326b–328. *Dattátreyáshṭottaraṣatanámastotram,* Dattátreyae centum et octo nomina, caput ex omnifaria farragine illa, vulgo Brahmáṇḍapuráṇa appellata, prolatum. Incipit: ओं अस्य श्रीदत्तात्रेयाष्टोत्तरशतनामस्तोत्रमंत्रस्य ब्रह्मा विष्णुमहेश्वर ऋषिः । श्रीदत्तात्रेयो भगवान् देवता ममाभीष्टसिद्ध्यर्थे जपे विनियोगः ॥ etc. अनुसूयासुतो देवो अत्रीपुत्रो महामुनिः । योगींद्रपुण्यपुरुषो देवेशो जगदीश्वरः ॥२॥

Haec nomina distichis 20. absolvuntur. (WILSON 531l.)

729.

Foll. 211–214. Linn. 11. *Bhairavastotram,* Bhairavae colendi ritus et preces, e *Rudrayámala* desumtae. Incipit: ओं मेरुपृष्ठे सुखासीनं । देवदेवं त्रिलोचनं । शंकरं परिपप्रछ । पार्वती परमेश्वरं ॥१॥ श्रीपार्वत्युवाच ॥ भगवन्सर्वधर्मज्ञः । सर्वशास्त्रागमादिषु ॥ आपदुद्धारणं मंत्रं । सर्वसिद्धिप्रदं नृणां ॥२॥ सर्वेषां चैव भूतानां । हितार्थं वांछितं मया ॥ विशेषतस्तु राज्ञां वै । शांतिपुष्टिप्रसाधनं ॥३॥ अंगन्यासकरन्यास । देहन्याससमन्वितं । वक्तुमर्हसि देवेश । मम हर्षविवर्द्धनं ॥४॥

Praemissis Tántrikorum formulis, Bhairavae centum et octo nomina traduntur.

Haec folia medio seculo superiore exarata sunt. (WALKER 129g.)

730.

Foll. 226–237. *Gaṇapatistotráṇi,* Gaṇeṣae colendi preces, e variis fontibus derivatae.

a. Foll. 226–228b. *Ekáksharagaṇapatikavacham* e *Rudrayámala* sumtum. Incipit: नमस्तस्मै गणेशाय । सर्वविघ्नविनाशिने । कार्यारंभेषु सर्वेषु पूज्यते यः सुरैरपि ॥१॥ श्रीदेव्युवाच ॥ भगवान् देवदेवेश । लोकानुग्रहकारकः । त्वत्प्रसादाद्गणेशस्य । श्रुतः पूजाविधिर्मया ॥२॥ इदानीं श्रोतुमिच्छामि । कवचं परमेश्वरः । एकाक्षरस्य मंत्रस्य त्वयामीतेन चेतसा ॥३॥

b. Fol. 228b. *Gaṇapatyárádhanam,* Kankolae vati tributum.

c. Foll. 229a–232a. *Gaṇapatistavarája.* Incipit: ओँ ओँ ओँकारवोजं ब्रह्मविनि च परं ब्रह्मरूपं तुरीयं.

d. Fol. 232a–232b. *Sachchidánandastotram* e *Sanatkumárasaṃhitá* excerptum. Incipit: गजवदनमचिंत्यं तीक्ष्णदंतं त्रिनेत्रं । बृहदुदरमशेषं भूतराजं पुराणं ।

e. Foll. 232b–233b. *Gaṇeṣabhujangaprayátastotram.* *Ṣankaráchâryae* tributum, distichis octo constans. Incipit: ओँ रणं रणं रणं रणं कणत्क्षुद्रघंटाकणद्भूषणं । भुजाकंकणैः शोभितं धूम्रकेतुं । गले हारमुक्तावलीशोभितं तं । नमो ज्ञानरूपं गणेशं नमस्ते ॥१॥

f. Foll. 233b–237b. *Vakratuṇḍastotram,* Vyásae tributum. Haec pars a numero *c.* leviter tantum differt. Incipit: श्री ओँ अस्य वक्रतुंडमंत्रस्य वेदव्यास ऋषि, etc. (WALKER 129i.)

731.

Foll. 296–315. *Rámagítá* (Rámae carmen) continent. Incipit: गणेशं कमलानाथं प्रणिपत्य गुरोः पदं । करिष्ये (shye) रामगीतायां व्याख्यानं बालवृद्धये ॥१॥ Neque tamen carminis commentarius, sed carmen ipsum, disticha 75. continens, sequitur. Distt. 2–63. ex Adhyátmarámáyaṇa desumta sunt (Uttarakáṇḍa, sarga 5). Ráma coram Lakshmaṇa summum bonum relictis operibus in meditando numine positum esse exponit: तस्मात्त्यजेत्कार्यमशेषतः सुधीर्विद्याविरोधान (n na) समुच्चयो भवेत् । आत्मानुसंधानपरायणः सदा निवृत्तसर्वेंद्रियवृत्तिगोचरः ॥१९॥ Quae Vedántica opinio ad Rámae cultum deflectitur: यावन्न पश्येदखिलं मदात्मकं तावन्मदाराधनतत्परो भवेत् । श्रद्धालुरत्यूर्जितभक्तिलक्षणो यस्तस्य दृश्योऽहमहर्निशं हृदि ॥५२॥ भातयेदिदं परि दृश्यते जगत् मायैव सर्वं परिहृत्य चेतसा । मद्भावनाभावितशुद्धमानसः सुखी भवानंदमयो निरामयः ॥६१॥ Quae post dist. 63. sequuntur, Brahmaṇi deo tribuuntur, et sollennem carminis panegyricum continent. (MILL 112g.)

732.

Foll. 317–346. *Rámamantrapaṭalam,* Rámae adorandi libellum, continent. Et preces et ceremoniae ad Rámae cultum pertinentes traduntur, quae mutatis mutandis cum solitis Indorum orthodoxorum formulis consentiunt. Praeter Rámánujam, Nímánujam, Mádha-

váchâryam in particula इति दशलक्षणवैष्णवाः inscripta septem alii sectae Vishṇuiticae praeceptores occurrunt, eorumque sedes nuncupantur. Quae nomina exscripsissem, nisi codicis conditio prohibuisset. Formula, qua votum concipitur, in fine haec datur: ओं अद्य श्रीब्रह्मणो द्वितीयपरार्द्धे श्रीश्वेतवाराहकल्पे अष्टाविंशतितमे कलौ युगे जंबुद्वीपे भारतखंडे आर्यावर्ते वैवस्वतमन्वंतरे । अमुकमासे । अमुकपक्षे । अमुकवासरे । अमुकनक्षत्रे । अमुकतिथौ अमुकक्षेत्रे ॥ श्रीरामप्रीत्यर्थं स्नानमहं करिष्येति संकल्पः ॥ Pict. VIII. homo in pelle tigrina sedens et ritus sacros agens repraesentatur. Ante eum vasa ad perficiendas ceremonias necessaria disposita sunt, a tergo minister flabellum tenens adstat. (MILL 112h.)

733.

In foll. 348–384. *Srírámapaddhatis*, Rámae colendi rituale, inest, *Rámánujae* auctori tributum. Incipit: ओं गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुर्देवमहेश्वरः । गुरुरेव परं ब्रह्म तस्मै श्रीगुरवे नमः ॥ Et ceremoniae et preces, quibus Ráma quotidie adorandus est, describuntur. Pleraque cum Rámamantrapaṭala consentiunt, attamen hic noster libellus haud dubie antiquior est. Subscriptio haec: इति श्रीमद्रामानुजाचार्यकृतं श्रीरामपद्धतिवेदोक्तं संपूर्णम् ॥ (MILL 112i.)

734.

Lit. Devan. Charta Ind. Foll. 80. Long. 10. Lat. 6. Linn. 9.

Mantrarahasyaprakáṣiká, quo libro *Nílakaṇṭhas*, Govindae filius, aliquot Ṛigvedae versuum interpretatione, Vedam ad Kṛishṇam solum referendum esse probavit[1]. Opus in capita quatuor divisum est. Initium, paulum emendatum, hoc:

सत्यज्ञानमनंतं यत्तद्विष्णोः परमं पदं ।
प्राप्तुं मंत्रेषु गोपालविष्णोः कर्माणि पश्यत ॥१॥

'ननु सत्यादिलक्षणमखंडैकरसं विष्णोः परमपदं । तत्राविद्यावद्विषयाणि कर्माणि न संभवंति । नितरां क्रियापराणां मंत्राणां तत्प्रकाशनपरत्वं । नितरां तत्कर्मावगत्या परमपदप्राप्तिः संभवतीत्ययोग्योऽयं नियोग' इति चेत् । सत्यं । संति परमात्मनः पंच रूपाणि भूबीजांकुरतरुफलोपमानि शुद्धशबलविराड्विष्णुदेवतासंज्ञानि ॥ etc.

Specimini hi capitis secundi versus inservient: तदिदं हरिवंश उपबृंहितं । वृकभयाद्वृंदावनं प्रति गोकुलाद्गोपाला गता इति । तत्र गत्वा गवां लालनं करोतीत्यृषिराह । सूयवसादिति ।

सूयवसाद्भगवती हि भूया
अथो वयं भगवंतः स्याम ।
अद्धि तृणमघ्न्ये विश्वदानीं
पिब शुद्धमुदकमाचरंती ॥२॥

एकवचनं जात्यभिप्रायं । सुष्ठु शोभनं तृणमत्तीति सूयवसात् । भगवत्यैश्वर्यवती हि प्रसिद्धमस्मभ्यं भूयाः । भव ॥ अथो वयमपि भगवंतः स्याम । अद्धि भक्षय तृणं । पुनरुक्तिरादरार्था । अघ्न्ये अद्य विश्वदानीं सर्वदाचरंती पर्यटंती शुद्धमुदकं पिब ॥

कालियदमनमाह । दासपत्नीरिति ।

दासपत्नीरहिगोपा अतिष्ठ-
न्निरुद्धा आपः पणिनेव गावः ।
अपां बिलमपिहितं यदासी-
द्वृत्रं जघन्वाँ अप तद्ववार ॥३॥

दस्यंत्युपक्षीयंते लोका अनेनेति दासो हिंस्रः । तस्य पत्नीरिव पत्नीः सहधर्मचारिणीर्हिंस्रविषदूषिता अतिष्ठन् । आसन् ॥ यतोऽहिः कालियाख्यः सर्पः । गोपयतीति गोपाः स्वामी यासां ता अहिगोपाः । अत एव निरुद्धा इतराभोगाः । पणिना चोरवृंदेन गाव इव निरुद्धाः । अपां मध्ये बिलमहिगृहस्य द्वारं यदपिहितमद्भिरेवाछादितमासीत् तद्वृत्रं जघन्वान्छत्रुं जिगमिषुः । हंतिरत्र गत्यर्थः । अपववार । अपावृणोत् । उद्घाटितवान् । तीरस्थं तरुमारुह्यात्युच्चस्थानाद्यमुनायां निपत्य कालियमभ्यभूदित्यर्थः ॥

ततश्च किमभूदित्याह ।

अपादहस्तो अपृतन्यदिंद्र-
मास्य वज्रमधि सानौ जघान ।
वृष्णो वध्रिः प्रतिमानं बुभूष-
न्पुरुत्रा वृत्रो अशयद्व्यस्तः ॥४॥

अपात्पादहीनोऽहस्तो हस्तहीनः सर्पत्वादेवेदृशोऽपींद्रं कृष्णं प्राप्यापृतन्यत् । अयुध्यत् । तेन सह युद्धं कृतवान् । अस्य कालियस्य सानौ मूर्धनि वज्रमाजघान । भगवत्पदचिह्नभूतं शिरस्याजगाम । तदंकितं शिरोऽभूदित्यर्थः । सोऽयं । वध्रिश्चर्मपट्टिका । तत्सदृशनिस्तेजाः कालियो वृष्णो हरेः प्रतिमानं प्रतिचिह्नं वज्ररेखारूपं बुभूषन्भूषामिवात्मनः कुर्वन्नशयत् । शयनं चकार । निरुद्यमोऽभूत् । कीदृशः । पुरुत्रा व्यस्तोऽनेकैः प्रकारैर्निरस्तः ॥

नदं न भिन्नममुया शयानं
मनो रुहाणा अति यंत्यापः ।
याश्चिद्वृत्रो महिना पर्यतिष्ठ-
त्तासामहिः पत्सुतःशीर्बभूव ॥५॥

नदं न शोणादिकं नदमिव शयानं दीर्घाकारेण पतितं यतोऽमुयानेन कृष्णेन भिन्नं निर्जितमनु पश्चादापो यमुनाजलान्यतियंति अत्युत्कर्षेण

---

[1] यत्किंचिद्दैवतो मंत्रो विष्णुलीलोपबृंहितः । वैष्णवः स, यतो विष्णुः सर्वदैवतनामभृत् ॥ fol. 3a.

गच्छंति । कीदृश्यः । मनो रुहाणाः । हृदयंगमा इत्यर्थः । या अपश्चित्पूर्वं वृतः कालियो महिना माहात्म्येन पर्यतिष्ठत् परिभूयासीत् तासामेव संनिधौ त्राणार्थं वा अहिः कालियः पत्सुतः । पद्भ्यां पीडितः सञ्छेत इति पत्सुतःशीः । समासेऽपि विभक्त्यलोप आर्षः । एवंविधो बभूव ॥

अथ खराकारं धेनुकं व्रजनाशायोद्यतमभिलक्ष्य लोको राममाह ।

सर्मिंद्र गर्द॒भं मृ॑ण नु॒वंतं॑ पा॒पया॑मु॒या ।
आ तू न॑ इंद्र शंसय॒ गोष्वश्वे॑षु शु॒भ्रिषु॑
स॒हस्रे॑षु तुवीमघ ॥६॥

हे इंद्र ईश्वर त्वं गर्दभं संमृण । सम्यङ् नाशय । कीदृशं । अमुयानया त्वत्प्रत्यक्षया पापया कृपणया (kripayá MS.) खरतन्वा नुवंतं पीडयंतं । धातूनामनेकार्थत्वात्कर्णाटकभाषाप्रसिद्धेश्च नुवतिरत्र पीडार्थः । पापयामुयेत्युभयत्र सुपो याः ॥ हे इंद्र तु पुनर्नोऽस्मान्गवादिष्वाशंसय । यथा लोकेऽस्मानभिलक्ष्य तादृशो गोपालोऽहं भूयासमिति जन आशास्ते तथास्मान्कुर्वित्यर्थः । शुभ्रिषु शुभ्ररूपवत्सु सहस्रेष्वनंतेषु ॥ तुवीनि पूर्णानि मघानि धनानि यस्मिन्निति तुवीमघः । दैर्घ्यं सांहितिकं । एवमुक्तमात्रे रामस्तं जघानेति ज्ञेयं ॥

अथ गोपरूपिणा प्रलंबासुरेण ह्रियमाणो राम आह ।

न वि जा॑नामि य॒दि॑वे॒दमस्मि॑
नि॒ण्यः संन॑द्धो मन॑सा चरामि ।
य॒दा मार्गं॒न्प्रथम॒जा ऋ॒तस्या-
दिद्वा॒चो अ॑श्नुवे भा॒ग॒म॒स्याः ॥७॥

इवशब्दो भिन्नक्रमः । यदिदमपरिमितशक्तिकं ब्रह्मास्मि तदहं न जानामि । कुदेहावेशात्प्रमाद्यतीति न्यायेन जानन्नपि न जानामीत्यर्थः । त्वदनुग्रहं विना स्वीयमैश्वर्यमाविर्भावयितुं न शक्नोमीति भावः । कुत एवं । मनसा बंधनेन संनद्धो बद्धः पारवश्यं प्रापितः । अत एव निण्यः परप्रणेयः सञ्चरामि । यदा काले मा ऋतस्य वेदस्य प्रथमजाः कारणभूतपरमात्मागन् आगच्छेत् तदादस्मादस्यानुग्रहं प्राप्य इत् निश्चितमस्या वाचः सकाशाद्भागं । भगं नि (?) विद्यतेऽस्मिन्निति भागः परमात्मा । तमश्नुवे । व्याप्नुयां । तं गुरुं प्राप्य तत्त्वमसिवाक्यस्यार्थमैकात्म्यं लभेयमित्यर्थः ॥

Tales igitur nugas recentioris aevi homines pro Vedarum interpretatione venditabant.

I. Gokulakáṇḍa fol. 27[a]; II. vṛindávanakáṇḍa fol. 53[a]; III. akrúrakáṇḍa fol. 73[b]; IV. mathurákáṇḍa fol. 80[b].

In fine capitum haec subscriptio legitur: इति पदवाक्यप्रमाणमर्यादाधुरंधरचतुर्धरवंशावतंसगोविंदसूरिसूनोः श्रीनीलकंठस्य कृतौ स्वोद्धृतमंत्रभागवतव्याख्यायां मंत्ररहस्यप्रकाशिकायां etc.

Codex exeunte seculo septimo decimo exaratus est. (WALKER 211.)

735.

Lit. Bengal. Charta Ind. Foll. 31. Long. 11. Lat. 3. Linn. 5.

Continetur hoc codice *Úrdhvámnáyasaṃhitá,* quo libello, in duodecim capita diviso, sectae Vaishṇavae cujusdam principia traduntur. Caput primum, paulum emendatum, hoc: कदाचित्सुखमासीनं नारदं मुनिसत्तमं । पप्रच्छ नियतो भूत्वा व्यासो लोकनमस्कृतः ॥१॥ महामुने कथय मे विष्णुभक्तिमनुत्तमां । गुरुभक्तिं च कार्त्स्न्येन अवतारगुणांस्तथा ॥२॥ सृष्टिप्रलयकालांश्च महामंत्रांस्तथैव च । तुलसीमाहात्म्यमखिलं गंगामाहात्म्यमेव च ॥३॥ देवध्यानं गुरुध्यानं गुरुदेवार्चनं तथा । गयामाहात्म्यमखिलं माहात्म्यं वैष्णवं तथा ॥४॥ श्रीनारद उवाच ॥ हंत ते कथयिष्यामि यत्पृष्टोऽहं त्वयानघ । *úrdhvámnáya* iti khyáto *grantho* yatra hi vartate ॥५॥ न तत्र दुर्भिक्षभयं न च मारीभयं तथा । स्थिरा लक्ष्मीर्भवेत्तत्र स्थिरो नारायणस्तथा ॥६॥ पुत्रपौत्रविवृद्धिश्च कीर्तिवर्धनमेव च । भक्त्युद्रेककरो ग्रंथो महापातकनाशकृत् ॥७॥ सर्वाधर्मान्दहत्याशु तुलाराशिमिवानलः । वैष्णवायैव ग्रंथोऽयं दातव्यो नान्यभाजिने ॥८॥ पशुहिंसारतायैव ग्रंथो न प्रीतिकारकः । यथा पंके गतो ब्रह्मन्मणिर्दीप्तिं न चाश्रयेत् ॥९॥ छागं यो हंति तं हंति छागो भूत्वा च खड्गभृत् । सुरथं परलोके हि पशवो जघ्नुरित्युत ॥१०॥ यो मांसं खादति नरो दुरात्मा व्याधरूपकः । नरकं याति दुष्टात्मा यावदाभूतसंप्लवं ॥११॥ गुरुर्विष्णुर्गुरुर्देवो गुरुरेव गतिः परा । गुरोरुच्छिष्टममृतं पवित्रं परमं मतं ॥१२॥ गुरोश्चरणतोयं च गंगातोयसमं स्मृतं । गुरोरग्रे नृत्यगीतं प्रलापं च विवर्जयेत् ॥१३॥ देवे क्रुद्धे गुरुस्त्राता गुरौ क्रुद्धे न कश्चन । पशुहिंसा न कर्तव्या यदीच्छेच्छ्रेय आत्मनः[1] ॥१४॥ asvamedhe *pishṭamayo* 'ṣvaḥ káryo na tu jívakaḥ । जीवहिंसा नरकदा तस्माद्यत्नाद्विवर्जयेत् ॥१५॥ उत्सर्गकर्ता यो हंता यो धर्ता यश्च विक्रयी । अनुमंता च पुरुषः सर्वे नरकगामिनः ॥१६॥ राजोपरिचरो नाम वैष्णवः सर्वपूजितः । साक्षित्वेन तमातस्थुर्वैष्णवाश्च सुरास्तथा ॥१७॥ वैष्णवा ऊचुः ॥ किं जीवपशवो हिंस्या उत पिष्टमयास्तथा । सत्यं ब्रूहि महाराज मा मिथ्या ब्रूहि भारतीं ॥१८॥ अश्वमेधसहस्रं च सत्यं च तुलया धृतं । अत्यरिच्यत सत्यं च इति वेदविदो विदुः ॥१९॥ मांसाभिलाषिणो देवा इन्द्राद्याः पशुघातनं । साधु मन्यंत इति ते, वैष्णवा नैव साध्विति ॥२०॥ राजोपरिचरो नाम वैष्णवः शीलसन्मतः । कूठसाक्षित्वमापन्नो जीवो हिंस्य इति ब्रुवन् ॥२१॥ पशुहिंसा प्रकर्तव्या इति राजावदद्यदा । तदा च वैष्णवैरुक्तं धिग्धिगित्यसकृत्तथा ॥२२॥ त्वं यथा वैष्णवो भूत्वा मिथ्यावाक्यमुदीरयन् । पशुहिंसानुमंता हि तस्मान्नरकमाप्नुहि ॥२३॥ वैष्णवानामभिशापाद्राजोपरिचरः पुरा । रौरवं नरकं प्राप्तः पशुघाती कथं सुखी ॥२४॥

इत्यूर्ध्वाम्नायसंहितायां गुरुभक्तिकथनं नाम प्रथमोऽध्यायः ॥

श्रीनारद उवाच ॥ *úrdhvenaisha mukhenaiva* kathito grantha uttamaḥ । devadevena rudreṇa *úrdhvámnáya* iti smṛitaḥ ॥ 1 ॥

[1] यदीश्रोत्रयमात्मनः MS.

Cap. 2. avatáradvádaşakírtanam; 3. gauramantroddháraḥ; 4. tulasímáhátmyavarṇanam; 5 (fol. 13[a]). gangámáhátmyam; 6. gurudevamanupújanam; 7. náráyaṇastavaḥ; 8. gayámáhátmyam; 9. kárttikamásamáhátmyam; 10 (fol. 26[b]). vaishṇavavargagaṇanam; 11. vaishṇavavárasaṃkhyápújá; 12. aparádhakathanam.

Codex post annum 1810 exaratus est. (WILSON 317.)

736.

Foll. 14–20. *Náráyaṇagítá*, quo libello, disticha 159. continente, *Nílakaṇṭhas* sectae a Rámánanda conditae principia exposuit. Initium, erroribus gravissimis sublatis, hoc: येनोक्ताद्वचनात्प्रसन्नमनसा सद्यः समाधौ नृणां योगाभ्यासमृतेऽपि भक्तिममलां स्वस्मिन्दृढं कुर्वतां । यद्रूपं च निजस्वरूपममलं साक्षात्स्फुरत्यर्कवत्तं ध्यायामि नरं पुरातनमुनिं नारायणं चात्मनि ॥१॥ भक्त्या नमाम्यहं श्रीमद्रामानंदमुनिं गुरुं । नारायणोदितं यस्मादवापं धर्मसंग्रहं ॥२॥ एकदा सुखमासीनं साक्षान्नारायणं प्रभुं । शिष्या रामानंदमुनिमुख्याः पप्रच्छुरादरात् ॥३॥ शिष्या ऊचुः ॥ भगवन्सर्वभूतानां त्वमेव परमा गतिः । स्वाश्रितानां विशेषेण त्वं गुरुश्चेश्वरो ह्यसि ॥४॥ अतस्त्वामाश्रितानां nas *tyáginám̩ grihiṇám̩* tathá । *stríṇám̩ chápi* प्रभो ब्रूहि धर्माञ्छ्रेयःप्रसाधकान् ॥५॥ स्वृष्यादिरूपेण पुरा त्वया धर्मा ह्यनेकशः । प्रोक्ताः संति च तद्ग्रंथा अप्यनेके त्वया कृताः ॥६॥ तथापि कालवेगेन मंदबुद्ध्यल्पकायुषां । नराणां ते तु दुर्ज्ञेया दुष्कराश्च भवंति वै ॥७॥ तस्मादावश्यकांस्तेषां सारभूतान्हितावहान् । धर्मास्त्वं ज्ञानवैराग्यभक्तिभिः सहितान्वद ॥८॥ कृतेन कर्मणा येन प्रसन्नस्त्वं भवेः प्रभो । कर्मणा येन नैष्कर्म्यं सिध्येत्तच्चापि नो वद ॥९॥ इति पृष्टः स भगवान्निजशिष्यैः कृपानिधिः । वेदादीनां सारभूतान्धर्मानाह सनातनान् ॥१०॥ श्रीनारायण उवाच ॥ शृण्वंतु मामकाः सर्वे *purushá yoshitas* tathá । रामानंदमुने त्वं च धर्मान्वच्मि हितावहान् ॥११॥ श्रुतिस्मृतिपुराणेषु सेतिहासेषु विस्तरात् । धर्मा निरूपिताः संति गृहिणां त्यागिनां तथा ॥१२॥ तेषां सारं समुद्धृत्य सर्वेषां वो हितावहं । वच्मि संक्षेपतो युक्तं ज्ञानवैराग्यभक्तिभिः ॥१३॥ ब्राह्मे मुहूर्त उत्थाय निशायाः प्रहरेऽंतिमे । मद्भक्तैः कीर्तनीयानि मम नामानि नित्यदा ॥१४॥ मद्भक्तानां च नामानि कीर्तनीयानि, तैरहं । अव्यग्रमानसैर्ध्येयो मुहूर्तं वैकनाडिकां ॥१५॥ नमस्कारं ततः कृत्वा साष्टांगं हृदयेऽथ मां । स्मरद्भिः शुद्धहृदयैः कर्तव्या दैहिका क्रिया ॥१६॥ स्नानं संध्या जपो होमः स्वाध्यायः पितृतर्पणं । देवतापूजनादीनि नित्यं कार्याणि च द्विजैः ॥१७॥ स्नानं च मानसीं पूजामकृत्वा प्रत्यहं मम । सर्वैरन्नं न भोक्तव्यं विना रोगादिपीडितात् ॥१८॥ रसासक्तिर्न कर्तव्या सर्वैः सर्वत्र सर्वदा । यथाकालं यथालब्धं भोज्यमन्नं फलादि वा ॥१९॥ यो यत्र मुख्यो हि भवेद्भोजयित्वा स चापरान् । स्वयं भुंजीत मद्भक्तः पंक्तिभेदं च नाचरेत् ॥२०॥ एकादशीषु सर्वासु मज्जन्मदिवसेषु च । शिवरात्र्यां च नैवान्नं भोक्तव्यं मदुपाश्रितैः ॥२१॥ मद्भक्तैर्मद्यमांसस्य पलांडोर्लशुनस्य च । भंगागंजतमालादेः कार्यः स्पर्शोऽपि न क्वचित् ॥२२॥ यत्र स्वुश्चावतारा मे शास्त्रेषु स्थापितास्तथा । मद्भक्त्या सहितं ज्ञानमध्येतव्यानि तानि वै ॥२३॥ सांख्यशास्त्रं योगशास्त्रं श्रव्यं च सुधियो मुखात् । न त्वंतः शत्रुदग्धस्य मद्भक्तस्य कर्हिचित् ॥२४॥ ज्ञानेऽपि निर्गुणे यत्र न स्यान्नारायणस्य मे । स्थापनं दिव्यरूपस्य तन्न श्रव्यं कदाचन ॥२५॥ युक्ताया नियमैः सर्वैः प्राप्ताया ब्रह्मणि स्थितिं । अपि स्त्रियो मुखान्नैव ज्ञानं श्रव्यं हि पूरुषैः ॥२६॥ गेयं यशो मम सदा मदीयानां च भक्तितः । संगः सतां सदा कार्यो मदभक्तस्य न क्वचित् ॥२७॥

In fine hi versus leguntur: यो वै श्रुतो भगवतो रामानंदगुरोमुखात् गीतार्थस्तु स एवायं पद्यैः सग्रथितो मय १५७ शकाब्देऽब्धाक्षिवाहज्वै प्रमीते शुक्लवत्सरे श्रावणस्याऽसिताष्टम्यां कृतेयं गुरुवासरे १५८॥ इति श्रीनीलकंठेन रचित ब्रह्मचारिणा श्रीनारायणगीतैषा समाप्तिमगमच्छुभा १५९॥ Disticho 158. annus 1799 exprimitur, ad quam aetatem homo, ex Rámánandae ipsius ore se doctrinam accepisse tradens, vix pervenerit. Equidem corruptelam in voce वाह latere puto, cujus loco an बाण legendum sit, ii videant, quibus alii codices praesto sunt.

Haec folia hoc seculo ineunte exarata sunt. (WILSON 337[b].)

737.

Foll. 24–28. Charta Europ. Linn. 8, 9.

A. Foll. 24, 25. Disticha pauca nescio unde desumta, quorum initium hocce: क्षुधा तृषा भयं द्वेषो रागो मोहश्च चिंतनं जरा रुजा च मृत्युश्च स्वेदः खेद मदो रतिः विस्मयो जननं निद्रा विषादो ष्टादश ध्रुवाः त्रिजगत्सर्वभूतानां दोषाः साधारणा इमे यतैर्दोषैर्विनिर्मुक्तः सो यमाप्तो निरंजनः परमेष्ठी परं ज्योतीर्विरागो विमलः कृती ॥

B. Foll. 26–28. Incipit:

य: पुण्यः पुरुषोत्तमो हरिहरः शंभुः स्वयंभूर्विभुः
विष्णुर्जिष्णुमहेश्वरांकमहितः स्थाणुः पुराणो च्युतः
सर्वज्ञः सुगतो जितः पशुपतिः तीर्थंकरः शंकरः
सिद्धो बुद्ध उमापतिर्जिनपतिः पायादपायात्स वः ॥

Cui disticho, ita ut dicam, pandaemoniaco commentarius additus est. Incipit: अस्यार्थः पद्यमिदमर्थोपयामः यो भगवान् पुण्य शुभस्वरूपो वा धर्मस्वरूपो वा etc.

Haec folia post annum 1820 exarata sunt. (WILSON 426[cd].)

O. MEDICINA (VAIDYASASTRA).

738, 739.

Volumina duo. Lit. Devan. Charta Ind. Long. 11. Lat. 4½. Linn. 8–11.

Suṣrutasaṃhitá, medicinae Indicae systema, *Suṣrutae* auctori tributum. Textus Calcuttae annis 1835, 1836 editus est.

Vol. I. Foll. 183. Sútrasthánam, Nidánasthánam.

Vol. II. Foll. 186. Ṣárírasthánam, Chikitsásthánam, Kalpasthánam.

Hi codices anno 1826 exarati sunt. (Wilson 289, 290.)

740.

Lit. Devan. Charta Europ. Foll. 59. Long. 11½. Lat. 9.

Foll. 1–9. Tertii *Suṣrutae* libri (ṣárírasthánae) lectionis primae pars, cum commentario.

Textus inde a अथातः सर्वभूतचिंताशारीरं व्याख्यास्यामः। usque ad स एष कर्मपुरुषश्चिकित्साधिकृतः। (ed. Calc. I, p. 312) continuatur.

Commentarius incipit: हेतुलक्षणप्रतिपादकान्निदानस्थानादधिगतव्याधिहेतुलक्षणस्य वैद्यस्य चिकित्सावसरः। चिकित्सा चाधिष्ठानविशेषज्ञानमंतरेण न संभवतीत्यधिष्ठानज्ञापनाय शारीरस्थानमारभ्यते। शारीरस्थाने पि प्रतिपाद्ये आदौ सर्वशरीरकारणानां भूतानामेव चिंता कर्त्तुं युज्यत इत्याह॥

Haec voluminis pars post annum 1813 exarata est. (Wilson 292[a].)

741, 742.

Volumina duo. Lit. Devan. Charta Ind. Long. 13. Lat. 5. Linn. 9.

Ashṭángahṛidayasaṃhitá, octo medicinae partium collectio, quo opere *Vágbhaṭas*, Saṃghaguptae[1] filius, totius medicinae systema libris sex, lectionibus 120, exposuit. Incipit: रागादिरोगान् सततानुषक्तानशेषकायप्रसृतानशेषान्। औत्सुक्यमोहारतिदान् जघान यो पूर्ववैद्याय नमो स्तु तस्मै॥१॥ अथात आयुःकामीयमध्यायं व्याख्यास्यामः इति ह स्माहुरात्रेयादयो महर्षयः। आयुः कामयमानेन धर्मार्थसुखसाधनम्। आयुर्वेदोपदेशेषु विधेयः परमादरः॥२॥ ब्रह्मा स्मृत्वायुषो वेदं प्रजापतिमजिग्रहत्। सो श्विनौ तौ सहस्राक्षं सोऽत्रिपुत्रादिकान् मुनीन्॥३॥ ते ग्निवेशादिकांस्ते तु पृथक् तंत्राणि तेनिरे। तेभ्योऽतिविप्रकीर्णेभ्यः प्रायः सारतरोच्चयः॥४॥ क्रियते ष्टांगहृदयं नातिसंक्षिप्तविस्तृतम्। कायवालग्रहोर्ध्वांगशल्यदंष्ट्राजरावृषान्॥५॥ अष्टावंगानि तस्याहुश्चिकित्सा येषु संश्रिता। वायुः पित्तं कफश्चेति त्रयो दोषाः समासतः॥६॥

Vol. I. Foll. 169. Libb. I–III.

Liber I. *Sútrasthána*, foll. 1–86, capita 30. continet. Capite primo auctor terminos technicos generales et argumentum libri proponit. 2. Incipit: Atháto *dinacharyádhyáyam* vyákhyásyámaḥ. ब्राह्मे मुहूर्त्ते उत्तिष्ठेत्स्वस्थो रक्षार्थमायुषः। शरीरचिंतां निर्वर्त्य कृतशौचविधिस्ततः॥१॥ प्राङ्मुखः मुखमासीनो दंतप्रक्षालनाय वै। अर्कन्यग्रोधखदिरकरंजककुभादिजम्। (कनीन्यग्रसमस्थौल्यं प्रगुणं द्वादशांगुलम्॥२॥ विज्ञातवृक्षं क्षुण्णाग्रमृजुग्रंथि सुभूमिजम्)[2] प्रातर्भुक्त्वा च मृद्वग्रं कषायकटुतिक्तकम्॥३॥ भक्षयेदंतपवनं दंतमांसान्यबाधयन्। लिखेदनुसुखं जिह्वां जिह्वानिर्लेखनेन च॥४॥ De diaeta quotidiana praecepta, quibus moralia quaedam adjunguntur: सुखार्थाः सर्वभूतानां मताः सर्वाः प्रवृत्तयः। सुखं च न विना धर्मात्तस्माद्धर्मपरो भवेत्॥३३॥ भक्त्या कल्याणमित्राणि सेवेतेतरदूरगः। हिंसास्तेयान्यथाकामं पैशुन्यं परुषानृतं॥३४॥ संभिन्नालापं व्यापादमभिध्यां दृग्विपर्ययं। पापं कर्मेति दशधा कायवाङ्मानसैस्त्यजेत्॥३५॥ अवृत्तिव्याधिशोकार्त्तानानुवर्तेत शक्तितः। आत्मवत्सततं पश्येदपि कीटपिपीलिकं॥३६॥ अर्चयेद्देवगोविप्रवृद्धवैद्यनृपातिथीन्। विमुखान्नार्थिनः कुर्यान्नावमन्येत नाक्षिपेत्॥३७॥ उपकारप्रधानः स्यादपकारपरेऽप्यरौ। संपद्विपत्स्वेकमना हेतावीर्ष्येत्फले न तु॥३८॥ काले हितं मितं ब्रूयादविसंवादि पेशलं। पूर्वाभिभाषी सुमुखः सुशीलः करुणामृदुः॥३९॥ नैकः सुखी न सर्वत्र विश्रब्धो न च शंकितः। न कंचिदात्मनः शत्रुं नात्मानं कस्यचिद्रिपुं॥४०॥ प्रकाशयेन्नावमानं न च निःस्नेहतां प्रभोः। जनस्याशयमालक्ष्य यो यथा परितुष्यति॥४१॥ तं तथैवानुवर्तेत पराराधनपंडितः। न पीडयेदिंद्रियाणि न चैतान्यतिलालयेत्॥४२॥ त्रिवर्गशून्यं नारंभं भजेत्तं चाविरोधयन्। अनुयायात्प्रतिपदं सर्वधर्मेषु मध्यमं॥४३॥ 3. Atháta *ṛitucharyádhyáyam* vyákhyásyámaḥ. मासैर्द्विसंख्यैर्माघाद्यैः क्रमात् षडृतवः स्मृताः। (शिशिरोऽथ वसंतश्च ग्रीष्मवर्षाशरद्धिमाः।) शिशिराद्यैस्त्रिभिस्तैस्तु विद्यादयनमुत्तरं॥१॥ आदानं च तदादत्ते नृणां प्रतिदिनं बलं। तस्मिन्नत्यर्थतीक्ष्णोष्णरूक्षा मार्गस्वभावतः॥२॥ आदित्यपवनाः सौम्यान्क्षपयंति गुणान्भुवः। तिक्तः कषायः कटुको बलिनोऽत्र रसाः क्रमात्॥३॥ 4. Atháto *rogánutpádaníyam* adhyáyaṃ vyákhyásyámaḥ. वेगान्न धारयेद्वातविण्मूत्रक्षवतृट्क्षुधां। निद्राकासश्रमश्वासजृंभाश्रुछर्दिरेतसां॥१॥ अधोवातस्य रोधेन गुल्मोदावर्तरुक्क्लमाः। वातमूत्रशकृत्संगदृष्ट्यग्निवधहृद्गदाः॥२॥ शकृतः पिंडिकोद्वेष्टप्रतिश्यायशिरोरुजः। मुखेन विट्प्र-

---

[1] Patris nomen, subscriptionibus tantum librorum traditum, nonnunquam *Sinhagupta* scribitur.

[2] Quae uncis inclusi, ab Aruṇadatta, Mṛigánkadattae filio, cujus ad librum primum commentario (E. I. H. 985.) usus sum, non explicantur, isque scholiasta etiam in reliquis partibus breviorem et antiquiorem operis recensionem in manibus videtur habuisse.

वृत्तिश्च पूर्वोक्ताश्चामयाः स्मृताः ॥३॥ 5. Atháto *dravadravyavijnáníyam* a. v. जीवनं तर्पणं हृद्यं ह्लादि वुद्धिप्रवोधनं । तन्वव्यक्तरसं मृष्टं शीतं लघ्वमृतोपमं ॥१॥ गंगांवु नभसो भ्रष्टं स्पृष्टं त्वर्केंदुमारुतैः । हिताहितत्वे तद्भूयो देशकालावपेक्षते ॥२॥ येनाभिवृष्टममलं शाल्यन्नं राजते स्थितं । अक्लिन्नमविवर्णं वा तत्तोयं गांगमन्यथा ॥३॥ सामुद्रं तन्न पातव्यं मासादाश्वयुजाद्विना । ऐंद्रमंवु सुपात्रस्थमविपन्नं सदा पिवेत् ॥४॥ 6 (fol. 17^{a}). Atháto *'nnasvarúpavijnáníyam* a. v. रक्तो महान्सकलमस्तूर्णकः शकुनाहृतः[1] । सारामुखो दीर्घशूको रोध्रशूकः सुगंधिकः ॥१॥ पतंगास्तपनीयाश्च ये चान्ये शालयः शुभाः । स्वादुपाकरसाः स्निग्धा वृष्या वद्धाल्पवर्चसः ॥२॥ 7. Atháto *'nnarakshávijnáníyam* a. v. राजा राजगृहासन्ने प्राणाचार्यं निवेशयेत् । सर्वदा संभवत्येवं सर्वत्र प्रतिजागृविः ॥१॥ अन्नपानं विषाद्रक्षेद्विशेषेण महीपतेः । योगक्षेमौ तदायत्तौ धर्माद्यास्तन्निवंधनाः ॥२॥ ओदनो विषवान्सांद्रो यात्यविस्राव्यतामिव । चिरेण पच्यते पक्को भवेत्पर्युषितोपमः ॥३॥ 8. Atháto *mátráṣitíyam* a. v. मात्राशी सर्वकालं स्यान्मात्रा ह्यग्नेः प्रवर्तिका । मात्रां द्रव्याण्यपेक्षंते गुरूण्यपि लघून्यपि ॥१॥ गुरूणामर्धसौहित्यं लघूनां नातितृप्तता । मात्रा प्रमाणं निर्दिष्टं सुखं यावद्विजीर्यति ॥२॥ भोजनं हीनमात्रं तु न वलोपचयौजसे । सर्वेषां वातरोगाणां हेतुतां च प्रपद्यते ॥३॥ अतिमात्रं पुनः सर्वानाशु दोषान्प्रकोपयेत् । पीड्यमाना हि वाताद्या युगपत्तेन कोपिताः ॥४॥ आमेनान्नेन दुष्टेन तदेवाविश्य कुर्वते । विष्टंभयंतोऽलसकं च्यावयंतो विसूचिकां ॥५॥ 9. Atháto *dravyádivijnáníyam* a. v. द्रव्यमेव रसादीनां श्रेष्ठं ते हि तदाश्रयाः । पंचभूतात्मकं तत्तु क्ष्मामधिष्ठाय जायते ॥१॥ अंवुयोन्यग्निपवननभसां समवायतः । तन्निर्वृत्तिविशेषश्च व्यपदेशश्च भूयसा ॥२॥ तस्मान्नैकरसं द्रव्यं भूतसंघातसंभवात् । नैकदोषास्ततो रोगास्तत्र व्यक्तो रसः स्मृतः ॥३॥ अव्यक्तोऽनुरसः ॥ 10. Atháto *rasabhedíyam* a. v. क्ष्मांभोग्निक्ष्मांवुतेजःखवाय्वग्न्यनिलगोनिलैः । द्वयोल्वणैः क्रमाद्भूतैर्मधुरादिरसोद्भवः ॥१॥ तेषां विद्याद्रसं स्वादुं यो वक्त्रमुपलिंपति (anulimpati Aruṇad.) । आस्वाद्यमानो देहस्य ह्लादनोऽक्षप्रसादनः ॥२॥ प्रियः पिपीलिकादीनाम्, अम्लः क्षालयते मुखं । हर्षणो रोमदंतानामक्षिभ्रुवनिकोचनः ॥३॥ लवणः स्यंदयत्यास्यं कपोलगलदाहकृत् । तिक्तो विशदयत्यास्यं रसनां (Schol. rasanam) प्रतिहंति च । उद्वेजयति जिह्वाग्रं कुर्वंश्चिमिचिमां कटुः ॥४॥ स्रावयत्यक्षिनासास्यं कपोलौ दहतीव च । कषायो जडयेज्जिह्वां कंठस्रोतोविवंधकृत् ॥५॥ 11 (fol. 36^{a}). Atháto *doshádivijnáníyam* a. v. दोषधातुमला मूलं सदा देहस्य, तं *chalaḥ* । उत्साहोच्छ्वासनिःश्वासचेष्टावेगप्रवर्तनैः ॥१॥ सम्यग्गत्या च धातूनामक्षाणां पाटवेन च । अनुगृह्णात्यविकृतः *pittam* पक्त्यूष्मदर्शनैः ॥२॥ क्षुत्तृड्रुचिप्रभामेधाधीशौर्यतनुमार्दवैः । *ṣleshmá* स्थिरत्वस्निग्धत्वसंधिवंधक्षमादिभिः ॥३॥ प्रीणनं जीवनं लेपः स्नेहो धारणपूरणे । गर्भोत्पादश्च धातूनां श्रेष्ठं कर्म क्रमात्स्मृतं ॥४॥ 12. Atháto *doshabhedíyam* a. v. पक्काशयकटीसक्थिश्रोत्रास्थिस्पर्शनेंद्रियं । स्थानं *vátasya* तत्रापि पक्काधानं विशेषतः ॥१॥ नाभिरामाशयः स्वेदो लसीका रुधिरं रसः । दृक् स्पर्शनं च *pittasya* नाभिरत्र विशेषतः ॥२॥ उरःकंठशिरःक्लोमपर्वाण्यामाशयो रसः । मेदो घ्राणं च जिह्वा च *kaphasya* सुतरामुरः ॥३॥ 13. Atháto *doshopakramaṇíyam* a. v. वातस्योपक्रमः स्नेहः स्वेदः संशोधनं मृदु । स्वाद्वम्ललवणोष्णानि भोज्यान्यभ्यंगमर्दनं ॥१॥ वेष्टनं त्रासनं सेको मद्यं पैष्टिकगौडिकं । स्निग्धोष्णा वस्तयो वस्तिनियमः सुखशीलता ॥२॥ दीपनैः पाचनैः सिद्धाः स्नेहाश्चानेकयोनयः । विशेषान्मेध्यपिशितरसस्तैलानुवासनं ॥३॥ 14. Atháto *dvividhopakramaṇíyam* a. v. उपक्रम्यस्य हि द्वित्वाद्द्विधैवोपक्रमो मतः । एकः संतर्पणस्तत्र द्वितीयश्चापतर्पणः ॥१॥ वृंहणो लंघनश्चेति तत्पर्यायावुदाहृतौ । वृंहणं यद्बृहत्त्वाय लंघनं लाघवाय यत् ॥२॥ 15. Athátaḥ *ṣodhanádigaṇíyam* a. v. मदनमधुकलंवानिंवविंवीविशालात्रपुसकुटजमूर्वादेवदालीकृमिघ्नं । विदुलदहनचित्राः कोशवत्यौ करंजः कणलवणवचैलाः सर्षपाश्छर्दनानि ॥१॥ 16 (fol. 49^{b}). Athátaḥ *snehavidhim* a. v. गुरुशीतसरस्निग्धमंदसूक्ष्ममृदुद्रवं । औषधं स्नेहनं प्रायो विपरीतं विरूक्षणं ॥१॥ सर्पिर्मज्जा वसा तैलं स्नेहेषु प्रवरं मतं । तत्रापि चोत्तमं सर्पिः संस्कारस्यानुवर्तनात् ॥२॥ माधुर्यादविदाहित्वाज्जन्माद्येव च शीलनात् । पित्तघ्नास्ते यथापूर्वमितरघ्ना यथोत्तरं ॥३॥ 17. Athátaḥ *svedavidhim* a. v. स्वेदस्तापोपनाहोष्मद्रवभेदाच्चतुर्विधः । तापोऽग्नितप्तवसनफालहस्ततलादिभिः ॥१॥ उपनाहो वचाकिण्वशताह्वादेवदारुभिः । धान्यैः समस्तैर्गंधैश्च रास्नैरंडजटामिषैः ॥२॥ 18. Atháto *vamanavirechanavidhim* a. v. कफे विदध्याद्वमनं संयोगे वा कफोल्वणे । तद्वद्विरेचनं पित्ते, विशेषेण तु वामयेत् ॥१॥ नवज्वरातिसाराधःपित्तासृग्राजयक्ष्मिणः । कुष्ठमेहापचीग्रंथिश्लीपदोन्मादकासिनः ॥२॥ श्वासहृल्लासवीसर्पस्तन्यदोषोर्ध्वरोगिणः ॥ 19. Atháto *vastividhim* a. v. वातोल्वणेषु दोषेषु वाते वा वस्तिरिष्यते । उपक्रमाणां सर्वेषां सोऽग्रणीस्त्रिविधश्च सः ॥१॥ nirúho, 'nvásanaṃ, vastir uttaras. तेन साधयेत् । गुल्मानाहखुडप्लीहशुद्धातीसारशूलिनः ॥२॥ जीर्णज्वरप्रतिश्यायशुक्रानिलमलग्रहान् । वर्ध्माश्मरीरजोनाशान्दारुणांश्चानिलामयान् ॥३॥ 20. Atháto *nasyavidhim* a. v. ऊर्ध्वजत्रुविकारेषु विशेषान्नस्यमिष्यते । नासा हि शिरसो द्वारं तेन तद्व्याप्य हंति तान् ॥१॥ 21 (fol. 63^{a}). Atháto *dhúmapánavidhim* a. v. जत्रूर्ध्वकफवातोत्थविकाराणामजन्मने । उच्छेदाय च जातानां पिवेद्धूमं सदात्मवान् ॥१॥ स्निग्धो मध्यः स तीक्ष्णश्च वाते वातकफे कफे । योज्यो न पित्तरक्तार्तिविरिक्तोदरमेहिषु ॥२॥ तिमिरोर्ध्वानिलाध्मानरोहिणीदत्तवस्तिषु । मत्स्यमद्यदधिक्षीरक्षौद्रस्नेहविषाशिषु ॥३॥ 22. Atháto *gaṇḍúshádividhim* a. v. चतुःप्रकारो गंडूषः स्निग्धः शमनशोधनौ । रोपणश्च त्रयस्तत्र क्रमाद्योज्याश्चलादिषु ॥१॥ 23. Atháta *áṣchyotanáñjanavidhim* a. v. सर्वेषामक्षिरोगाणामादावाश्चोतनं हितं । रुक्तोदकंडूघर्षाश्रुदाहरागनिवर्हणं ॥१॥ उष्णं वाते कफे कोष्णं तच्छीतं

[1] Schol. शकुनाहृतो यो मगधेषु वुद्धोत्पादकाले उत्तरकुरुभ्यो हंसैरानीतो मृगारिमात्रा वैशाखाख्यया वापितो विस्तरं गतः । सारामुखः कृष्णशूकः ॥

रक्तपित्तयोः । निवातस्थस्य वामेन पाणिनोन्मील्य लोचनं ॥२॥ शुक्तौ प्रलंबयान्येन पिचुवर्त्या कनीनके । दश द्वादश वा विंदून्द्व्यंगुलादवसेचयेत् ॥३॥ ततः प्रमृज्य मृदुना चैलेन कफवातयोः । अन्येन कोष्णपानीयप्लुतेन स्वेदयेन्मृदु ॥४॥ 24. Athátas *tarpaṇapuṭapákavidhim* a. v. नयने ताम्यति स्तब्धे शुष्के रूक्षेऽभिघातिते । वातपित्तातुरे जिह्मे शीर्णपक्ष्माविलेक्षणे ॥१॥ कृच्छ्रोन्मीलसिराहर्षसिरोत्पाततमोऽर्जुनैः । स्यंदमंथान्यतोवातवातपर्यायशुक्रकैः ॥२॥ आतुरे शांतरागाश्रुशूलसंरंभदूषिके । निवाते तर्पणं योज्यं शुद्धयोर्मूर्धकाययोः ॥३॥ 25. Atháto *yantravidhim* a. v. नानाविधानां शल्यानां नानादेशप्रबाधिनां । आहर्तुमभ्युपायो यस्तद्यंत्रं यच्च दर्शने ॥१॥ अर्शोभगंदरादीनां शस्त्रक्षाराग्नियोजने । शेषांगपरिरक्षायां तथा वस्त्यादिकर्मणि ॥२॥ घटिकालाबु शृंगं च जांबवौष्ठादिकानि च । अनेकरूपकार्याणि यंत्राणि विविधान्यतः ॥३॥ विकल्प्य कल्पयेद्बुद्ध्या ॥ 26 (fol. 71[a]). Athátaḥ *ṣastravidhim* a. v. षड्विंशतिः सुकर्मारैर्घटितानि यथाविधि । शस्त्राणि रोमवाहीनि बाहुल्येनांगुलानि षट् ॥१॥ सुरूपाणि सुधाराणि सुग्रहाणि च कारयेत् । अकरालानि सुध्मातसुतीक्ष्णावर्तितेऽयसि ॥२॥ समाहितमुखाग्राणि नीलांभोजच्छवीनि च । नामानुगतरूपाणि सदा संनिहितानि च ॥३॥ 27. Athátaḥ *sirávyadhavidhim* a. v. मधुरं लवणं किंचिदशीतोष्णमसंहतं । पद्मेंद्रगोपहेमाविशशलोहितलोहितं ॥१॥ लोहितं प्रभवं शुद्धं तनोस्तेनैव च स्थितिः ॥ 28. Athátaḥ *ṣalyáharaṇavidhim* a. v. वक्रर्जुतिर्यगूर्ध्वाधः शल्यानां पंचधा गतिः । ध्यामं शोफरुजावंतं स्रवंतं शोणितं मुहुः ॥१॥ अभ्युन्नतं बुद्बुदवत्पिटकोपचितं व्रणं । मृदुमांसं च जानीयादंतःशल्यं समासतः ॥२॥ 29. Athátaḥ *ṣastrakarmavidhim* a. v. व्रणः संजायते प्रायः पाकाच्छ्वयथुपूर्वकात् । तमेवोपचरेत्तस्माद्रक्षन्पाकं प्रयत्नतः ॥१॥ सुशीतलेपसेकास्रमोक्षसंशोधनादिभिः ॥ 30. Athátaḥ *kshárágnikarmavidhim* a. v. सर्वशास्त्रानुशास्त्राणां क्षारः श्रेष्ठो बहूनि यत् । छेद्यभेद्यादिकर्माणि कुरुते विषमेष्वपि ॥१॥ दुःखावचार्यशस्त्रेषु तेन सिद्धिमयात्सु च । अतिकृच्छ्रेषु रोगेषु यच्च पानेऽपि युज्यते ॥२॥[1]

Liber II. *Ṣarírasthána*, foll. 87–117, sex capitibus constat. 1. Atháto *garbhávakrántiṣáríram* v. Iti ha smáhur Átreyádayo maharshayaḥ । शुद्धे शुक्रार्तवे सत्त्वः स्वकर्मक्लेशनोदितः । गर्भः संपद्यते युक्तिवशादग्निरिवारणौ ॥१॥ बीजात्मकैर्महाभूतैः सूक्ष्मैः सत्त्वानुगैश्च सः । मातुश्चाहाररसजैः क्रमात्कुक्षौ विवर्धते ॥२॥ तेजो यथार्करश्मीनां स्फटिकेन तिरस्कृतं । नेंधनं दृश्यते गच्छत्सत्त्वो गर्भाशयं तथा ॥३॥ 2. Atháto *garbhavyápadam* ṣ. v. गर्भिण्याः परिहार्याणां सेवया रोगतोऽपि वा । पुष्पे दृष्टेऽथवा शूले बाह्यांतःस्निग्धशीतलं ॥१॥ सेव्यांभोजहिमक्षीरिवल्ककल्काज्यलेपितान् । धारयेद्बस्तियोनिभ्यामार्द्रार्द्रान्पिचुवर्तकान् ॥२॥ 3. Atháto *'ngavibhágam* ṣ. v. शिरोऽंतराधिर्द्वौ बाहू सक्थिनी च समासतः । षडंगमंगं प्रत्यंगं तस्याक्षिहृदयादिकं ॥१॥ 4. Atháto *marmavibhágam* ṣ. v. सप्तोत्तरं मर्मशतं तेषामेकादशोद्दिशेत् । पृथक् सक्थ्नोस्तथा बाह्वोस्त्रीणि कोष्ठे नवोरसि ॥१॥ पृष्ठे चतुर्दशोर्ध्वं तु जत्रोस्त्रिंशच्च सप्त च ॥ 5. Atháto *vikṛitivijnáníyam* a. v. पुष्पं फलस्य धूमोऽग्नेर्वर्षस्य जलदोदयः । यथा, भविष्यतो लिंगं रिष्टं मृत्योस्तथा ध्रुवं ॥१॥ आयुष्मति क्रियाः सर्वाः सफलाः संप्रयोजिताः । भवंति भिषजां भूत्यै कृतज्ञ इव भूभुजि ॥२॥ क्षीणायुषि कृतं कर्म व्यर्थं कृतमिवाधमे । अयशोदेहसंदेहं स्वार्थहानिं च यच्छति ॥३॥ 6. Atháto *dútavijnáníyam* ṣáríram v. पाषंडाश्रमवर्णानां सवर्णाः कर्मसिद्धये । त एव विपरीताः स्युर्दूताः कर्मविपत्तये ॥१॥ दीनं भीतं द्रुतं त्रस्तं रूक्षामंगलवादिनं । शस्त्रिणं दंडिनं षंढं मुंडं श्मश्रुजटाधरं ॥२॥ अमंगलाह्वयं क्रूरकर्माणं मलिनं स्त्रियं । अनेकं व्याधितं व्यंगं रक्तमाल्यानुलेपनं ॥३॥ तैलपंकांकितं जीर्णविवर्णार्द्रैकवाससं । खरोष्ट्रमहिषारूढं काष्ठलोष्टादिमर्दिनं ॥४॥ नानुगच्छेद्भिषग्दूतमाह्वयंतं च दूरतः ॥

Liber III. *Nidánasthána*, foll. 118–169, capita 16. continet. 1. Athátaḥ *sarvaroganidánam* v. Iti ha smáhur Átreyádayo maharshayaḥ. रोगः पाप्मा ज्वरो व्याधिर्विकारो दुःखमामयः । यक्ष्मातंकगदाबाधाः शब्दाः पर्यायवाचकाः ॥१॥ निदानं पूर्वरूपाणि रूपाण्युपशयस्तथा । संप्राप्तिश्चेति विज्ञानं रोगाणां पंचधा स्मृतं ॥२॥ निमित्तहेत्वायतनप्रत्ययोत्थानकारणैः । निदानमाहुः पर्यायैः प्राग्रूपं येन लक्ष्यते ॥३॥ 2. Atháto *jvaranidánam* v. ज्वरो रोगपतिः पाप्मा मृत्युरोजोशनोऽंतकः । क्रोधो दक्षाध्वरध्वंसी रुद्रोऽर्धनयनोद्भवः ॥१॥ जन्मांतयोर्मोहमयः संतापात्मापचारजः । विविधैर्नामभिः क्रूरो नानायोनिषु वर्तते ॥२॥ स जायतेऽष्टधा दोषैः पृथङ्मिश्रैः समागतैः ॥ 3. Atháto *raktapittakásanidánam* v. भृशोष्णतीक्ष्णकट्वम्लवणादिविदाहिभिः । कोद्रवोद्दालकैश्चान्नैस्तद्युक्तैरतिसेवितैः ॥१॥ कुपितं पित्तलैः पित्तं द्रवं रक्तं च मूर्छिते । ते मिथस्तुल्यरूपत्वमागम्य व्याप्नुतस्तनुं ॥२॥ पित्तं रक्तस्य विकृतेः संसर्गाद्दूषणादपि । गंधवर्णानुवृत्तेश्च रक्तेन व्यपदिश्यते ॥३॥ 4. Athátaḥ *ṣvásahikkánidánam* v. कासवृद्ध्या भवेच्छ्वासः पूर्वैर्वा दोषकोपनैः । आमातिसारवमथुविषपांडुज्वरैरपि ॥१॥ रजोधूमानिलैर्मर्मघातादतिहिमांबुना । क्षुद्रकस्तमकश्छिन्नो महानूर्ध्वश्च पंचमः ॥२॥ कफोपरुद्धगमनः पवनो विष्वगास्थितः । प्राणोदकान्नवाहीनि दुष्टः स्रोतांसि दूषयन् ॥३॥ उरःस्थः कुरुते श्वासमामाशयसमुद्भवं । प्राग्रूपं तस्य हृत्पार्श्वशूलं प्राणविलोमता ॥४॥ 5. Atháto *rájayakshmádinidánam* v. अनेकरोगानुगतो बहुरोगपुरोगमः । राजयक्ष्मा क्षयः शोषो रोगराडिति संस्मृतः ॥१॥ नक्षत्राणां द्विजानां च राज्ञोऽभूद्यदयं पुरा । यच्च राजा च यक्ष्मा च राजयक्ष्मा ततो मतः ॥२॥ देहौषधक्षयकृतेः क्षयस्तत्संभवाच्च सः । रसादिशोषणाच्छोषो रोगराट् तेषु राजनात् ॥३॥ साहसं वेगसंरोधः शुक्रौजःस्नेहसंक्षयः । अन्नपानविधित्यागश्चत्वारस्तस्य हेतवः ॥४॥ 6 (fol. 134). Atháto *madátyayádinidánam* v. तीक्ष्णोष्णरूक्षसूक्ष्माम्लं व्यवाय्याशुकरं लघु । विकाशि विशदं मद्यमोजसोऽस्माद्विपर्ययः ॥१॥ तीक्ष्णादयो विषेऽप्युक्ताश्चित्तोपप्लाविनो गुणाः । जीवितांताय जायंते विषे तूत्कर्षवृत्तितः ॥२॥ तीक्ष्णादिभिर्गुणैर्मद्यं मंदादीनोजसो गुणान् । दशभिर्दश संक्षोभ्य चेतो नयति विक्रियां ॥३॥ आद्ये मदे द्वितीये च प्रमादायतने स्थितः । दुर्विकल्पहतो मूढः सुखमि-

[1] Initia capitum 3—30. commentarii ope emendata sunt.

त्यभिमन्यते ॥४॥ मध्यमोत्तमयोः संधिं प्राप्य राजसतामसः । निरंकुश इव व्यालो न किंचिन्नाचरेज्जडः ॥५॥ इयं भूमिरवद्यानां दौःशील्यस्यैदमास्पदं । एकोऽयं बहुमार्गीया दुर्गतेर्देशिकः, परं ॥६॥ निश्चेष्टः शववच्छेते तृतीये तु मदे स्थितः । मरणादपि पापात्मा गतः पापतरां दशां ॥७॥ धर्माधर्मं सुखं दुःखमर्थानर्थं हिताहितं । यदासक्तो न जानाति कथं तच्छीलयेद्बुधः ॥८॥ मद्ये मोहो भयं शोकः क्रोधो मृत्युश्च संसृताः । सोन्मादमदमूर्च्छायासापस्मारापतानकाः ॥९॥ यत्रैकः स्मृतिविभ्रंशस्तत्र सर्वमसाधुकृत् । अयुक्तियुक्तमन्नं हि व्याधये मरणाय वा ॥१०॥ मद्यं त्रिवर्गधीधैर्यलज्जादेरपि नाशनं । नातिमाद्यंति वलिनः कृताहारा महाशनाः ॥११॥ 7. Atháto *'rṣasáṃ nidánaṃ* v. अरिवत्प्राणिनो मांसकीलका विशसंति यत् । अर्शांसि तस्मादुच्यंते गुदमार्गनिरोधतः ॥१॥ दोषास्त्वङ्मांसमेदांसि संदूष्य विविधाकृतीन् । मांसांकुरानपानादौ कुर्वंत्यर्शांसि ताञ्जगुः ॥२॥ सहजन्मोत्तरोत्थानभेदाद्द्वेधा समासतः । शुष्कस्राविविभेदाच्च ॥ 8. Atháto *'tísáragrahaṇínidánaṃ* v. दोषैर्व्यस्तैः समस्तैश्च भयाच्छोकाच्च षड्विधः । अतीसारः स सुतरां जायतेऽत्यंबुपानतः ॥१॥ कृशशुष्कामिषासात्म्यतिलपिष्टविरूढकैः । मद्यरूक्षातिमात्रान्नैरर्शोभिः स्नेहविभ्रमात् ॥२॥ कृमिभ्यो वेगरोधाच्च तद्विधैः कुपितोऽनिलः । विस्रंसयत्यधोधातून्हत्वा तेनैव चानलं ॥३॥ व्यापाद्यानुशकृत्कोष्ठं पुरीषं द्रवतां नयन् । प्रकल्पतेऽतिसाराय ॥ 9. Atháto *mútrághátanidánaṃ* v. वस्तिवस्तिशिरोमेढ्रकटीवृषणपायवः । एकसंबंधना प्रोक्ता गुदास्थिविवराश्रयाः ॥१॥ अधोमुखोऽपि वस्तिर्हि मूत्रवाहिसिरामुखैः । पार्श्वेभ्यः पूर्यते सूक्ष्मैः स्यंदमानैरनारतं ॥२॥ यैस्तैरेव प्रविश्यैनं दोषाः कुर्वंति विंशतिं । मूत्राघातान्प्रमेहांश्च कृच्छ्रान्मर्मसमाश्रयान् ॥३॥ 10. Athátaḥ *pramehanidánaṃ* v. प्रमेहा विंशतिस्तत्र श्लेष्मतो दश पित्ततः । षट् चत्वारोऽनिलात्तेषां मेदोमूत्रकफावहं ॥१॥ अन्नपानक्रियाजातं यत्प्रायस्तत्प्रवर्तकं । स्वाद्वम्ललवणस्निग्धगुरुपिच्छिलशीतलं ॥२॥ नवधान्यसुरानूपमांसेक्षुगुडगोरसं ॥ 11 (fol. 147ᵃ). Atháto *vidradhivṛiddhigulmanidánaṃ* v. भुक्तैः पर्युषितात्युष्णरूक्षशुष्कविदाहिभिः । जिह्मशय्याविचेष्टाभिस्तैस्तैश्चासृक्प्रदूषणैः ॥१॥ दुष्टत्वङ्मांसमेदोस्थिस्नायुसृक्कंडराश्रयः । यः शोफो वहिरंतर्वा महामूलो महारुजः ॥२॥ वृत्तः स्यादायतो यो वा स्मृतः षोढा स विद्रधिः ॥ 12. Atháta *udaranidánaṃ* v. रोगाः सर्वेऽपि मंदेऽग्नौ सुतरामुदराणि च । अजीर्णान्मलिनैश्चान्नैर्जायंते मलसंचयात् ॥१॥ ऊर्ध्वाधोधातवो रुद्धा वाहिनीरंबुवाहिनीः । प्राणाग्न्यपानान्संदूष्य कुर्युस्त्वङ्मांससंधिगाः ॥२॥ आध्माप्य कुक्षिमुदरमष्टधा तच्च भिद्यते । पृथग्दोषैः समस्तैश्च प्लीहबद्धक्षतोदकैः ॥३॥ 13. Athátaḥ *páṇḍurogaṣophavisarpanidánaṃ* v. पित्तप्रधानाः कुपिता यथोक्तैः कोपनैर्मलाः । तत्रानिलेन वलिना क्षिप्तं पित्तं हृदि स्थितं ॥१॥ धमनीर्दश संप्राप्य व्याप्नुवत्सकलां तनुं । श्लेष्मत्वग्रक्तमांसानि प्रदूष्यांतरमाश्रितं ॥२॥ त्वङ्मांसयोस्तत्कुरुते त्वचि वर्णान्पृथग्विधान् । पांडुहारिद्रहरितान्पांडुत्वं तेषु चाधिकं ॥३॥ यतोऽतः पांडुरित्युक्तः स रोगस्तेन गौरवं । धातूनां स्याच्च शैथिल्यमोजसश्च गुणक्षयः ॥४॥ 14. Athátaḥ *kushṭhaṣvitrakṛiminidánaṃ* v. मिथ्याहारविहारेण विशेषेण विरोधिना । साधुनिंदावधान्यस्वहरणाद्यैश्च सेवितैः ॥१॥ पाप्मभिः कर्मभिः सद्यः प्राक्तनैः प्रेरिता मलाः । सिराः प्रपद्य तिर्यग्गास्त्वग्लसीकासृगामिषं ॥२॥ दूषयंति श्लथीकृत्य निःसरंतस्ततो वहिः । त्वचः कुर्वंति वैवर्ण्यं दुष्टाः कुष्ठमुशंति तत् ॥३॥ 15. Atháto *vátavyádhinidánaṃ* v. सर्वार्थानर्थकरणे विश्वस्यास्यैककारणं । अदुष्टदुष्टः पवनः शरीरस्य विशेषतः ॥१॥ स विश्वकर्मा विश्वात्मा विश्वरूपः प्रजापतिः । स्रष्टा धाता विभुर्विष्णुः संहर्ता मृत्युरंतकः ॥२॥ तददुष्टौ प्रयत्नेन यतितव्यमतः सदा । तस्योक्तं दोषविज्ञाने कर्म प्राकृतवैकृतं ॥३॥ 16. Atháto *vátaṣoṇitanidánaṃ* v. विदाह्यन्नं विरुद्धं च तत्तच्चासृक्प्रदूषणं । भजतां विधिहीनं च स्वप्नजागरमैथुनं ॥१॥ प्रायेण सुकुमाराणामचंक्रमणशीलिनां । अभिघातादशुद्धेश्च नृणामसृजि दूषिते ॥२॥ वातलैः शीतलैर्वायुर्वृद्धः क्रुद्धो विमार्गगः । तादृशेनासृजा रुद्धः प्रागेव प्रदूषयेत् ॥३॥ आढ्यरोगं खुडं वातवलासं वातशोणितं । तदाहुर्नामभिस्तच्च पूर्वं पादौ प्रधावति ॥४॥

Vol. II. Foll. 241. Libb. IV–VI.

Liber IV. *Chikitsásthána*, foll. 1–107, capita 22. continet. 1. Atháto *jvarachikitsitaṃ* v. Iti ha smáhur A'treyádayo maharshayaḥ. आमाशयस्थो हत्वाग्निं सामो मार्गान्पिधापयन् । विदधाति ज्वरं दोषस्तस्मात्कुर्वीत लंघनं ॥१॥ 2. Atháto *raktapittachikitsitaṃ* v. ऊर्ध्वगं वलिनो वेगमेकदोषानुगं नवं । रक्तपित्तं सुखे काले साधयेन्निरुपद्रवं ॥१॥ 3. Athátaḥ *kásachikitsitaṃ* v. केवलानिलजं कासं स्नेहैरादावुपाचरेत् । वातघ्नसिद्धैः स्निग्धैश्च पेययूषरसादिभिः ॥१॥ 4. Athátaḥ *ṣvásahikkáchikitsitaṃ* v. श्वासहिक्का यतस्तुल्यहेत्वाद्याः साधनं ततः । तुल्यमेव तदार्तं च पूर्वं स्वेदैरुपाचरेत् ॥१॥ 5. Atháto *rájayakshmachikitsitaṃ* v. वलिनो बहुदोषस्य स्निग्धस्विन्नस्य शोधनं । ऊर्ध्वाधो यक्ष्मिणः कुर्यात्सस्नेहं यन्न कर्शनं ॥१॥ 6 (fol. 27ᵇ). Athátaṣ *chhardihṛidrogatrishṇáchikitsitaṃ* v. आमाशयोत्क्लेशभवाः प्रायश्छर्द्यो, हितं ततः । लंघनं प्रागृते वायोर्वमनं तत्र योजयेत् ॥१॥ 7. Atháto *madátyayachikitsitaṃ* v. यं दोषमधिकं पश्येत्तस्यादौ प्रतिकारयेत् । कफस्थानानुपूर्व्या वा तुल्यदोषे मदात्यये ॥१॥ 8. Atháto *'rṣasáṃ chikitsitaṃ* v. काले साधारणे व्यभ्रे नातिदुर्वलमर्शसं । विशुद्धकोष्ठं etc. ॥१॥ 9. Atháto *'tísárachikitsitaṃ* v. अतीसारो हि भूयिष्ठं भवत्यामाशयान्वयः ॥ 10. Atháto *grahaṇídoshachikitsitaṃ* v. ग्रहणीमाश्रितं दोषमजीर्णवदुपाचरेत् । अतीसारोक्तविधिना तस्यामं च विपाचयेत् ॥१॥ 11 (fol. 55ᵇ). Atháto *mútrachikitsitaṃ* v. कृच्छ्रे वातघ्नतैलाक्तमधोनाभेः समीरजे । सुस्विन्नैः स्वेदयेदंगं पिंडसेकावगाहनैः ॥१॥ 12. Athátaḥ *pramehachikitsitaṃ* v. मेहिनो वलिनः कुर्यादादौ वमनरेचने । स्निग्धस्य सर्षपारिष्टनिकुंभाक्षकरंजजैः ॥१॥ 13. Atháto *vidradhivṛiddhichikitsitaṃ* v. विद्रधिं सर्वमेवामं शोफवत्समुपाचरेत् । प्रततं चाहरेद्रक्तं पक्वे तु व्रणवत्क्रिया ॥१॥ 14. Atháto *gulmachikitsitaṃ* v. गुल्मं बद्धशकृद्वातं वातिकं तीव्रवेदनं । रूक्षशीतोद्भवं तैलैः साधयेद्वातरोगिकैः ॥१॥ 15. Atháta *udarachikitsitaṃ* v. दोषातिमात्रोपचयात्स्रोतोमार्गनिरोधनात् । संभवत्युदरं तस्मान्नित्यमेव

विरेचयेत् ॥१॥ 16 (fol. 80[a]). Athátaḥ *páṇḍurogachikitsitaṃ* v. पांडुरोगी पिबेत्सर्पिरादौ कल्याणकाह्वयं। पंचगव्यं महातिक्तं शृतं चारग्वधादिना ॥१॥ 17. Athátaḥ *ṣvayathuchikitsitaṃ* v. सर्वत्र सर्वांगसरे दोषजे श्वयथौ पुरा। सामे etc. ॥ 18. Atháto *vísarpachikitsitaṃ* v. आदावेव विसर्पेषु हितं लंघनरूक्षणं। रक्तावसेको वमनं विरेकः स्नेहनं तु न ॥१॥ 19. Athátaḥ *kushṭhachikitsitaṃ* v. कुष्ठिनं स्नेहपानेन पूर्वं तु समुपाचरेत्। तत्र वातोत्तरे तैलं घृतं वा साधितं हितं ॥१॥ 20. Athátaḥ *ṣvitrakṛimichikitsitaṃ* v. कुष्ठादपि बीभत्सं यच्छीघ्रतरं च यात्यसाध्यत्वं। श्वित्रमतस्तच्छांत्यै यतेत दीप्ते यथा भवने ॥१॥ 21. Atháto *vátavyádhichikitsitaṃ* v. केवलं निरुपस्तंभमादौ स्नेहैरुपाचरेत्। वायुं सर्पिर्वसामज्जतैलपानैर्नरं ततः ॥१॥ स्नेहक्लांतं समाश्वास्य पयोभिः स्नेहयेत्पुनः ॥ 22. Atháto *vátaṣoṇitachikitsitaṃ* v. वातशोणितिनो रक्तं स्निग्धस्य बहुशो हरेत्। अल्पाल्पं पालयन्वायुं यथादोषं यथाबलं ॥१॥

Liber V. *Kalpasthána*, foll. 108–124, capita 6. continet. 1. Atháto *vamanakalpaṃ* v. Iti ha smáhur Átreyádayo maharshayaḥ. वमने मदनं श्रेष्ठं त्रिवृन्मूलं विरेचने। नित्यमन्यस्य तु व्याधिविशेषेण विशिष्टता ॥१॥ फलानि तानि पांडूनि न चातिहरितान्यपि। आदायाह्नि प्रशस्तर्क्षे मध्ये ग्रीष्मवसंतयोः ॥२॥ प्रमृज्य कुशमुत्तोल्यां क्षिप्त्वा बद्ध्वा प्रलेपयेत्। गोमयेनामूमुत्तोलीं धान्यमध्ये निधापयेत् ॥३॥ 2. Atháto *virekakalpaṃ* v. कषाया मधुरा रूक्षा विपाके कटुका त्रिवृत्। कफपित्तप्रशमनी रौक्ष्याच्चानिलकोपिनी ॥१॥ सेदानीमौषधैर्युक्ता वातपित्तकफापहैः। कल्पवैशेष्यमासाद्य जायते सर्वरोगजित् ॥२॥ द्विधाख्यातं च तन्मूलं श्यामं श्यामारुणं त्रिवृत्। त्रिवृदाख्यं वरतरं निरपायं सुखं तयोः ॥३॥ 3. Atháto *vamanavirechanavyápatsiddhiṃ* v. वमनं मृदुकोष्ठेन क्षुद्वतान्पकफेन वा। अतितीक्ष्णहिमस्तोकमजीर्णे दुर्बलेन वा ॥१॥ पीतं प्रयात्यधस्तस्मिन्निष्टहानिर्मलोदयः। वामयेत्तं पुनः स्निग्धं स्मरन्पूर्वमतिक्रमं ॥२॥ 4. Atháto *vastikalpaṃ* v. बलां गुडूचीं त्रिफलां सराश्नां द्विपंचमूलं च पलोन्मितानि। अष्टौ फलान्यर्धतुलां च मांसाच्छागात्पचेदप्सु चतुर्थशेषं ॥१॥ पूतो यवानीफलबिल्वकुष्ठवचाशताह्वाघनपिप्पलीनां। कल्कैर्गुडक्षौद्रयुतैः सतैलैर्युक्तः सुखोष्णोल्वणान्वितश्च ॥२॥ वस्तिः परं सर्वगदप्रमाथी स्वस्थे हितो जीवनबृंहणश्च। वस्तौ च यस्मिन्पठितो न कल्कः सर्वत्र दद्यादमुमेव तत्र ॥३॥ 5. Atháto *vastivyápatsiddhiṃ* v. अस्निग्धस्विन्नदेहस्य गुरुकोष्ठस्य योजितः। शीतोऽल्पस्नेहलवणद्रव्यमात्रो घनोऽपि वा ॥१॥ वस्तिः संक्षोभ्य तं दोषं दुर्बलत्वादनिर्हरन्। करोत्ययोगं तेन स्याद्वातमूत्रशकृद्ग्रहः ॥२॥ नाभिवस्तिरुजा दाहो हृल्लेपः श्वयथुर्गुदे। कंडूर्गंडानि वैवर्ण्यमरतिर्वह्निमार्दवं ॥३॥ 6. Atháto *bheshajakalpaṃ* v. धन्वसाधारणे देशे समे सन्मृत्तिके शुचौ। श्मशानचैत्यायतनश्वभ्रवल्मीकवर्जिते ॥१॥ मृदौ प्रदक्षिणजले कुशरोहिषसंस्तृते। अफालकृष्टेऽनाक्रांते पादपैर्बलवत्तरैः ॥२॥ शस्यते भेषजं जातं युक्तं वर्णरसादिभिः। जंत्वजग्धं दवादग्धमविदग्धं च वैकृतैः ॥३॥ भूतैश्छायातपांबाद्यैर्यथाकालं च सेवितं। अवगाढमहामूलमुदीचीं दिशमाश्रितं ॥४॥ In fine de ponderibus haec: शाणं पाणितलं मुष्टिं कुडवं प्रस्थमाढकं। द्रोणं वहं च क्रमशो विजानीयाच्चतुर्गुणं ॥ - - द्वौ शाणौ वटकः कोलं बदरं द्रंक्षणश्च, तौ (scil. drankshaṇau)। अक्षं पिचुः पाणितलं सुवर्णं कवलग्रहः ॥२५॥ कर्षो विडालपदकं तिंदुकं पाणिमानिका। शब्दान्यत्वमभिन्नेऽर्थे, शुक्तिरष्टमिका पिचू (i. e. 2 pichu = 1 ṣukti = 1 ashṭamiká) ॥२६॥ पलं प्रकुंचो बिल्वं च मुष्टिराम्रं चतुर्थिका (haec synonyma sunt)। द्वे पले प्रसृतस्तौ द्वावंजलिस्तौ तु मानिका (= 8 pala) ॥२७॥ आढकं भाजनं कंसो द्रोणः कुंभो घटोऽर्मणं (etiam haec synonyma)। तुला पलशतं ताभिर्विंशत्या भार उच्यते ॥२८॥

Liber VI. *Uttaratantra*, foll. 125–241, quadraginta capita habet. 1. Atháto *bálopacharaṇíyam* a. v. Iti ha smáhur Átreyádayo maharshayaḥ. जातमात्रं विशोध्योल्वाद्बालं सैंधवसर्पिषा। प्रसूतिक्लेशितं चानु बलातैलेन सेचयेत् ॥१॥ अश्मनोर्वादनं चास्य कर्णमूले समाचरेत्। अथास्य दक्षिणे कर्णे मंत्रमुच्चारयेदिमं ॥२॥ अंगादंगात्संभवसि हृदयादधि जायसे। आत्मा वै पुत्रनामासि स जीव शरदः शतं ॥३॥ शतायुः शतवर्षोऽसि दीर्घमायुरवाप्नुहि। नक्षत्राणि दिशो रात्रिरहश्च त्वाभिरक्षतु ॥४॥ 2. Atháto *bálámayapratishedhaṃ* v. त्रिविधः कथितो बालः क्षीरान्नोभयवर्तनः। स्वास्थ्यं ताभ्यामदुष्टाभ्यां दुष्टाभ्यां रोगसंभवः ॥१॥ यदद्भिरेकतां याति न च दोषैरधिष्ठितं। तद्धि शुद्धं पयो वाताद्दुष्टं तु प्लवतेऽम्भसि ॥२॥ 3. Atháto *bálagrahapratishedhaṃ* v. पुरा गुहस्य रक्षार्थं निर्मिताः शूलपाणिना। manushyavigraháḥ *pancha*, sapta strívigrahá graháḥ ॥1॥ *Skando*, *Viṣákho*, *Meshásyaḥ*, *Ṣvagrahaḥ* (svagrahaḥ MS.), *Pitṛi*-saṃjnitaḥ। *Ṣakuniḥ*, *Pútaná*, *Ṣítapútaná*, *Drishṭipútaná* ॥2॥ *Mukhamaṇḍiniká* tadvad, *Revatí*, *Ṣúshkarevatí*। तेषां ग्रहीष्यतां रूपं प्रततं रोदनं ज्वरः ॥३॥ सामान्यरूपमुत्त्रासजृंभाभ्रूक्षेपदीनताः। फेनस्रावोर्ध्वदृष्ट्योष्ठदंतदंशप्रजागराः ॥४॥ रोदनं कूजनं स्तन्यविद्वेषः स्वरवैकृतं। नखैरकस्मात्परितः स्वधात्र्यंगविलेखनं ॥५॥ In fine capitis titulus: *Samáptaṃ kaumáratantraṃ dvitíyam*, reperitur. 4. Atháto *bhútavijnánaṃ* v. लक्षयेज्ज्ञानविज्ञानवाक्चेष्टाबलपौरुषं। पुरुषेऽपौरुषं यत्र तत्र भूतग्रहं वदेत् ॥१॥ भूतस्य रूपप्रकृतिभाष्यगत्यादिचेष्टितैः। यस्यानुकारं कुरुते तेनाविष्टं तमादिशेत् ॥२॥ सोऽष्टादशविधो देवदानवादिभेदतः। हेतुस्तदनुषक्तौ तु सद्यः पूर्वकृतोऽथवा ॥३॥ 5. Atháto *bhútapratishedhaṃ* v. भूतं जयेदहिंसोत्थं जपहोमबलिव्रतैः। तपःशीलसमाधानदानज्ञानदयादिभिः ॥१॥ 6 (fol. 142[a]). Athâta *unmádapratishedhaṃ* v. उन्मादाः षट् पृथग्दोषनिचयाधिविषोद्भवाः। उन्मादो नाम मनसो दोषैरुन्मार्गगैर्मदः ॥१॥ शारीरमानसैर्दुष्टैरहितादन्नपानतः। विकृतासात्म्यसमलाद्विषमादुपयोगतः ॥२॥ विषयस्याल्पसत्त्वस्य व्याधिवेगसमुद्भ्रमात्। क्षीणस्य चेष्टावैषम्यात्पूज्यपूजाव्यतिक्रमात् ॥३॥ आधिभिश्चित्तविभ्रंशाद्विषेणोपविषेण च। एभिर्विहीनसत्त्वस्य हृदि दोषाः प्रदूषिताः ॥४॥

धियो विधाय कालुष्यं हत्वा मार्गान्मनोवहान् । उन्मादं कुर्वते तेन धीविज्ञानस्मृतिभ्रमात् ॥५॥ देहो दुःखसुखभ्रष्टो भ्रष्टसारथिवद्रथः । भ्रमत्यचिंतितारंभः ॥ 7. Atháto *'pasmárapratishedham* v. स्मृत्यपायो ह्यपस्मारः स धीसत्त्वाभिसंप्लवात् । जायतेऽभिहते चित्ते चिंताशोकभयादिभिः ॥१॥ उन्मादवत्प्रकुपितैश्चित्तदेहगतैर्मलैः । हते सत्त्वे हृदि व्याप्ते संज्ञावाहिषु खेषु च ॥२॥ तमो विशन्मूढमतिर्बीभत्साः कुरुते क्रियाः । दंतान्खादन्वमन्फेनं हस्तौ पादौ च विक्षिपन् ॥३॥ पश्यन्नसंति रूपाणि प्रस्खलन्पतति क्षितौ । विजिह्माक्षिभ्रुवो दोषवेगेऽतीते विबुध्यते ॥४॥ Hoc capite sectio tertia *bhútatantra* finitur. Quarta, *sálákyatantra*, qua affectiones partium in capite positarum tractantur, usque ad caput 24. porrigitur. 8. Atháto *vartmarogavijnáníyam* a. v. सर्वरोगनिदानोक्तैरहितैः कुपिता मलाः । अचक्षुष्यैर्विशेषेण प्रायः पित्तानुसारिणः ॥१॥ सिराभिरूर्ध्वं प्रसृता नेत्रावयवमाश्रिताः । वर्त्मसंधिं सितं कृष्णां दृष्टिं वा सर्वमक्षि वा ॥२॥ रोगान्कुर्युश्चलस्तत्र प्राप्य वर्त्माश्रयाः सिराः । सुप्तोत्थितस्य कुरुते वर्त्मस्तंभं सवेदनं ॥३॥ 9. Atháto *vartmarogapratishedham* v. कृच्छ्रोन्मीले पुराणाज्यं द्राक्षाकल्कांबुसाधितं । ससितं योजयेत्स्निग्धं नस्यधूमांजनादि च ॥१॥ 10. Athátaḥ *saṃdhisitásitarogavijnánaṃ* v. वायुः क्रुद्धः सिराः प्राप्य जलाभं जलवाहिनीः । अश्रु स्रावयते वर्त्म शुक्लसंधेः कनीनकात् ॥१॥ तेन नेत्रं सरुग्रागशोफं स्यात्स जलास्रवः ॥ 11 (fol. 154ª). Athátaḥ *saṃdhisitásitarogapratishedhaṃ* v. उपनाहं भिषक् स्विन्नं भिन्नं व्रीहिमुखेन च । लेखयेन्मंडलाग्रेण ततश्च प्रतिसारयेत् ॥१॥ पिप्पलीक्षौद्रसिंधूत्थैर्बध्नीयात्पूर्ववत्ततः । पटोलपत्त्रामलककषायेनाश्चोतयेच्च तं ॥२॥ 12. Atháto *dṛishṭirogavijnánaṃ* v. सिरानुसारिणि मले प्रथमं पटलं श्रिते । अव्यक्तमीक्षते रूपं व्यक्तमप्यनिमित्ततः ॥१॥ प्राप्ते द्वितीयं पटलमभूतमपि पश्यति । भूतं तु यत्नादासन्नं दूरं सूक्ष्मं च नेक्षते ॥२॥ दूरांतिकस्थं रूपं च विपर्यासेन मन्यते । दोषे मंडलसंस्थाने मंडलानीव पश्यति ॥३॥ 13. Athátas *timirapratishedhaṃ* v. तिमिरं काचतां याति काचोऽप्यांध्यमुपेक्षया । नेत्ररोगेष्वतो घोरं तिमिरं साधयेद्द्रुतं ॥१॥ तुलां पचेत जीवंत्या द्रोणेऽपां पादशेषिते । तत्क्वाथे द्विगुणक्षीरं घृतप्रस्थं विपाचयेत् ॥२॥ 14. Atháto *linganáṣapratishedhaṃ* v. विध्येत्सुजातं निःप्रेक्ष्यं लिंगनाशं कफोद्भवं । आवर्तक्यादिभिः षड्भिर्विवर्जितमुपद्रवैः ॥१॥ सोऽसंजातो हि विषमो दधिमस्तुनिभस्तनुः । शलाकयावकृष्टोऽपि पुनरूर्ध्वं प्रपद्यते ॥२॥ करोति वेदनां तीव्रां दृष्टिं च स्थगयेत्पुनः । श्लेष्मलैः पूर्यते चाशु सोऽन्यैः सोपद्रवैश्चिरात् ॥३॥ 15. Athátaḥ *sarvákshirogavijnánaṃ* v. वातेन नेत्रेऽभिष्यन्ने नासानाहोऽल्पशोफता । शंखाक्षिभ्रूललाटस्य तोदस्फुरणभेदनं ॥१॥ शुष्काल्पा दूषिका शीतमच्छं चाश्रु चला रुजः । निमेषोन्मेषणं कृच्छ्राज्जंतूनामिव सर्पणं ॥२॥ अक्ष्याध्मातमिवाभाति सूक्ष्मैः शल्यैरिवाचितं । स्निग्धोष्णैश्चोपशमनं सोऽभिष्यंद उपेक्षितः ॥३॥ 16 (fol. 167ª). Athátaḥ *sarvákshirogapratishedhaṃ* v. प्राग्रूप एव स्यंदेषु तीक्ष्णं गंडूषनावनं । कारयेदुपवासं च कोपादन्यत्र वातजात् ॥१॥ 17. Athátaḥ *karṇarogavijnánaṃ* v. प्रतिश्यायजलक्रीडाकर्णकंडूयनैर्मरुत् । मिथ्यायोगेन शब्दस्य कुपितोऽन्यैश्च कोपनैः ॥१॥ प्राप्य श्रोत्रसिराः कुर्याच्छूलं स्रोतसि वेगवत् । अर्धावभेदकं स्तंभं शिशिरानभिनंदनं ॥२॥ 18. Athátaḥ *karṇarogapratishedhaṃ* v. कर्णशूले पवनजे पिबेद्रात्रौ रसाशितः । वातघ्नसाधितं सर्पिः कर्णं स्विन्नं च पूरयेत् ॥१॥ पत्त्राणां पृथगश्वत्थबिल्वार्केरंडजन्मनां । तैलसिंधूत्थदिग्धानां स्विन्नानां पुटपाकतः ॥२॥ रसैः कवोष्णैः ॥ Post folium 174. folia tria (४६–५०) desiderantur, in quibus capita 19 (*násárogavijnána*), 20 (*násárogapratishedha*) et disticha 6. prima capitis 21 (*mukharogavijnána*) inerant. 22 (fol. 178ª). Atháto *mukharogapratishedhaṃ* v. खंडौष्ठस्य विलिख्यांतौ स्यूत्वा व्रणवदाचरेत् । यष्टीज्योतिष्मतीरोध्रस्रावणीसारिवोत्पलैः ॥१॥ 23. Athátaḥ *ṣirorogavijnánaṃ* v. धूमातपतुषारांबुक्रीडातिस्वप्नजागरैः । उत्स्वेदाधिपुरोवाततवाष्पनिग्रहरोदनैः ॥१॥ अत्यंबुमद्यपानेन कृमिभिर्वेगधारणैः । उपधानमृजाभ्यंगद्वेषाधःप्रततेक्षणैः ॥२॥ असात्म्यगंधदुष्टामभाष्याद्यैश्च शिरोगताः । जनयंत्यामयान्दोषाः ॥ 24. Athátaḥ *ṣirorogapratishedhaṃ* v. शिरोभितापेऽनिलजे वातव्याधिविधिं चरेत् । घृतमक्तशिरा रात्रौ पिबेदुष्णपयोनुपः ॥१॥ माषान्मुद्गान्कुलत्थान्वा तद्वत्खादेद्घृतान्वितान् । तैलं तिलानां कल्कं वा क्षीरेण सह पाययेत् ॥२॥ Capp. 25–34. *Ṣalyatantram*, quinta libri sectio, qua vulnerum externorum curatio (chirurgia) tractatur. 25. Atháto *vraṇavijnánapratishedhaṃ* v. व्रणो द्विधा निजागंतुदुष्टशुद्धविभेदतः । निजो दोषैः शरीरोत्थैरागंतुर्बाह्यहेतुजः ॥१॥ दोषैरधिष्ठितो दुष्टः शुद्धस्तैरनधिष्ठितः ॥ 26 (fol. 191ª). Athátaḥ *sadyovraṇapratishedhaṃ* v. सद्योव्रणा ये सहसा संभवंत्यभिघाततः । अनंतैरपि तैरंगमुच्यतेऽजुष्टमष्टधा ॥१॥ घृष्टावकृत्तविच्छिन्नप्रविलंबितपातितं । विद्धं भिन्नं विदलितं ॥ 27. Atháto *bhangapratishedhaṃ* v. पाताघातादिभिर्द्वेधा भंगोऽस्थ्नः संध्यसंधितः । प्रसारणाकुंचनयोरशक्तिः संधिमुक्तता ॥१॥ इतरस्मिन्भृशं शोफः सर्वावस्थास्वतिव्यथा । अशक्तिश्चेष्टितेऽल्पेऽपि पीड्यमाने सशब्दता ॥२॥ 28. Atháto *bhagandarapratishedhaṃ* v. हस्त्यश्वपृष्ठगमनकठिनोत्कटकासनैः । अर्शोनिदानाभिहितैरपरैश्च निषेवितैः ॥१॥ अनिष्टादृष्टपाकेन सद्यो वा साधुगर्हणैः । प्रायेण पिटिकापूर्वो योऽंगुले द्व्यंगुलेऽपि वा ॥२॥ पायौ व्रणोऽंतर्बाह्यो वा दुष्टासृङ्मांसगो भवेत् । वस्तिमूत्राशयाभ्यासगतत्वात्स्यंदनात्मकः ॥३॥ भगंदरः ॥ 29. Atháto *granthyarbudaṣlípadápachínáḍívijnánaṃ* v. कफप्रधानाः कुर्वंति मेदोमांसास्रगा मलाः । वृत्तोन्नतं यं श्वयथुं स ग्रंथिर्ग्रंथनात्स्मृतः ॥१॥ 30. Atháto *granthyádipratishedhaṃ* v. ग्रंथिष्वामेषु कर्तव्या यथास्वं शोफवत्क्रिया । बृहतीचित्रकव्याघ्रीकणासिद्धेन सर्पिषा ॥१॥ स्नेहयेच्छुद्धिकामं च, तीक्ष्णैः शुद्धस्य लेपनं । संस्वेद्य बहुशो ग्रंथीन्विमृद्नीयात्पुनः पुनः ॥२॥ 31 (fol. 202ª). Athátaḥ *kshudrarogavijnánaṃ* v. स्निग्धा सवर्णा ग्रथिता नीरुजा मुद्गसंमिता । पिटका कफवाताभ्यां बालानामजगल्लिका ॥१॥ 32. Athátaḥ *kshudrarogapratishedhaṃ* v. विस्रावयेज्जलौ-

कोभिरपक्वामजगल्लिकां। स्वेदयित्वा यवप्रख्यां विलयाय प्रलेपयेत् ॥१॥ दारुकुष्ठमनोह्वालैः ॥ 33. Atháto *guhyarogavijnánam* v. स्त्रीव्यवायनिवृत्तस्य सहसा भजतोऽथवा etc. ॥ 34. Atháto *guhyarogapratishedham* v. मेढ्रमध्ये सिरां विध्येदुपदंशे नवोत्थिते। शीतां कुर्यात्क्रियां शुद्धिं विरेकेण विशेषतः ॥१॥ Capp. 35–38. *Vishatantram*, de antidotis. 35. Atháto *vishapratishedham* v. मथ्यमाने जलनिधावमृतार्थं सुरासुरैः। जातः प्रागमृतोत्पत्तेः पुरुषो घोरदर्शनः ॥१॥ दीप्ततेजाश्चतुर्दंष्ट्रो हरिकेशोऽनलेक्षणः। जगद्विषण्णं तं दृष्ट्वा तेनासौ विषसंज्ञितः ॥२॥ हुंकृतो ब्रह्मणा मूर्तास्ततः स्थावरजंगमाः। सोऽध्यतिष्ठन्निजं रूपमुज्झित्वा वंचनात्मकं ॥३॥ 36 (fol. 215ª). Athátaḥ *sarpavishapratishedham* v. दर्वीकरा मंडलिनो राजीमंतश्च पन्नगाः। त्रिधा समासतो भौमा भिद्यंते ते त्वनेकधा ॥१॥ 37. Athátaḥ *kíṭalútádivishapratishedham* v. सर्पाणामेव विण्मूत्रशुक्रांडशवकोथजाः। दोषैर्व्यस्तैः समस्तैश्च युक्ताः कीटाश्चतुर्विधाः ॥१॥ दष्टस्य कीटैर्वायव्यैर्दंशस्तोदरुजोल्बणः। आग्नेयैरल्पसंस्रावो दाहरागविसर्पवान् ॥२॥ पक्वः पीलुफलप्रख्यः खर्जूरसदृशोऽथवा। कफाधिकैर्मंदरुजः पक्वोदुंबरसंनिभः ॥३॥ 38. Atháto *múshikálarkavishapratishedham* v. लालनश्चपलः पुत्रो हसिरश्चिक्किरोऽजिरः। कषायदंतः कुलकः कोकिलः कपिलोऽसितः ॥१॥ अरुणः शवलः श्वेतकपोतः पलितोंदुरः। छुच्छुंदरो रसालाख्यो दशाष्टौ चेति मूषिकाः ॥२॥ शुक्रं पतति यत्रैषां शुक्रदिग्धैः स्पृशंति वा। यदंगमंगैस्तत्रास्रे दूषिते पांडुतां गते ॥३॥ ग्रंथयः श्वयथुः कोथो मंडलानि भ्रमोऽरुचिः etc. ॥[1] 39. Atháto *rasáyanádhyáyam* v. दीर्घमायुः स्मृतिं मेधामारोग्यं तरुणं वयः। प्रभावर्णस्वरौदार्यं देहेंद्रियबलोदयं ॥१॥ वाक्सिद्धिं वृष्यतां कांतिमवाप्नोति रसायनात्। लाभोपायो हि धातूनां रसादीनां रसायनं ॥२॥ पूर्वे वयसि मध्ये वा तत्प्रयोज्यं जितात्मनः। स्निग्धस्य स्रुतरक्तस्य विशुद्धस्य च सर्वथा ॥३॥ अविशुद्धे शरीरे हि युक्तो रासायनो विधिः। वाजीकरो वा मलिने वस्त्रे रंग इवाफलः ॥४॥ रसायनानां द्विविधं प्रयोगमृषयो विदुः। कुटीप्रावेशिकं मुख्यं वातातपिकमन्यथा ॥५॥ 40. Atháto *vájíkaraṇádhyáyam* v. वाजीकरणमन्विच्छेत्सततं विषयी पुमान्। पुष्टिस्तुष्टिरपत्यं च गुणवत्तत्र संश्रितं ॥१॥

Totum opus, cum Aruṇadattae ad Kalpasthánam commentario in codice E.I.H. 2455 (Samvat 1865), Kalpasthánam et Uttarasthánam in cod. E. I. H. 72. satis antiquo exstant. In annotationibus, quae hujus codicis marginibus adscriptae sunt, *Aruṇadattae, Hemádris, Chandrae* commentarii laudantur. De codice Havniensi cf. Westergaard Catal. p. 103, de Berolinensi Weber Catal. p. 278.

Apographon nostrum e codice praestantissimo anno 1794 non satis accurate transscriptum est. (Wilson 298, 299.)

---

[1] Cod. E. I. H. 72. in canis rabidi morsum hanc precem *Vriddhavágbhaṭae* tributam continet: अलर्काधिपते यक्ष सारमेय गणाधिप। अलर्कजुष्टमेतं मे निर्विषं कुरु मा चिरात् ॥

743.

Lit. Devan. Charta Europ. Foll. 448. Long. 11. Lat. 9. Linn. 22.

Hoc codice *Bhávaprakáṣas* continetur, quo libro *Bhávas* (Miṣrabháva), Miṣralaṭakanae filius, artem medicam universam dilucide exposuit. (A.) Prooemium, quo medicinae Indicae propagatae historia mythica traditur, sublatis gravissimis erroribus, exscripsi:

गजमुखममरप्रवरं सिद्धिकरं विघ्नहर्तारं। गुरुमवनमनयनप्रदमिष्टकरीमिष्टदेवतां वंदे ॥१॥ आयुर्वेदागमनं क्रमेण येनाभवद्भूमौ। प्रथमं लिखामि तमहं नानातंत्राणि संदृश्य ॥२॥ áyurvedasya lakshaṇam áha। आयुर्हिताहितं व्याधिर्निदानं शमनं तथा। विद्यते यत्र विद्वद्भिः स आयुर्वेद उच्यते ॥३॥ áyurvedasya niruktim áha। अनेन पुरुषो यस्मादायुर्विंदति वेत्ति च। तस्मान्मुनिवरैरेष आयुर्वेद इति स्मृतः ॥४॥ ṣarírajívayor yogo jívanam, tenávachhinnaḥ kála áyuḥ. Áyurvedadvaráyushyáṇy anáyushyáṇi cha dravyaguṇakarmáṇi jnátvá, teshám sevanatyágábhyám árogyeṇáyur vindati. Tenaiva hetuná parasyápy áyur vetti cha.

Kramam áha. *Tatrádau Brahmaprádurbhávaḥ*। विधातार्थर्वसर्वस्वमायुर्वेदं प्रकाशयन्। स्वनाम्ना संहितां चक्रे लक्षश्लोकमयीमृजुं ॥५॥

Atha Dakshaprádurbhávaḥ। ततः प्रजापतिं दक्षं दक्षं सकलकर्मसु। विधिर्धीनीरधिः सांगमायुर्वेदमुपादिशत् ॥६॥

Atháṣvinísutaprádurbhávaḥ। दक्षादधीत्य दस्रौ वितेनतुः संहितां स्वीयां। सकलचिकित्सकलोकप्रतिपत्तिविवृद्धये धन्यां ॥७॥ स्वयंभुवः शिरश्छिन्नं भैरवेण रुषाथ तत्। अश्विभ्यां संहितं तस्मात्तौ जातौ यज्ञभागिनौ ॥८॥ देवासुररणे देवा दैत्यैर्ये सक्षताः कृताः। अक्षतास्ते कृताः सद्यो दस्राभ्यामद्भुतं महत् ॥९॥ वज्रिणोऽभूद्भुजस्तंभः स दस्राभ्यां चिकित्सितः। सोमाद्विपतितश्चंद्रस्ताभ्यामेव सुखीकृतः ॥१०॥ विशीर्णा दशनाः पूष्णो नेत्रे नष्टे भगस्य च। शशिनो राजयक्ष्माभूदश्विभ्यां ते चिकित्सिताः ॥११॥ भार्गवश्च्यवनः कामी वृद्धः स विकृतिं गतः। वीर्यवर्णस्वरोपेतः कृतोऽश्विभ्यां पुनर्युवा ॥१२॥ एतैश्चान्यैश्च बहुभिः कर्मभिर्भिषजां वरौ। बभूवतुर्भृशं पूज्याविंद्रादीनां दिवौकसां ॥१३॥

Athendraprádurbhávaḥ। संदृश्य दस्रयोरिंद्रः कर्माण्येतानि यत्नवान्। आयुर्वेदं निरुद्वेगं तौ ययाचे शचीपतिः ॥१४॥ नासत्यौ सत्यसंधेन शक्रेण किल याचितौ। आयुर्वेदं यथाधीतं ददतुः शतमन्यवे ॥१५॥ नासत्याभ्यामधीत्यैष आयुर्वेदं शतक्रतुः। अध्यापयामास बहूनात्रेयप्रमुखान्मुनीन् ॥१६॥

Athátreyaprádurbhávaḥ। एकदा जगदालोक्य गदाकुलमितस्ततः। चिंतयामास भगवानात्रेयो मुनिपुंगवः ॥१७॥ किं करोमि क्व गच्छामि कथं लोका निरामयाः। भवंति, सामयानेतान्न शक्नोमि निरीक्षितुं ॥१८॥ दयालुरहमत्यर्थं स्वभावो दुरतिक्रमः। एतेषां दुःखतो दुःखं ममापि हृदयेऽधिकं ॥१९॥ आयुर्वेदं पठिष्यामि नैरुज्याय शरीरिणां।

इति निश्चित्य गतवानात्रेयस्त्रिदशालयं ॥२०॥ तत्र मंदिरमिंद्रस्य गत्वा शक्रं ददर्श सः। सिंहासनसमासीनं स्तूयमानं सुरर्षिभिः ॥२१॥ भासयंतं दिशो भासा भास्करप्रतिमत्विषा। आयुर्वेदमहाचार्यं शिरोधार्यं दिवौकसां ॥२२॥ शक्रस्तु तं निरीक्ष्यैव त्यक्तसिंहासनो ययौ। तदग्रे पूजयामास भृशं भूरितपःकृशं ॥२३॥ कुशलं परिपप्रच्छ तथागमनकारणं। स मुनिर्वक्तुमारेभे निजागमनकारणं ॥२४॥ देवराज न राजासि दिव एव यतो भवान्। विधाता विहितो यत्नात्त्रिलोकीलोकपालकः ॥२५॥ व्याधिभिर्व्यथिता लोकाः शोकाकुलितचेतसः। भूतले संति, संतापं तेषां हर्तुं कृपां कुरु ॥२६॥ आयुर्वेदोपदेशं मे कुरु कारुण्यतो नृणां। तथेत्युक्त्वा सहस्राक्षोऽध्यापयामास तं मुनिं ॥२७॥ मुनींद्र इंद्रतः सांगमायुर्वेदमधीत्य सः। अभिनंद्य तमाशीर्भिराजगाम पुनर्महीं ॥२८॥ अथात्रेयो मुनिः श्रेष्ठो भगवान्करुणाकरः। स्वनाम्ना संहितां चक्रे नरचक्रानुकंपया ॥२९॥ Tato *'gniveṣam, Bheḍaṃ* cha, *Játúkarṇam, Paráṣaram* । *Kshírapáṇiṃ* cha, *Háritam* áyurvedam apáṭhayat ॥30॥ Tantrasya kartá prathamam *Agniveṣo*[1] 'bhavat purá । tato *Bheḍádayaṣ* chakruḥ svaṃ svaṃ tantram, kṛitáni tu ॥31॥ श्रावयामासुरात्रेयं मुनिवृंदेन वंदितं। श्रुत्वा च तानि तंत्राणि हृष्टोऽभूदत्रिनंदनः ॥३२॥ यथावत्सूचितं तस्मात्प्रहृष्टा मुनयोऽभवन्। दिवि देवर्षयो देवाः श्रुत्वा साध्विति तेऽब्रुवन् ॥३३॥

Atha Bharadvájaprádurbhávaḥ । एकदा हिमवत्पार्श्वे दैवादागत्य संगताः। मुनयो बहवस्तांश्च नामभिः कथयाम्यहं ॥३४॥ भरद्वाजो मुनिवरः प्रथमं समुपागतः। ततोऽंगिरास्ततो गर्गो मरीचिर्भृगुभार्गवौ ॥३५॥ पुलस्त्योऽगस्तिरसितो वसिष्ठः सपराशरः। हारीतो गौतमः सांख्यो मैत्रेयश्च्यवनोऽपि च ॥३६॥ जमदग्निश्च गार्ग्यश्च काश्यपः कश्यपोऽपि च। नारदो वामदेवश्च मार्कंडेयः कपिष्ठलः ॥३७॥ शांडिल्यः सहकौंडिन्यः शाकुनेयश्च शौनकः। आश्वलायनसांकृत्यौ विश्वामित्रः परीक्षितः ॥३८॥ देवलो गावलो धौम्यः काप्यकात्यायनावुभौ। कांकायनो वैजवापः कुशिको बादरायणिः ॥३९॥ हिरण्याक्षश्च लौगाक्षिः शरलोमा च गोभिलः। वैखानसा वालखिल्यास्तथैवान्ये महर्षयः ॥४०॥ ब्रह्मज्ञानस्य निधयो यमस्य नियमस्य च। तपसस्तेजसा दीप्ता हूयमाना इवाग्नयः ॥४१॥ सुखोपविष्टास्ते तत्र सर्वे चक्रुः कथामिमां। धर्मार्थकाममोक्षाणां मूलमुक्तं कलेवरं। तच्च सर्वार्थसंसिद्धै भवेद्यदि निरामयं ॥४२॥ तपःस्वाध्यायधर्माणां ब्रह्मचर्यव्रतायुषां। हर्तारः प्रसृता रोगा यत्र तत्र च सर्वतः ॥४३॥ रोगाः कार्श्यकरा बलक्षयकरा देहस्य चेष्टाहरा दृष्ट्याद्यींद्रियशक्तिसंक्षयकराः सर्वांगपीडाकराः। धर्मार्थाखिलकाममुक्तिषु महाविघ्नस्वरूपा बलात्प्राणानाशु हरंति, संति यदि ते क्षेमं कुतः प्राणिनां ॥४४॥ तत्तेषां प्रशमाय कश्चन विधिश्चिंत्यो भवद्भिर्बुधैर्योग्यैरित्यभिधाय संसदि भरद्वाजं मुनिं तेऽब्रुवन्। त्वं योग्यो भगवन्सहस्रनयनं याचस्व लब्धं क्रमादायुर्वेदमधीत्य यं गदभयान्मुक्ता भवामो वयं ॥४५॥ इत्थं स मुनिभिर्योग्यैः प्रार्थितो विनयान्वितैः। भरद्वाजो मुनिश्रेष्ठो जगाम त्रिदशालयं ॥४६॥ तत्रेंद्रभवनं गत्वा सुरर्षिगणमध्यगं। दृष्टवान्वृत्रहंतारं दीप्यमानमिवानलं ॥४७॥ दृष्ट्वैव स मुनिं प्राह भगवान्मघवा मुदा। धर्मज्ञ स्वागतं तेऽद्य मुनिं तं समपूजयत् ॥४८॥ सोऽभिगम्य जयाशीर्भिरभिनंद्य सुरेश्वरं। ऋषीणां वचनं सम्यगश्रावयत सत्तमं ॥४९॥ व्याधयो हि समुत्पन्नाः सर्वप्राणिभयंकराः। तेषां प्रशमनोपायं यथावद्वक्तुमर्हसि ॥५०॥ तमुवाच मुनिं सांगमायुर्वेदं शतक्रतुः। जीवेद्वर्षसहस्राणि देही नीरुङ्निशम्य यं ॥५१॥ सोऽनंतपारं त्रिस्कंधमायुर्वेदं महामतिः। यथावदचिरात्सर्वं बुबुधे तन्मना मुनिः ॥५२॥ तेनायुः सुचिरं लेभे भरद्वाजो निरामयं। अन्यानपि मुनिश्चक्रे नीरुजः सुचिरायुषः ॥५३॥ तत्त्या (tattatra A. tatratya B.) जनितज्ञानचक्षुष ऋषयोऽखिलाः। गुणान्कर्माणि द्रव्याणि दृष्ट्वा तद्विधिमाश्रिताः ॥५४॥ आरोग्यं लेभिरे दीर्घमायुश्च सुखसंयुतं। आयुर्वेदोक्तविधिनान्येऽपि स्युर्मुनयो यथा ॥५५॥

Atha Charakaprádurbhávaḥ । यदा मात्स्यावतारेण हरिणा वेद उद्धृतः। तदाशेषं च (तदाशेषश्च MS.) तत्रैव वेदं सांगमवाप्तवान् ॥५६॥ अथर्वांतर्गतं सम्यगायुर्वेदं च लब्धवान्। एकदा स महीवृत्तं द्रष्टुं चर इवागतः ॥५७॥ तत्र लोकान्गदैर्ग्रस्तान्व्यथया परिपीडितान्। स्थलेषु बहुषु व्यग्रान्म्रियमाणांश्च दृष्टवान् ॥५८॥ तान्दृष्ट्वातिदयायुक्तस्तेषां दुःखेन दुःखितः। अनंतश्चिंतयामास रोगोपशमकारणं ॥५९॥ संचिंत्य स स्वयं तत्र मुनेः पुत्रो बभूव ह। यतश्चर इवायातो न ज्ञातः केनचिद्यतः ॥६०॥ तस्माच्चरकनामासौ विख्यातः क्षितिमंडले। स भाति चरकाचार्यो देवाचार्यो यथा दिवि। सहस्रवदनस्यांशो येन ध्वंसो रुजां कृतः ॥६१॥ आत्रेयस्य मुनेः शिष्या अग्निवेशादयोऽभवन्। मुनयो बहवस्तैश्च कृतं तंत्रं स्वकं स्वकं ॥६२॥ तेषां तंत्राणि संस्कृत्य समाहृत्य विपश्चिता। चरकेणात्मनो नाम्ना ग्रंथोऽयं चरकः कृतः ॥६३॥

Atha Dhanvantariprádurbhávaḥ । एकदा देवराजस्य दृष्टिर्निपतिता भुवि। तत्र तेन नरा दृष्टा व्याधिभिर्भृशपीडिताः ॥६४॥ तान्दृष्ट्वा हृदयं तस्य दयया परिपीडितं। दयार्द्रहृदयः शक्रो धन्वंतरिमुवाच ह ॥६५॥ धन्वंतरे सुरश्रेष्ठ भगवन्किंचिदुच्यते। योग्यो भवसि भूतानामुपकारपरो भव ॥६६॥ उपकाराय लोकानां केन किं न कृतं पुरा। त्रैलोक्याधिपतिर्विष्णुरभून्मत्स्यादिरूपवान् ॥६७॥ तस्मात्त्वं पृथिवीं याहि काशीमध्ये नृपो भव। प्रतीकाराय रोगाणामायुर्वेदं प्रकाशय ॥६८॥ इत्युक्त्वा सुरशार्दूलः सर्वभूतहितेप्सया। समस्तमायुषो वेदं धन्वंतरिमुपादिशत् ॥६९॥ अधीत्य चायुषो वेदमिंद्राद्धन्वंतरिः पुरा। आगत्य पृथिवीं काश्यां जातो बाहुजवेश्मनि ॥७०॥ नाम्ना सुतोऽभवत्ख्यातो दिवोदास इति क्षितौ। बाल एव विरक्तोऽभूच्चचार च महत्तपः ॥७१॥ यत्नेन

[1] Libellus huic auctori tributus, *Anjana*, i.e. collyrium, appellatus, quo morborum principalium diagnosis distichis 234. tractatur, in codice E. I. H. 1643. exstat. Incipit: अबोधतिमिरच्छिन्नचक्षुषां भिषजां कृते। सूक्ष्मं करोत्यग्निवेशो ग्रंथमंजनमाख्यया ॥१॥ दोषरोषो रुजां हेतुस्तत्प्रकोपे तु कारणं। प्रत्येकं हीनमिथ्यातियोगः कालार्थकर्मणां ॥२॥ Desinit in distichis: अतिविस्तरपुस्तकपाठहठप्रतिहस्ततया धृतभूरिभियां नयनानलदृङ्मितपद्यकृतं भिषजामिदमंजनमस्तु मुदे ॥२३३॥ चकार चतुरोचितं तदिदमग्निवेशोऽंजनं परोपकृतये कृतं परिमितं रुजां ज्ञापकं। ततः समुदितैः सदा सुकृतराशिभिस्तुष्यतां तुषारगिरिकन्यकापरिदृढः स योषित्सुतः ॥२३४॥ Codex anno 1793 non satis accurate exaratus est.

महता ब्रह्मा तं काश्यामकरोन्नृपं । ततो धन्वंततरिर्लोकैः काशिराजोऽभिधीयते ॥७२॥ हिताय देहिनां स्वीया संहिता विहितामुना । अयं विद्यार्थिनो लोकान्संहितां तामपाठयत् ॥७३॥

Atha Suṣrutaprádurbhávaḥ । अथ ज्ञानदृशा विश्वामित्रप्रभृतयोऽवदन् । अयं धन्वंतरिः काश्यां काशिराज्ञो य उच्यते ॥७४॥ विश्वामित्रो मुनिस्तेषु पुत्रं सुश्रुतमुक्तवान् । वत्स वाराणसीं गच्छ विश्वेश्वरवल्लभां ॥७५॥ तत्र नाम्ना दिवोदासः काशिराजोऽस्ति बाहुजः । स हि धन्वंतरिः साक्षादायुर्वेदविदां वरः ॥७६॥ सर्वप्राणिदयातीर्थमुपकारी महामखः । आयुर्वेदं ततोऽधीष्व लोकोपकृतिहेतवे ॥७७॥ पितुर्वचनमाकर्ण्य सुश्रुतः काशिकां गतः । तेन सार्धं समध्येतुं मुनिसूनुशतं ययौ ॥७८॥ अथ धन्वंतरिं सर्वे वानप्रस्थाश्रमे स्थितं । भगवंतं सुरश्रेष्ठं मुनिभिर्बहुभिः स्तुतं ॥७९॥ काशिराजं दिवोदासं तेऽपश्यन्विनयान्वितं । स्वागतं च इति स्माह दिवोदासो यशोधनः ॥८०॥ कुशलं परिपप्रच्छ तथागमनकारणं । ततस्ते सुश्रुतद्वारा कथयामासुरुत्तरं ॥८१॥ भगवान्मानवान्दृष्ट्वा व्याधिभिः परिपीडितान् । क्रंदतो म्रियमाणांश्च जातास्माकं हृदि व्यथा ॥८२॥ आमयानां शमोपायं विज्ञातुं वयमागताः । आयुर्वेदं भवानस्मानध्यापयतु यत्नतः ॥८३॥ अंगीकृत्य वचस्तेषां नृपतिस्तानुपादिशत् । व्याख्यातं तेन ते यत्नाज्जगृहुर्मुनयो मुदा ॥८४॥ काशिराजं जयाशीर्भिरभिनंद्य मुदान्विताः । सुश्रुताद्याः सुसिद्धार्था जग्मुर्गेहं स्वकं स्वकं ॥८५॥ प्रथमं सुश्रुतस्तेषु स्वं तंत्रं कृतवान्स्फुटं । सुश्रुतस्य सखायोऽपि पृथक्तंत्राणि तेनिरे ॥८६॥ सुश्रुतेन कृतं तंत्रं सु श्रुतं बहुभिर्यतः । तस्मात्तत्सुश्रुतं नाम्ना विख्यातं क्षितिमंडले ॥८७॥
Ity áyurvedapraṇetṛíṇám prádurbhávaḥ ॥

आयुर्वेदाब्धिमध्यादतिमतिमुनयो योगरत्नानि यत्ना-
ल्लब्ध्वा स्वे स्वे निबंधे दधुरखिलजनव्याधिविध्वंसनाय ।
तत्तद्ग्रंथगृहीतैः सुवचनमणिभिर्भावमिश्रश्चिकित्सा-
शास्त्रे जाड्यांधकारं प्रशमयितुमिमं संविधत्ते प्रकाशं ॥८८॥
श्रीपतिपदप्रसादादाशीर्भ्यो भूमिदेवानां ।
भावप्रकाशनामा ग्रंथोऽयं पठ्यतां सर्वैः ॥८९॥

Auctor librum in capita (prakaraṇa) sex divisit. *Primo* (desinit in fol. 6^{b}) de rerum natura brevissime exponit. *Secundum* incipit: चिकित्सायां शरीरी ह्यधिकृतः । स शरीरी यथोत्पद्यते तद्बोधयितुं गर्भोत्पत्तिक्रममाह ॥ Majore hujus capitis parte anatomiam explicat. Paragraphi singulae hae: rajasvalásvabhávaḥ; rajasvaláyá niyamáḥ; rajasvalákṛityam; bhartṛikṛityam; yugmáyugmarátríṇám phalam; ayogyaḥ purushaḥ; ayogyá strí; garbhávataraṇakramaḥ; garbhásayasya svarúpam; gṛihítagarbháyá lakshaṇam; putragarbhavatyá lakshaṇam; napunsakaviṣeshaḥ; garbhalakshaṇam fol. 11^{a}. *Trayo dosháḥ* (váyu, pitta, kapha) fol. 11^{a}; dhátavaḥ fol. 14^{a}; upadhátavaḥ fol. 21^{b}; áṣayáḥ, marmáṇi fol. 22^{a}; saṃdhayaḥ fol. 24^{a}; siráḥ fol. 25^{a}; snáyavaḥ fol. 26^{a}; dhamanyaḥ fol. 26^{b}; kaṇḍaráḥ fol. 27^{a}; randhráṇi, srotánsi, jáláni, kúrcháḥ, rajjavaḥ, sevanyaḥ, saṃghátáḥ, ṣímantáḥ fol. 28^{a}; tvachaḥ, lománi, lomakúpáḥ fol. 28^{b}. Denique de partu exponit, usque ad finem capitis fol. 31^{a}. *Caput tertium*. De infantibus curandis. De septem hominum temperamentis fol. 34^{b}. *Capite quarto* de diaeta agitur, usque ad fol. 49^{a}. *Quinto* materia medica accuratissime traditur. Partes singulae hae: vyádher lakshaṇam; chikitsá; dravyaparíkshá fol. 55^{b}; pratinidhiḥ (medicamentis substituenda); dravyagatam padárthapanchakam (rasa, guṇa, vírya, vipáka, ṣakti) fol. 57^{b}; harítakyádidravyaguṇáḥ fol. 61^{b}; mánsavargaḥ fol. 111^{b}; mánsasya prakáráḥ fol. 119^{b}; kṛitánnavargaḥ fol. 120^{a}; várivargaḥ fol. 123^{a}; dugdhavargaḥ fol. 126^{a}; dadhivargaḥ fol. 128^{a}; takravargaḥ fol. 129^{a}; navanítam, ghṛitam fol. 129^{b}; mútravargaḥ; tilatailaguṇáḥ fol. 130^{b}; saṃdhánavargaḥ fol. 131^{b}; madhuvargaḥ fol. 133^{a}; ikshuvargaḥ fol. 134^{a}; anekárthanámavargaḥ fol. 135^{a}; mánaparibháshá fol. 137^{b}; bheshajánáṃ vidhánáni fol. 138^{b}; dhátúnáṃ ṣodhanamáraṇavidhiḥ fol. 141^{b}; puṭaprakáráḥ, yantraprakáráḥ fol. 143^{a}; dravyáṇáṃ guṇavattávidhiḥ; snehapánavidhiḥ fol. 153^{a}; pancha karmáṇi (vamana, vireka, anuvásana, nirúha, návana) fol. 153^{b}; dhúmapánavidhiḥ fol. 162^{b}; pratisáraṇam; svedavidhiḥ fol. 164^{a}; álepavidhiḥ fol. 166^{a}; piṇḍívidhiḥ fol. 168^{a}; tarpaṇavidhiḥ fol. 168^{b}; puṭapákavidhiḥ fol. 169^{a}; ropaṇí vartiḥ, ropaṇí rasakriyá fol. 170^{a}; ropaṇaṃ chúrṇam; snehanaṃ chúrṇam; pratyanjanavidhiḥ fol. 170^{b}; bheshajabhakshaṇasamayáḥ fol. 171^{b}. *Capite sexto*[1] nosologia, et therapia, sectione ultima *vájíkaraṇam* tractatur.

Auctores et libros Bháva hos laudat: *Kárttika* fol. 189^{b}; *Kusumávalí* 176^{b}; *Gadádhara* 189^{b}. 207^{a}; *Chakradatta* 187^{a}; *Charaka*; *Jejjaṭa* (quod nomen e Jaijjata, Jaiyyaṭa, corruptum videtur); *Dhanvantarinighaṇṭu*[2]: *Bhoja* 15^{b} (पंच पेशीशतान्येव etc.). 18^{a} (धातो रसादौ मज्जांते etc.). 40^{a} (गुरूणामर्धसौहित्यं etc.). 47^{a} (पिबति पर्युषितं जलमन्वहं तिमिरिणीचरमप्रहरे यदि); *Madanapála* 170^{b}. 245^{b}; *Rasapradípa* 13^{b}. 142^{b}. 253^{b}; *Rasaratnapradípa* 192^{a}. 253^{b}; *Rasámṛita* 100^{b}; *Rasendrachintámaṇi* 253^{b}; *Vangasena* 186^{a}. 248^{b}; *Vágbhaṭa*; *Vṛiddhavágbhaṭa* 11^{a}. 35^{a}; *Viṣvámitra* 442^{a}; *Vṛindaṭíká* 197^{b}; *Sárngadhara* 22^{a}. 28^{a}. 187^{a}. 189^{a}. 192^{a}; *Suṣruta*; *Vṛiddhasuṣruta* 125^{b}. 222^{b}; *Hárita*. Quorum in numero Suṣrutae, Vágbhaṭae, Charakae plurima debet, res vero ab iis traditas melius disposuit, et terminos technicos permultos explicavit. Quae in opere '*Wise*, Commentary on the Hindu System of Medicine' traduntur, maximam partem ex Bhávaprakáṣa nec tamen satis accurate excerpta sunt.

De codice Havniensi cf. Westergaard Catal. p. 104. Codex anno 1824 exaratus est. (WILSON 294.)

[1] Hoc caput in sectiones (khaṇḍa) tres divisum est.
[2] Cf. *Bhímasenena* nirmitam prapánakam 122^{a}.

744.

Foll. 10–59. Linn. 20. *Bhávaprakáṣae* capita quatuor prima, et quinti initium. (B.)

I. fol. 16^b; II. fol. 41^a; III. fol. 45^a; IV. fol. 59^a.

Haec folia post annum 1816 exarata sunt. (WILSON 292^b.)

745.

Lit. Bengal. Charta Ind. Foll. 92. Long. $16\frac{1}{2}$. Lat. $5\frac{1}{2}$. Linn. 6.

Rugviniṣchayas, quo libro *Mádhavas*, Indukarae filius, octoginta morborum causas et symptomata (diagnosin) adumbravit. (A.) Incipit:

प्रणम्य जगदुत्पत्तिस्थितिसंहारकारणं ।
स्वर्गापवर्गयोर्द्वारं त्रैलोक्यशरणं शिवं ॥१॥
नानामुनीनां वचनैरिदानीं समासतः सद्भिषजां नियोगात् ।
सोपद्रवारिष्टनिदानलिङ्गो निवध्यते रोगविनिश्चयोऽयं ॥२॥
नानातन्त्रविहीनानां भिषजामल्पमेधसां ।
सुखं विज्ञातुमातङ्कमयमेव भविष्यति ॥३॥

निदानं पूर्वरूपाणि रूपाण्युपशयस्तथा । संप्राप्तिश्चेति विज्ञानं रोगाणां पंचधा स्मृतं ॥४॥[1] निमित्तहेत्वायतनप्रत्ययोत्थानकारणैः । *nidánam* áhuḥ paryáyaiḥ. *Prágrúpaṃ* येन लक्ष्यते ॥५॥ उत्पित्सुरामयो दोषविशेषेणानधिष्ठितः । लिंगमव्यक्तमल्पत्वाद्व्याधीनां तद्यथायथं ॥६॥ tad eva (i. e. púrvarúpam) *vyaktatáṃ* yátaṃ *rúpam* इत्यभिधीयते । संस्थानं व्यंजनं लिंगं लक्षणं चिह्नमाकृतिः ॥७॥[2] हेतुव्याधिविपर्यस्तविपर्यस्तार्थकारिणां । औषधान्नविहाराणामुपयोगं सुखावहं ॥८॥ vidyád *upaṣayaṃ* व्याधेः स हि सात्म्य इति स्मृतः । विपरीतोऽनुपशयो व्याध्यसात्म्याभिसंज्ञितः ॥९॥ यथादुष्टेन दोषेण यथा चानुविसर्पता । निर्वृत्तिरामस्यासौ *sampráptir* जातिरागतिः ॥१०॥

Morbos singulos hoc ordine disposuit: 1. *jvara*, febris. Incipit: दक्षापमानसंक्रुद्धरुद्रनिःश्वाससंभवः । ज्वरोऽष्टधा पृथग्द्वंद्वसंघातागंतुजः स्मृतः ॥१॥ मिथ्याहारविहाराभ्यां दोषा ह्यामाशयाश्रयाः । वहिर्निरस्य कोष्ठाग्निं ज्वरदाः स्यू रसानुगाः ॥२॥ स्वेदावरोधः संतापः सर्वांगग्रहणं तथा । युगपद्यत्र रोगेषु स ज्वरो व्यपदिश्यते ॥३॥ 2. *atísára*, dysenteria: गुर्वतिस्निग्धरूक्षोष्णद्रवस्थूलातिशीतलैः । विरुद्धाध्यशनाजीर्णैरसात्म्यैश्चातिभोजनैः ॥१॥ स्नेहाद्यैरतियुक्तैश्च मिथ्यायुक्तैर्विषैर्भयैः । शोकदुष्टांबुमद्यातिपानैः सात्म्यर्तुपर्ययैः ॥२॥ जलातिरमणैर्वेगविघातैः कृमिदोषतः । नृणां भवत्यतीसारो लक्षणं तस्य वक्ष्यते ॥३॥ 3. *grahaṇíroga*, diarrhoea: अतीसारे निवृत्तेऽपि मंदाग्नेरहिताशिनः । भूयः संदूषितो वह्निर्ग्रहणीमभिदूषयेत् ॥१॥ एकैकशः सर्वशश्च दोषैरत्यर्थमूर्छितैः । सा दुष्टा बहुशो भुक्तमाममेव विमुंचति ॥२॥ पक्वं वा सरुजं पूति मुहुर्वद्धं मुहुर्द्रवं । ग्रहणीरोगमाहुस्तमायुर्वेदविदो जनाः ॥३॥ 4. *arṣas*, haimorrhois: पृथग्दोषैः समस्तैश्च शोणितात्सहजानि च । अर्शांसि षट्प्रकाराणि विद्याद्गुदवलित्रये ॥१॥ दोषास्त्वङ्मांसमेदांसि संदूष्य विविधाकृतीन् । मांसांकुरानपानादौ कुर्वंत्यर्शांसि तान्जगुः ॥२॥ 5. *agnimándya* (dyspepsy), 6. *ajírṇa* (indigestion), 7. *vishúchiká* (cholera), 8. *alasaka* (drum-belly), 9. *vilambiká* (constipation)[3]: मंदस्तीक्ष्णोऽथ विषमः समश्चेति चतुर्विधः । कफपित्तानिलाधिक्यात्तत्साम्याज्जाठरोऽनलः ॥१॥ विषमो वातजान्रोगांस्तीक्ष्णः पित्तसमुद्भवान् । करोत्यग्निस्तथा मंदो विकारान्कफसंभवान् ॥२॥[4] 10 (fol. 14^a = B. 55^a = C. 17^a) *kṛimi*, vermes: कृमयस्तु द्विधा प्रोक्ता वाह्याभ्यंतरभेदतः । वहिर्मलासृग्विड्जन्मभेदाच्चतुर्विधाः ॥१॥ 11. *páṇḍu*, icterus: पांडुरोगाः स्मृताः पंच वातपित्तकफैस्त्रयः । चतुर्थः संनिपातेन पंचमो भक्षणान्मृदः ॥१॥ व्यवायमम्लं[5] लवणानि मद्यं मृदं दिवास्वापमतीव तीक्ष्णं । निषेवमाणस्य प्रदूष्य रक्तं दोषास्त्वचं पांडुरतां नयंति ॥२॥ Hujus morbi species duae 12. *kámalá* (kumbhakámalá) et 13. *halímaka* exstant. 14. *raktapitta*, haemorrhagia: घर्मव्यायामशोकाध्वव्यवायैरतिसेवितैः । तीक्ष्णोष्णक्षारलवणैरम्लैः कटुभिरेव च ॥१॥ पित्तं विदग्धं स्वगुणैर्विदहत्याशु शोणितं । ततः प्रवर्तते रक्तमूर्ध्वं वाधो द्विधापि वा ॥२॥ ऊर्ध्वं नासाक्षिकर्णास्यैर्मेढ्रयोनिगुदैरधः । कुपितं रोमकूपैस्तु समस्तैस्तत्प्रवर्तते ॥३॥ 15. *rájayakshman*, phthisis pulmonalis: वेगरोधात्क्षयाच्चैव साहसाद्विषमाशनात् । त्रिदोषो जायते यक्ष्मा गदो हेतुचतुष्टयात् ॥१॥ कफप्रधानैर्दोषैस्तु रुद्धेषु रसवर्त्मसु । अतिव्यवायिनो वापि क्षीणे रेतस्यनंतराः । क्षीयंते धातवः सर्वे ततः शुष्यति मानवः ॥२॥ 16. *kása*, tussis: धूमोपघाताद्रजसस्तथैव व्यायामरूक्षान्ननिषेवणाच्च । विमार्गगत्वादथ भोजनस्य वेगावरोधात्क्षवथोस्तथैव ॥१॥ प्राणो ह्युदानानुगतः प्रदुष्टः संभिन्नकांस्यस्वनतुल्यघोषः । निरेति वक्त्रात्सहसा स दोषो मनीषिभिः कास इति प्रदिष्टः ॥२॥ 17. *hikká*, singultus: विदाहिगुरुविष्टंभिरूक्षाभिष्यंदिभोजनैः । शीतपानाशनस्थानरजोधूमातपानिलैः ॥१॥ व्यायामकर्मभाराध्ववेगाघातापतर्पणैः । हिक्का श्वासश्च कासश्च नृणां समुपजायते ॥२॥ मुहुर्मुहुर्वायुरुदेति सस्वनो यकृत्प्लिहांत्राणि मुखादि वाक्षिपन् । स घोषवानाशु हिनस्त्यसून्यतस्ततस्तु हिक्केत्यभिधीयते बुधैः ॥३॥ 18. *ṣvása*, asthma: महोर्ध्वच्छिन्नतमकक्षुद्रभेदैस्तु पंचधा । भिद्यते स महाव्याधिः श्वास एको विशेषतः ॥१॥ प्राग्रूपं तस्य हृत्पीडा शूलमाध्मानमेव च । आनाहो वक्त्रवैरस्यं शंखनिस्तोद एव च ॥२॥ यदा स्रोतांसि संरुध्य मारुतः कफपूर्वकः । विष्वग्व्रजति संरुद्धस्तदा श्वासान्करोति सः ॥३॥ 19. *svarabheda*, raucitas: अत्युच्चभाषणविषाध्ययनाभिघातसंदूषणैः प्रकुपिताः पवनादयस्तु । स्रोतःसु ते स्वरवहेषु गताः प्रतिष्ठां हन्युः स्वरं भवति चापि हि षड्विधः सः ॥१॥ 20 (fol. 22^b = 81^b = 28^b). *arochaka*, nausea: वातादिभिः शोकभयातिलोभक्रोधैर्मनोघ्नाशनरूपगंधैः । अरो-

---

[1] Quae sequuntur, collatis codicibus B. C. et commentarii ope emendata sunt.

[2] Haec sex vocabula *rúpae* synonyma sunt.

[3] Nomina uncis inclusa e Wisei libro extracta sunt.

[4] In codice C. *bhasmaka* (bulimy) additur.

[5] व्यायाममम्लं A.

चक्राः स्युः ॥ 21. *chhardi*, vomitus: दुष्टैर्दोषैः पृथक्सर्वैर्वीभत्सालोकनादिभिः । छर्दयः पंच विज्ञेयास्तासां लक्षणमुच्यते ॥१॥ 22. *tṛishṇá*, sitis: भयश्रमाभ्यां बलसंक्षयाद्वा ऊर्ध्वं चितं पित्तविवर्धनैश्च । पित्तं सवातं कुपितं नराणां तालुप्रपन्नं जनयेत्पिपासां ॥१॥ 23. *múrchhá*, animi defectus: क्षीणस्य बहुदोषस्य विरुद्धाहारसेविनः । वेगाघातादभिघाताद्धीनसत्वस्य वा पुनः ॥१॥ करणायतनेषूग्रा बाह्येष्वभ्यंतरेषु च । निवसंति यदा दोषास्तदा मूर्छंति मानवाः ॥२॥ संज्ञावहासु नाडीषु पिहितास्वनिलादिभिः । तमोऽभ्युपैति सहसा सुखदुःखव्यपोहकृत् ॥३॥ सुखदुःखव्यपोहाच्च नरः पतति काष्ठवत् । मोहो मूर्छेति तामाहुः षड्विधा सा प्रकीर्तिता ॥४॥ 24. *madátyaya*, ebrietas: ये विषस्य गुणाः प्रोक्तास्ते मद्येऽपि प्रतिष्ठिताः । तेन मिथ्योपयुक्तेन भवत्युग्रो मदात्ययः ॥१॥ किंतु मद्यं स्वभावेन यथैवान्नं तथा स्मृतं । अयुक्तियुक्तं रोगाय युक्तियुक्तं यथामृतं ॥२॥ 25. *dáha*, aestus: त्वचं प्राप्तः स पानोष्मा पित्तरक्ताभिमूर्छितः । दाहं प्रकुरुते घोरं पित्तवत्तत्र भेषजं ॥१॥ 26. *unmáda*, insania, et 27. *bhútonmáda*, furor lymphaticus: मदयंत्युद्धता दोषा यस्मादुन्मार्गमागताः । मानसोऽयमतो व्याधिरुन्माद इति कीर्तितः ॥१॥ एकैकशः सर्वशश्च दोषैरत्यर्थमूर्छितैः । मानसेन च दुःखेन स पंचविध उच्यते ॥२॥ विषाद्भवति षष्ठश्च यथास्वं तत्र भेषजं । स चाप्रवृद्धस्तरुणो मदसंज्ञां बिभर्ति हि ॥३॥ 28. *apasmára*, morbus comitialis: तमःप्रवेशसंरंभो दोषोद्रेकहतस्मृतिः । अपस्मार इति ज्ञेयो गदो घोरश्चतुर्विधः ॥१॥ हृत्कंपः शून्यता स्वेदो ध्यानं मूर्छा प्रमूढता । निद्रानाशश्च तस्मिंस्तु भविष्यति भवत्यथ etc. ॥२॥ 29. *vátavyádhi* (nervous diseases): रूक्षशीताल्पलघ्वन्नव्यवायातिप्रजागरैः । विषमादुपचाराच्च दोषासृक्स्रवणादपि ॥१॥ लंघनप्लवनात्यध्वव्यायामातिविचेष्टितैः । धातूनां संक्षयाच्चिंताशोकरोगादिकर्षणात् ॥२॥ वेगसंधारणादामादभिघातादभोजनात् । मर्मबाधाद्गजोष्ट्राश्वशीघ्रयानापतंसनात् ॥३॥ देहे स्रोतांसि रिक्तानि पूरयित्वानिलो बली । करोति विविधान्व्याधीन्सर्वांगैकांगसंश्रितान् ॥४॥ 30 (fol. $34^b = 119^b = 44^a$). *vátavyádhi* (cf. Wise, p. 266): लवणाम्लकटुक्षारस्निग्धोष्णाजीर्णभोजनैः । क्लिन्नशुष्कांबुजानूपमांसपिण्याकमूलकैः ॥१॥ कुलत्थमाषनिष्पावशाकादिपललेक्षुभिः । दध्यारनालसौवीरशुक्ततक्रसुरासवैः ॥२॥ विरुद्धाध्यशनक्रोधदिवास्वप्नप्रजागरैः । प्रायशः सुकुमाराणां मिथ्याहारविहारिणां । स्थूलानां सुखिनां चापि कुप्यते वातशोणितं ॥३॥ 31 (*úrustambha*, paralysis of the lower extremities, Wilson; cf. Wise, p. 390): शीतोष्णद्रवसंशुष्कगुरुस्निग्धैर्निषेवितैः । जीर्णाजीर्णे तथायाससंक्षोभस्वप्नजागरैः ॥१॥ सश्लेष्ममेदःपवनमाममत्यर्थसंचितं । अभिभूयेतरं दोषमूरू चेत्प्रतिपद्यते ॥२॥ सक्थ्यस्थिनी प्रपूर्यांतः श्लेष्मणा स्तिमितेन च । तदा स्तभ्नाति तेनोरू स्तब्धौ शीतावचेतनौ ॥३॥ 32. *ámavāta* (acute rheumatism): विरुद्धाहारचेष्टस्य मंदाग्नेर्निश्चलस्य च । स्निग्धं भुक्तवतो ह्यन्नं व्यायामं कुर्वतस्तथा ॥१॥ वायुना प्रेरितो ह्यामः श्लेष्मस्थानं प्रधावति । तेनात्यर्थं विदग्धोऽसौ धमनीः प्रतिपद्यते ॥२॥ वातपित्तकफैर्भूयो दूषितः सोऽन्नजो रसः । स्रोतांस्यभिष्यंदयति नानावर्णोऽतिपिच्छलः ॥३॥ 33. *ṣúla*, dolor colicus: (अनंगनाशाय हरस्त्रिशूलं etc. ॥१॥ स विष्णुहुंकारविमोहितात्मा etc. ॥२॥) दोषैः पृथक्समस्तामद्वंद्वैः शूलोऽष्टधा भवेत् । सर्वेष्वेतेषु शूलेषु प्रायेण पवनः प्रभुः ॥३॥ 34. *udávarta* (retention of discharges): वातविण्मूत्रजृंभाश्रुक्षवोद्गारवमींद्रियैः । क्षुत्तृष्णोच्छ्वासनिद्राणां धृत्योदावर्तसंभवः ॥१॥ Huic 35. *ánáha* (Wise, p. 353) adjungitur. 36. *gulma* (swellings in the abdomen): दुष्टा वातादयोऽत्यर्थं मिथ्याहारविहारतः । कुर्वंति पंचधा गुल्मं कोष्ठांतर्ग्रंथिरूपिणं ॥१॥ तस्य पंचविधं स्थानं पार्श्वे हृन्नाभिवस्तयः । हृन्नाभ्योरंतरे ग्रंथिः संचारी यदि वाचलः । वृत्तश्च योऽपचयवान्स गुल्म इति कीर्तितः ॥२॥ 37. *hṛidroga*, cardialgia: अत्युष्णगुर्वम्लकषायतिक्तश्रमाभिघाताध्यशनप्रसंगैः । संचिंतनैर्वेगविधारणैश्च हृदामयः पंचविधः प्रदिष्टः ॥१॥ दूषयित्वा रसं दोषा विगुणा हृदयं गताः । हृदि बाधां प्रकुर्वंति हृद्रोगं तं प्रचक्षते ॥२॥ 38. *mútrakṛichhra*, stranguria: व्यायामतीक्ष्णौषधरूक्षमद्यप्रसंगनित्यद्रुतपृष्ठयानात् । आनूपमांसाध्यशनादजीर्णात्स्युर्मूत्रकृच्छ्राणि नृणां तथाष्टौ ॥१॥ पृथङ्मलाः स्वैः कुपिता निदानैः सर्वेऽथवा कोपमुपेत्य बस्तौ । मूत्रस्य मार्गं परिपीडयंति यदा तदा मूत्रयतीह कृच्छ्रात् ॥२॥ 39. *mútrágháta* (Wise, p. 364): जायंते कुपितैर्दोषैर्मूत्राघातास्त्रयोदश । प्रायो मूत्रविघाताद्यैर्वातकुंडलिकादयः ॥१॥ 40 (fol. $43^b = 145^b = 54^a$). *aṣmarí*, calculus: वातपित्तकफैस्तिस्रश्चतुर्थी शुक्रजा परा । प्रायः श्लेष्माश्रयाः सर्वा अश्मर्यः स्युर्यमोपमाः ॥१॥ 41–43. *prameha* (Wise, p. 359), *madhumeha, piḍiká*: आस्यासुखं स्वप्नसुखं दधीनि ग्राम्यौदकानूपरसः पयांसि । नवान्नपाने गुडमैक्षवं च प्रमेहहेतुः कफकृच्च सर्वं ॥१॥ 44. *medas*, obesitas: अव्यायामदिवास्वप्नश्लेष्मलाहारसेविनः । मधुरोऽन्नरसः प्रायः स्नेहान्मेदो विवर्धयेत् ॥१॥ मेदसावृतमार्गत्वात्पुष्यंत्यन्ये न धातवः । मेदस्तु चीयते तस्मादशक्तः सर्वकर्मसु ॥२॥ 45. *udara*, uteri inflatio: रोगाः सर्वेऽपि मंदाग्नौ सुतरामुदराणि च । अजीर्णान्मलिनैरन्नैर्जायंते मलसंचयात् ॥१॥ रुद्ध्वा स्वेदांबुवाहीनि दोषाः स्रोतांसि संचिताः । प्राणाग्न्यपानान्संदूष्य जनयंत्युदरं नृणां ॥२॥ 46. *ṣotha*, tumor: रक्तपित्तकफान्वायुर्दुष्टो दुष्टान्बहिःसिराः । नीत्वा रुद्धगतिस्तैर्हि कुर्यात्त्वङ्मांससंश्रयं । सोत्सेधं संहतं शोथं तमाहुर्निश्चयादतः ॥१॥ 47. *vṛiddhi* (Wise, p. 370): क्रुद्धोऽनूर्ध्वगतिर्वायुः शोथशूलकरश्चरन् । मुष्कौ वंक्षणतः प्राप्य फलकोषाभिवाहिनीः । प्रपीड्य धमनीर्वृद्धिं करोति फलकोषयोः ॥१॥ 48. *galagaṇḍa*, struma: निबद्धः श्वयथुर्यस्य मुष्कवल्लंबते गले । महान्वा यदि वा ह्रस्वो गलगंडं तमादिशेत् ॥१॥ वातः कफश्चापि गले प्रदुष्टो मन्ये तु संसृत्य तथैव मेदः । कुर्वंति गंडं क्रमशः स्वलिंगैः समन्वितं तं गलगंडमाहुः ॥२॥ Eodem capite 49. *gaṇḍamálá* (scrofulous swellings), 50. *granthi*, 51. *apachí*, 52. *arbuda* tractantur. 53. *ṣlípada*, elephantiasis: यः सज्वरो वंक्षणतो भृशार्तिः शोथो नृणां पादगतः क्रमेण । तच्छ्लीपदं स्यात्करकर्णनेत्रशिश्नौष्ठनासास्वपि केचिदाहुः ॥१॥ 54. *vidradhi*: त्वग्रक्तमांसमेदांसि प्रदूष्यास्थिसमाश्रिताः । दोषाः शोफं शनैर्घोरं जनयंत्युच्छ्रिता भृशं ॥१॥ महामूलरुजावंतं वृत्तं वाप्यथवायतं । स विद्रधिरिति ख्यातो विज्ञेयः

षड्विधश्च सः ॥२॥ 55–59. de variis ulceribus et tuberibus. 55. *vranaśotha* (Wise, p. 187): एकदेशोत्थितः शोथो व्रणानां पूर्वलक्षणं । षड्विधः स्यात्पृथक्सर्वैर्दोषैस्तागंतुकस्तथा ॥१॥ शोथाः षडेते विज्ञेयाः प्रागुक्तैः शोथलक्षणैः । विशेषः कथ्यते तेषां पक्वापक्वविनिश्चये ॥२॥ 56. *śárîravraṇa:* द्विधा व्रणः परिज्ञेयः शारीरागंतुभेदतः । दोषैराद्यस्तयोरन्यः शस्त्रादिक्षतसंभवः ॥१॥ 57. *sadyovraṇa:* नानाधारामुखैः शस्त्रैर्नानास्थाननिपातितैः । भवंति नानाकृतयो व्रणास्तांस्तान्निबोध मे ॥१॥ छिन्नं भिन्नं तथा विद्धं क्षतं पिच्चितमेव च । घृष्टमाहुस्तथा षष्ठं तेषां वक्ष्यामि लक्षणं ॥२॥ 58. *bhagnavraṇa:* भग्नं समासाद्द्विविधं वदंति कांडे च संधौ च हि तत्र संधौ । उत्पिष्टविश्लिष्टविवर्तितं च तिर्यग्गतं क्षिप्तमधश्च षोढा ॥१॥ 59. *nádîvraṇa:* यः शोफमाममतिपक्वमुपेक्षतेऽज्ञो यो वा व्रणं प्रचुरपूयमसाधुवृत्तः । अभ्यंतरं प्रविशति प्रविदार्य तस्य स्थानानि पूर्वविहितानि ततः सपूयः ॥१॥ 60 (fol. $58^a = 189^b = 73^b$). *bhagandara* (Wise, p. 388): गुदस्य द्व्यंगुले क्षेत्रे पार्श्वतः पिडकार्तिकृत् । भिन्ना भगंदरो ज्ञेयः स च पंचविधो मतः ॥१॥ 61. *upadanśa* (Wise, p. 373): हस्ताभिघातान्नखदंतघातादधावनादत्युपसेवनाद्वा । योनिप्रदोषाच्च भवंति शिश्ने पंचोपदंशा विविधापचारैः ॥१॥ 62. *śúkadosha* (Wise, p. 380): अक्रमाच्छेफसो वृद्धिं योऽभिवांछति मूढधीः । व्याधयस्तस्य जायंते दश चाष्टौ च शूकजाः ॥१॥ 63. *kushṭha*, lepra: विरोधीन्यन्नपानानि द्रवस्निग्धगुरूणि च । भजतामागतां छर्दिं वेगांश्चान्यान्प्रतिघ्नतां ॥१॥ etc. 64–66. *śítapitta, udarda, koṭha* (Wise, p. 269): शीतमारुतसंस्पर्शात्प्रदुष्टौ कफमारुतौ । पित्तेन सह संभूय बहिरंतर्विसर्पतः ॥१॥ पिपासारुचिहृल्लासदेहसादांगगौरवं । रक्तलोचनता तेषां पूर्वरूपस्य लक्षणं ॥२॥ 67. *amlapitta* (Wise, p. 353): विरुद्धदुष्टाम्लविदाहिपित्तप्रकोपिपानान्नभुजो विदग्धं । पित्तं स्वहेतूपचितं पुरा यत्तदम्लपित्तं प्रवदंति संतः ॥१॥ 68. *visarpa* (erysipelas): लवणाम्लकटूष्णादिसेवनाद्दोषकोपतः । विसर्पः सप्तधा ज्ञेयः सर्वतः परिसर्पणात् ॥१॥ 69. *visphoṭa*, pustula: कट्वम्लतीक्ष्णोष्णविदाहिरूक्षक्षारैरजीर्णाध्यशनातपैश्च । तथर्तुदोषेण विपर्ययेण कुप्यंति दोषाः पवनादयस्तु ॥१॥ त्वचमाश्रित्य ते रक्तं मांसास्थीनि प्रदूष्य च । घोरान्कुर्वंति विस्फोटान्सर्वान् ज्वरपुरःसरान् ॥२॥ 70 (fol. $65^b = 209^b = 83^a$). *masúriká*, variolae: कट्वम्ललवणक्षारविरुद्धाध्यशनाशनैः । दुष्टनिष्पावशाकाद्यैः प्रदुष्टपवनोदकैः ॥१॥ क्रूरग्रहेक्षणाच्चापि देशे दोषाः समुद्धताः । जनयंति शरीरेऽस्मिन्दुष्टरक्तेन संगताः । मसूराकृतिसंस्थानाः पिटकाः स्युर्मसूरिकाः ॥२॥ 71. *kshudraroga*, de quadraginta morbis minoribus (Wise, p. 412): स्निग्धा सवर्णा ग्रथिता नीरुजा मुद्गसंनिभा । कफवातोत्थिता ज्ञेया बालानामजगल्लिका ॥१॥ etc. (Suśruta I, 292.) 72. *mukharoga*, oris morbi sexaginta quinque: कर्कशौ परुषौ स्तब्धौ संप्राप्तानिलवेदनौ । दाल्येते परिपाल्येते ओष्ठौ मारुतकोपतः etc. 73. *karṇaroga*, triginta tres aurium morbi: समीरणः श्रोत्रगतोऽन्यथा चरन् समंततः शूलमतीव कर्णयोः । करोति दोषैश्च यथास्वमावृतः स कर्णशूलः कथितोऽतिकष्टः ॥१॥ 74. *násároga*, triginta et unus nasi morbi: आनह्यते यस्य विशुष्यते च प्रक्लिद्यते धूप्यति चापि नासा । न वेत्ति यो गंधरसांश्च जंतुर्जुष्टं व्यवस्येत्तमपीनसेन ॥१॥ 75. *netraroga*, oculorum morbi: उष्णाभितप्तस्य जलप्रवेशाद्दूरेक्षणात्स्वप्नविपर्ययाच्च । स्वेदाद्रजोधूमनिषेवणाच्च छर्देर्विघातादमनातियोगात् ॥१॥ द्रवान्नपानातिनिषेवणाच्च विण्मूत्रसंधानिलसंग्रहाच्च । प्रसक्तसंरोदनशोककोपाच्छिरोभिघातादतिमद्यपानात् ॥२॥ तथा ऋतूनां च विपर्ययेण क्लेशाभिघातादतिमैथुनाच्च । वाष्पग्रहात्सूक्ष्मनिरीक्षणाच्च नेत्रे विकाराञ्जनयंति दोषाः ॥३॥ 76. *śiroroga*, capitis dolor: शिरोरोगास्तु जायंते वातपित्तकफैस्त्रिभिः । संनिपातेन रक्तेन क्षयेण कृमिभिस्तथा ॥१॥ 77. de mulierum morbis. 78. *bálaroga*, infantium morbi. 79. *visha*, de venenis: स्थावरं जंगमं चैव द्विविधं विषमुच्यते । मूलाद्यात्मकमाद्यं स्यात्परं सर्पादिसंभवं ॥१॥ निद्रां तंद्रां क्लमं दाहं संपाकं लोमहर्षणं । शोफं चैवातिसारं च कुरुते जंगमं विषं ॥२॥

Codex post annum 1815 exaratus est. (Wilson 42.)

746.

Lit. Devan. Charta Ind. Foll. 283. Long. 11. Lat. 5. Linn. 10, 11.

Mádhavae Rugviniśchayas, cum commentario, *Átankadarpaṇa* appellato, quem Vaidya-*Váchaspatis*, Pramodae filius, composuit. Scholiasta his versibus praefatur: तुलशीकुसुमं दधत्तमालप्रतिमं वल्लवगोपवल्लप्रसक्तं किमपि त्रिभुवनैकमूलकंदं परमानंदमहं महः स्मरामि १ Śrí-*Hammíra*-nareśvaraḥ समभवत्प्रौढप्रतापानलज्वालाजालकरालदग्धपवनप्राग्भारशुष्केंधनः यस्य क्षौतुसभांगणेष्वपि यशः स्वर्लोककल्लोलिनीकल्लोलामलमंगनाः सुमनसां गायंति रोमांचिताः २ प्रत्यर्थिक्षितिनाथसार्थ etc. ॥३॥ तस्याभवद्वैद्यवरः प्रभूतविश्वासपात्रं विदितश्चरित्रैः प्रमोदनामा सकलप्रमोदी कलाविलासैकनिधिर्द्विजेंद्रः ४ ज्येष्ठो भवत्तस्य सुतः प्रशस्तः शास्त्रार्थवेत्ता शिवशक्तिचेताः *Rauśarma*-námná प्रथितः कलाभिर् *Mahammada*-kshoṇipateḥ sabháyám ५ अन्यो पि तस्यास्ति सुतः कनीयान् वाचस्पति सत्वगुणैकसंगतिः महोदयाः प्रीतिमतः समस्ता यं वैद्यविद्याः स्वयमभ्यजीगमन् ६ भृगुवचनविकारैश्चारुचंचच्चरित्रैश्चरकचतुरचेताः सुश्रुते सुश्रुतो यः कपिलमतिवयस्यैर्ब्रह्मविद्यारहस्यैः प्रकटितषट्बुद्धिवृद्धिकाणादसिद्धः ७ तेनोज्ज्वला विवृतिरल्पधियां हिताय संबध्यते विबुधमाधवसंग्रहस्य विज्ञाय तार्किकवरैकविचारवेद्यं वैषम्यगुंफणवशान्मधुकोषवंधं ८ ॥

Praeter medicos antiquiores hos fere auctores laudat: *Kárttika* fol. 118^b. 235^a; *Gadádhara* 34^a. 95^b; *Gayadása* 118^b. 133^b; *Jagadvaidyaka* 10^b; *Jejjaṭa* 118^b. 122^a. 133^b; *Dṛiḍhabala* 94^a. 122^a. 145^b; *Bhoja* 95^b. 167^b. 168^b. 190^a. 221^b; *Videha* 11^a. 82^a. 230^b.

Codex post annum 1790 parum accurate exaratus est. (Walker 143.)

747.

Opera tria. Lit. Devan. Charta Ind. Foll. 217. Long. 11. Lat. $4\frac{1}{2}$.

Foll. 1–123. Linn. 8, 9. *Rugvinişchayae* textus. (C.) Hoc apographon multis distichis additiciis interpolatum est.

De codice Havniensi cf. Westergaard, p. 104. Ex eodem opere fragmenta Berolinensia 954, 955. desumta sunt.

Haec voluminis pars anno 1670 a Narabhaṭalílára (Jávarágráme) exarata est. (Walker 182[a].)

748.

Lit. Devan. Charta Ind. Foll. 145. Long. $11\frac{1}{2}$. Lat. 6. Linn. 10.

Şárngadharasaṃhitá, quo libro *Şárngadharas*, Dámodarae filius, therapiam (chikitsásthánam) capitibus triginta duobus tractavit. Incipit:

श्रियं स दद्याद्भवतां पुरारिर्यदंगतेजःप्रसरे भवानी ।
विराजते निर्मलचंद्रिकायां महौषधीव ज्वलिता हिमाद्रौ ॥१॥
प्रसिद्धयोगा मुनिभिः प्रयुक्ताश्चिकित्सकैर्यैर्बहुशो नुभूताः ।
विधीयते शार्ङ्गधरेण तेषां सुसंग्रहः सज्जनरंजनाय ॥२॥

Opus in partes tres divisum est: *púrvakhaṇḍa*, capp. 1–7; *madhyamakhaṇḍa*, capp. 8–20; *uttarakhaṇḍa*, capp. 21–32. Capitibus sex primis auctor praecepta generalia e sútrasthána (1–4) et şárírasthána (5, 6) desumta tradit. 1. paribháshádhyáya. 2. bhaishajyakáloktidravyarasaguṇavíryavipákaşakty-ṛitushaṭkákhyánádhyáya. 3. náḍíparíkshánetraparíkshámútraparíkshádútágamanádişakunalakshaṇa-vaidyayátráşakunalakshaṇa-kálajnánanirúpaṇa. 4. dípanapáchanádiguṇoktividhi. 5. kaládikathana-sṛishṭikramakathana. 6 (inc. fol. 22[a]). áhároktigarbhotpattikumáraposhaṇoktiprakṛitilakshaṇákhyána. 7. rogagaṇanádhyáya. 8. svarasakalpaná. 9. kváthádikalpanáḍhyáya. 10. pháṇṭádikalpanádhyáya. 11 (fol. 43[b]). himakalpaná. 12. kalkakalpaná. 13. chúrṇakalpaná. 14. vaṭakádikalpaná. 15. avalehakalpaná. 16 (fol. 60[a]). ghṛitakalpaná. 17. tailakalpaná. 18. ásavárishṭakalpaná. 19. dhátúpadhátuşodhanamáraṇakalpaná. 20. rasakalpanávidhi. 21. snehapánavidhi. 22 (fol. 90[b]). svedavidhi. 23. vamanavidhi. 24. virechanavidhi. 25. nirúhavastividhi. 26 (fol. 100[a]). uttaravastividhi. 27. nasyavidhi. 28. dhúmapánavidhi. 29. gaṇḍúshakavalapratisáraṇavidhi. 30. lepamúrdhatailakarṇapúraṇavidhi. 31. şoṇitasrávavidhi. 32. netraprasádanakarma.

Operis epilogus hic: आयुर्वेदसमुद्रस्य गूढार्थमणिसंचयाः । ज्ञाताः कैश्चिद्बुधैस्तैस्तु कृता विविधसंहिताः ॥ किंचिदर्थं ततो नीत्वा कृतेयं संहिता मया । कृपाकटाक्षविक्षेपमस्यां कुर्वंतु साधवः ॥ विविधगदार्तिदरिद्रानाशनं या हरिरमणीव करोति योगरत्नैः । विलसतु शार्ङ्गधरस्य संहिता सा कविहृदयेषु सरोजनिर्मलेषु ॥ Foliis 122–145. index continetur.

Liber nuper Benaris editus esse dicitur. De codicibus Berolinensibus cf. Weber Catal. p. 281.

Codex anno 1801 exaratus est. (Wilson 293.)

749.

Foll. 118–122[a]. Capita tria, quorum primum et tertium e *Şárngadharasaṃhitá* excerpta sunt, secundum a *Malladeva* compositum est.

A. Fol. 118[b]. distt. 9. *Náḍíparíkshá*, de venarum pulsu tentando. Incipit: करस्यांगुष्ठमूले स्याद्धमनी जीवसाक्षिणी । तच्चेष्टया सुखं दुःखं ज्ञेयं कायस्य पंडितैः ॥१॥ नाडी धत्ते मरुत्कोपे जलौकासर्प्पयोर्गतिं । कुरंगकाकमंडूकगतिं पित्तप्रकोपतः ॥२॥

B. Fol. 119. distt. 25. *Kálajnánam*, a *Malladeva* compositum, quo aegrorum aut sanitatem recuperaturorum aut moriturorum indicia traduntur. Quae aut e corporis habitu, aut prodigiis et somniis colliguntur. Incipit:

महादेवं नमस्कृत्य सुरासुरनरार्चितं ।
धीमता मल्लदेवेन कालज्ञानं निगद्यते ॥१॥
आदौ वैद्येन विज्ञेयः साध्यासाध्यो गदस्तथा ।
सकलो निष्कलश्चापि जीवितं मरणं च यत् ॥२॥
सकलं कालहीनं च निष्कलं कालसंयुतं ।
इंद्रियाणां विकारेभ्यो मरणाशरणं भवेत् ॥३॥
सौम्यकांतिर्मतिश्चैव निमेषोन्मेषकारिणी ।
इत्थंभूता भवेद्रृष्टिः (bhaved dṛishṭiḥ) चिरं रोगी स जीवति ॥४॥

Desinit in disticho: इदमायुःप्रमाणं हि मल्लदेवेन भाषितं । यो न जानाति लोकेऽस्मिन् कथं वैद्यः स उच्यते ॥२५॥

C. Foll. 120–122[a]. distt. 48. *Mútraparíkshá*, de vesica inspicienda. Incipit: पश्चात् रजनीनामो घटिकानां चतुष्टये etc.

Haec folia exeunte seculo superiore exarata sunt. (Walker 137[f].)

750.

Lit. Devan. Charta Ind. Foll. 103. Long. $12\frac{1}{2}$. Lat. $4\frac{1}{2}$. Linn. 8.

Hoc codice liber medicinalis continetur, a *Vṛinda* compositus, quo remedia in morbis singulis adhibenda traduntur. Incipit:

ध्यात्वा शिवं परमतत्वविचारवेद्यं
    चंडीमभीष्टफलदां सगणं गणेसं ।
धन्वन्तरिं मुनिवरं मुनिसुस्रुतादी-
    नात्रेयमुग्रतपसं मनसा प्रणम्य ॥
नानामतप्रथित दृष्टफलप्रयोगैः
    प्रस्तावचाक्यसहितैरिह सिद्धियोगैः ।
वृंदेन मंदमतिनात्महिताय सम्यक्
    संलिप्यते गदविनिश्चयाः क्रमेण ॥

Codex quum in fine mancus sit, titulus ex opere ipso erui non potest, nisi forte e corrupto illo prooemii *gahaviniṣchayáḥ* librum *Agadaniṣchaya* inscriptum fuisse conjicere liceat. *Vágbhaṭam* et *Rájamártaṇḍam* auctor aliquoties laudat.

Codex, hoc seculo ineunte negligentissime exaratus, in medio capite *Sárameyachikitsá* desinit, neque tamen duobus foliis amplius videtur deesse. (Wilson 296.)

751.

Lit. Bengal. Charta Ind. Foll. 305. Long. 19. Lat. 4. Linn. 8.

Prayogámṛitam, de pharmacia liber, a *Vaidyachintámaṇi*, Vaidyaratnae et Durgae filio, Narasinhakavirájae discipulo, compositus. Incipit: तीरे तीरे तरणितनया etc.

गोविन्दचरणद्वन्द्वममन्दजलजं भजे ।
यत्र मन्दाकिनीवारि मकरन्दकणायते ॥
श्रीवैद्यरत्नात्मज एष यत्नात्
    श्रीवैद्यचिन्तामणिनामधेयः ।
प्रवन्धवन्धे विनयोपयोगैः
    Sadvaidya-*Vṛindaṃ* नमति प्रकामं ॥

Prooemio postquam auctor de metallis ad usus medicos praeparandis necnon de diagnosi (náḍíparíkshá, jihváparíkshá, mútraparíkshá) disseruit, morborum singulorum remedia copiosissime proponit, necnon venena et medicinas vires vitamque restaurantes tractat. Quare alteram medicinae partem (chikitsásthána, kalpasthána, uttarasthána) complexus est.

Capita singula in codice nostro parum accurate indicata sunt, quamobrem pauca tantum a me excerpta sunt: rasádijáraṇavidhi fol. 16ᵃ; mútraparíkshávidhi fol. 23ᵇ; vaidyapraṣansávidhi fol. 24ᵃ; jvarachikitsá fol. 53ᵃ; atísára fol. 55ᵃ; grahaṇí fol. 65ᵃ; arṣas fol. 71ᵃ; ajírṇa fol. 76ᵃ; krimiroga fol. 77ᵃ; páṇḍuroga-kámalá-halímaka fol. 79ᵇ; raktapitta fol. 82ᵃ; rájayakshma-kshata-kshíṇa fol. 92ᵇ; kása fol. 96ᵃ; hikká fol. 96ᵇ; ṣvása fol. 99ᵇ; arochaka fol. 100ᵇ; múrchhá-bhrama-tandrá-nidrá-saṃnyása fol. 102ᵇ; dáha fol. 103ᵃ; unmáda fol. 105ᵇ; vátaroga fol. 129ᵃ; krimisútra fol. 132ᵃ; uraḥstambha fol. 132ᵇ; ámaváta fol. 138ᵇ; ṣúla fol. 145ᵇ; udávarta-ánáha fol. 145ᵇ; gulma fol. 148ᵃ; hṛidroga fol. 148ᵇ; urograha fol. 149ᵇ; mútrakṛichhra fol. 150ᵃ; mútrágháta fol. 150ᵇ; aṣmarí fol. 151ᵇ; prameha-piḍaká fol. 158ᵇ; medoroga fol. 159ᵇ; yakṛitplíhan fol. 167ᵃ; ṣotha fol. 170ᵃ; ṣlípada fol. 176ᵃ; vidradhi fol. 177ᵃ; ṣárírágantudagdhavraṇa fol. 181ᵇ; náḍívraṇa fol. 182ᵃ; bhagandara fol. 183ᵃ; upadanṣádhikára fol. 185ᵃ; phulingaroga[1] fol. 185ᵇ; ṣúkadosha fol. 186ᵃ; bhagna fol. 187ᵇ; kushṭha fol. 202ᵃ; kilása fol. 203ᵃ; ṣítapitta-udarda-koṭha fol. 204ᵃ; amlapitta fol. 207ᵇ; visarpa fol. 208ᵇ; visphoṭa fol. 209ᵇ; snáyuka fol. 210ᵃ; masúriká fol. 210ᵃ; kshudraroga fol. 213ᵇ; karṇaroga fol. 218ᵃ; pínasa fol. 221ᵇ; netraroga fol. 234ᵇ; ṣiroroga fol. 238ᵇ; pradara fol. 241ᵇ; strítánukaroga fol. 242ᵃ; somaroga fol. 243ᵃ; bandhyároga fol. 244ᵃ; kákabandhyápraṣamana fol. 244ᵃ; mṛitavatsá fol. 245ᵇ; yonivyápad fol. 247ᵃ; garbhiṇísevyásevyavidhi fol. 251ᵃ; garbhopakramaṇádividhi fol. 253ᵃ; bálarogádhyáya fol. 264ᵇ; visharoga fol. 268ᵃ; vájíkaraṇa fol. 277ᵇ; rasáyana fol. 305ᵃ.

Auctorum et librorum nomina haec pauca mihi obviam fuerunt: *Kaṇṭhárava; Mṛiḍánítantra; Yogamuktávalí; Yogaratna; Yogaratnasamuchchaya; Ratnákara; Rasayámala; Rámarája*, Náḍíprakáṣae (quem librum Ṣankarasena commentatus est) et Rasadípikae auctor; *Ṣríkaṇṭha; Sudántasena.* Plura e codicibus accuratioribus erui poterunt.

Codex post annum 1815 exaratus est. (Wilson 49.)

752.

Foll. 140–174. Linn. 13. His foliis *Yogaṣatam* continetur, ab auctore anonymo scriptum, quo morborum medicamenta distichis circiter 250. traduntur. Textui interpretatio Guzeratica addita est. Incipit: सिंदूरपूरारुणविग्रहं तं । नत्वा गणेशं त्रिगुणात्मरूपं ग्रंथाननेकान् प्रविलोक्य सर्वान् । निवध्यते सारसमुच्चयो यं ॥१॥ कृत्स्नस्य तंत्रस्य गृहीतधाम्ना चिकित्सिताद्धिप्रसृतस्य दूरं विदग्धवैद्यप्रतिपूजितस्य करिष्यते योगशतस्य बंधः ॥२॥ परीक्ष्य हेत्वामयलक्षणानि चिकित्सि[त]ज्ञेन चिकित्सकेन । निरामदेहस्य हि भेषजानि भवंति युक्तान्यमृतोपमानि ॥३॥ आलस्यतंद्राहृदयाद्धिशुद्धि । दौर्मप्रवत्तिर्घनता च मूत्रे । गुरूदरत्वारुचिसुप्ततामिरामान्वितं व्याधिमुदाहरंते ॥४॥

Distichon secundum et tertium initium operis antiquioris, quod et ipsum *Yogaṣata* appellatur, constituunt[2]. A quo libellus noster, in vulgi usum compilatus, omnino differt.

Haec folia anno 1711 a Devachandra (Navánagaramadhye) parum accurate exarata sunt. (Walker 181ᶠ.)

[1] Dákshiṇátyá upadanṣaviṣesham phulinga- (i. e. sphulinga) saṃjnayá vadanti.

[2] Hic, liber disticha 102. continens, cum commentariis *Amitaprabhavae* et *Rúpanayanae* in cod. E. I. H. 2357. exstat.

753.

Foll. 79–89. Linn. 18. *Kálajnánam*, temporis cognitio, libellus distichis 128. constans, *Ṣambhúnáthae*[1] tributus, quo medicinae elementa traduntur. Disticha singula interpretatio Guzeratica sequitur. Incipit:

कालज्ञानं कलायुक्तं शंभूनांतत्प्रभाषितं
देहिनां ज्ञायते मृत्युं पड्भिर्मासैर्यथाक्रमं १

ऽथै कालज्ञान ये ग्रंथ कलायुक्त छें शंभू जे माहादेव (interpres igitur opusculum a Ṣiva profectum esse opinatus est) तेणें कह्युं छे येणें ग्रंथे प्रांणीनुं आगलि ए छ मसवाडानां मृत्युं जानवुं ॥१॥

Capite primo praecepta generalia continentur. Secundum, de morbis sanabilibus, incipit: वात श्लेष्मा च पित्तं च ज्ञायते धातुदर्शनात् । भेदाभेदविभेदेन कालज्ञाने सदा ध्रुवं ॥३५॥ Tertio morbi insanabiles tractantur. Incipit: अनिलो याति पित्तस्य पित्तं जाति कफं ग्रहे कफः कंठ सनायाति जीवितं तस्य दुर्लभे ॥५०॥ Quarto venae enumerantur. Incipit: उत्तराश्च तथा लंबा मंदा च शरला (l. सरला) तथा कठिना च स्थिरा शुक्ष्मा मिद्वि (l. mṛidví) रौद्रा प्रकीर्त्तिता ॥७३॥ Quinto denique febris curatio tractatur. Incipit: ज्वरस्य प्रथमे स्थाने वैद्यकेन दिनत्रयं न देयं कथितं तोयं भेषजं न च रोगिण ॥८६॥

In fine haec subscripta sunt: इति श्रीशंभूनाथविरचिते श्रीकालज्ञाने वैद्यकविचारे ज्वरस्थानवर्णनं पंचमो समुद्देशः ॥ इति श्रीकालज्ञान समाप्तं ॥ Sequuntur vero capita duo, alterum de pulsus, alterum de vesicae examinatione (náḍíparíkshá, mútraparíkshá) agens. Prius incipit: स्नायु नाडी निसा (l. स्नसा) हंसा धमनी धरणी धरा तंतुकी जीवतज्ञाता (?) स्थिरा चामयवाचकाः ॥१॥ वातपित्तकफद्वंद्वं तृतीयं सन्निपातकं साध्यासाध्यविवेकं च सर्वनाडी प्रकाशयेत् ॥२॥ Alterum incipit: पश्चात्यरजनीयामे नाडिकाना चतुष्टये उत्थाप्या रोगिणो वैद्य मुत्रोत्सर्गं तु कारयेत् ॥१॥ आद्यधारा परित्यज्य मध्यधारासमुद्भवं स्वेतकाचमयो पात्रं क्षिप्त्वा मुत्रं परिक्षयेत् ॥२॥ Utrumque e *Ṣárngadhara-saṃhitae* capite tertio desumtum est.

Haec folia anno 1763 a Rúpavardhana exarata sunt. (WALKER 181c.)

754.

Foll. 90–109. Linn. 7. His foliis *Vaidyajívanam* continetur, quo libello *Lolimbarájas*, Divákarae filius, morborum principalium remedia ita proposuit, ut versibus singulis mulierem amatam compellaret. Quod ingenii egestate, non ubertate, et poetarum inferiorum imitatione factum esse, harum rerum gnaros non latebit. Idem metra artificiosa adhibuit. Initium, collatis codicibus aliis emendatum, hoc:

प्रकृतिसुभगात्तं प्रीतिपात्रं रमाया
दिशतु किमपि धाम श्यामलं मंगलं वः ।
अरुणकमललीलां यस्य पादौ दधाते
प्रणतहरजटालीगांगरिंगत्तरंगैः ॥१॥
रत्नं वामदृशां दृशां सुखकरं श्रीसप्तशृंगास्पदं
स्पष्टाष्टादशबाहु तद्भगवतो भर्गस्य भाग्यं भजे ।
यद्भक्तेन मया घटस्तनि घटीमध्ये समुत्पाद्यते
पद्यानां शतमंगनाधरसुधास्पर्धा विधानोद्धुरं ॥२॥
Divákara-prasádena rogyárogyasamíhayá ।
Samásena vayaṃ kurmaḥ kávyaṃ sad-*Vaidyajíva-*
तथापि क्रियते ग्रंथः संति यद्यपि दुर्जनाः ।   *[nam* ॥3॥
नहि दस्युभयाल्लोको दैन्यवानिह वर्त्तते ॥४॥
येषां न चेतो ललनासु लग्नं
मग्नं न *Sáhityasudhásamudre* ।
ज्ञास्यंति ते किं नु महाप्रयासा-
नंधा यथा वारवधूविलासान् ॥५॥
गदगंजनाय चतुरैश्चरकाद्यै-
र्मुनिभिर्नृणां[2] करुणया कथितं यत् ।
अखिलं लिखामि खलु तस्य रहस्यं
स्वकपोलकल्पितमिहास्ति न किंचित् ॥६॥

गुरोरधीताखिलवैद्यविद्यः
पीयूषपाणिः कुशलः क्रियासु ।
गतस्पृहो धैर्यधरः कृपालुः
शुद्धोऽधिकारी भिषगीदृशः स्यात् ॥७॥
आदौ निदानविधिना विदध्याद्व्याधिनिश्चयं ।
ततः साध्यं समीक्षेत पश्चाद्भिषगुपाचरेत् ॥८॥
औषधं मूढवैद्यानां त्यजंतु ज्वरपीडिताः ।
परसंसर्गसंसक्तं कलत्रमिव साधवः ॥९॥
पथ्ये सति गदार्तस्य किमौषधनिषेवणं ।
पथ्येऽसति गदार्तस्य किमौषधनिषेवणं ॥१०॥[3]
इह गमिष्यति वैद्यमतिः श्रमं
प्रथममेव पुरस्तु महासुखं ।
प्रियतमस्य मृगाक्षि समागमे
नवकरग्रहणे गृहिणी यथा ॥११॥
यतः सर्वेषु रोगेषु प्रायशो बलवाञ्ज्वरः ।
